Digitized by Arya Samaj Foundation Chennai and eGangotri

# अर्वाचीनसंस्कृतम्

Vol. 20 1999

G.K.V. Lib.
Hardwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

079678

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

079678

# अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

एकविंशे वर्षे प्रथमो द्वितीयश्च संयुक्त

Vol. 21 १५ जनवरी–१५ अप्रैल १९९९

प्रकाशनतिथिः : १५.४.१९९९

1999

JAN–OCT.

13/10/99

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

079678

प्रधानसम्पादकः

**डॉ० रमाकान्त शुक्लः**

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

स्थापनाब्दः १९६५

# देववाणी-परिषद्, दिल्ली

६, वाणी–विहारः, नयी दिल्ली–११००५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीनसंस्कृतम् (२१/१-२)

१५ जनवरी, १५ अप्रैल, १९९९ ई०

प्रकाशनतिथिः : १५.४.१९९९

# विषयसूची


| विषय | लेखकः | पृष्ठाङ्कः |
| --- | --- | --- |
| १. सम्पादकीयम् | | अ-आ |
| २. सत्याग्रहनीतिकाव्यसमीक्षणम् (सत्याग्रहनीतिकाव्यस्य चतुर्थसंस्करणस्य सम्पादकीयम्) | डॉ० रमाकान्तशुक्लः | १-६६ |
| ३. संस्कृतजगद्वार्ता | आनन्दवर्धनः, साधना शर्मा, प्रभाकर रामरत्नशास्त्री, डॉ० आशा शर्मा, डॉ० श्रीमती स्वराज गुप्ता, डॉ० चन्द्रभूषण झाः, श्रीमती सरोज व्यासः | ६६-७१ |
| ४. देववाणी-परिषद्वार्ता | अभिनवः शुक्लः | (आवरणपृष्ठे)७२ |


अर्वाचीनसंस्कृतम् (पंजी. सं. ३४७५४/७९)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

रमाकान्तशुक्लः

१५.४.१९९९ ई. प्रकाशकः, सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सम्पादकीयम्

२६-१२-१९९८ ई० तारिकायां सायं ७-५० वादनकाले 'भिवानी' नगरे 'देवसदनम्' इत्यत्र आयुषः सप्ताशीतितमे वर्षेश्री १०८ पं० सत्यदेववासिष्ठमहोदया ब्रह्मलीनाः संवृत्ताः ! तेषामैहिकयात्रोपसंहृतिवृत्तं येनाप्युपलब्धं स तेषां पार्थिवशरीरस्य अन्तिमं दर्शनं कर्तुं भिवानीं प्रति चलितः ।

मयेदं वृत्तं २७-१२-१९९८ ई० तारिकायां मध्याह्ने लब्धम्। श्रीवासिष्ठमहाभागानां स्नेहभाजनेन तच्छिष्येण श्रीमहेशकुमारेणां साकं दूरभाषे संलपता मयेदं वृत्तं ज्ञातम्। दूरभाषो मया हडसनलाइनतः कृतमासीत् कस्मिंश्चिदन्यस्मिन् प्रसङ्गे। तदाहं दिल्ल्याः बहिर्यात्रायां कृतमतिरासम् । हस्ते प्रसेवकः (बेगः) आसीत्। मध्येमार्गम् एकस्याः परिचितायाः विदुष्याः ग्रन्थस्योपरि लिखितां सम्मतिं तस्यै दातुं तदगृहं मिनटद्वयाय स्पृष्टवान्। तत एव मया रोगशय्यारूढः श्रीमहेशकुमारमहोदयः दूरभाषेण सम्पर्कितः। तेनाहमनेन शोकवृत्तेन संज्ञापितः । तस्मिन् दिने सायं ४-३० वादनवेलायां श्री वासिष्ठमहोदयानामन्त्येष्टिर्निश्चितासीत्। अहं यात्रां परित्यज्य भिवानीं प्राप्तः । श्रीवासिष्ठ महाभागास्तदा अग्निमयं विमानमारुह्य विष्णुलोकं गच्छन्ति स्म। मयापि चन्दनकाष्ठं तच्चितायां समर्पितम्, प्रणामाश्च निवेदिताः। तत्र श्रीमहेशकुमारानुजः श्रीआनन्दकुमारस्तेषामन्त्येष्ट्याः सर्वमपि प्रबन्धमीक्षमाण आसीत्। तेनैव साकमहं रात्रौ दिल्लीं प्रतिनिवृत्तः। ७-१-९९ ई० तारिकायां भिवान्यां श्रीवासिष्ठमहोदयानां स्मृतौ श्रद्धाञ्जलिसभायोज्यत यत्राहमपि सम्मिलितोऽभूवम्।

ब्रह्मलीनाः श्रीसत्यदेववासिष्ठाः

(२७-८-१९१२—२६-१२-१९९८ ई०)

ब्र० वासिष्ठमहाभागास्तपस्विन आसन्। ते विश्रुता दूतनाडीविशेषज्ञाः, विद्वांसः, कवयो, भाष्यकाराः, विनीताः मुदुभाषिणः, ऋजुचरितास्तपःस्वाध्यायनिरताः सत्यनिष्ठाः परोपकारिणश्चासन् । तेषां 'विष्णुकाव्यम्' अर्वाचीनसंस्कृते १९९६ तमे वर्षे प्रकाशितम्। तैः सत्याग्रहनीतिकाव्यं, नाडीतत्त्वदर्शनं, श्रीविष्णुसहस्रनामसत्यभाष्यमन्याश्च



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फुटा रचनाः प्रणीय संस्कृतसाहित्यं संवर्धितम्। १९९७ तमे वर्षे ते दिल्लीसंस्कृतअकादम्या अखिलभारतीयसंस्कृतसेवासम्मानेन सभाजिताः किन्तु तैः सविनयं सम्मानराशिः प्रत्याख्यातः ।

१९९६ तमे खैस्तेऽब्दे तेषां **'सत्याग्रहनीतिकाव्य'**स्य चतुर्थं संस्करणं मुद्रणाधीनमासीत्। तस्य सम्पादकत्वं श्रीमता महेशकुमारेण मयि न्यस्तमासीत्। पूर्वसंस्करणस्य सम्पादनं हिन्दीभाषानुवादकर्त्रा डॉ० रुद्रदेवत्रिपाठिना कृतमासीत्। मया चतुर्थसंस्करणस्य सम्पादकीये वक्तव्ये सत्याग्रहनीतिकाव्यस्य किमपि समीक्षणं कृतमासीत्। तच्च सम्पादकीयं श्रीवासिष्ठमहाभागेभ्यो भिवान्यां गतेन मयाक्षरशः श्रावितमप्यासीत्। सम्पूर्णस्य ग्रन्थस्याक्षरयोजनापि दिल्यामेकेन कम्प्यूटरधारिणा कारिता किन्तु संयुक्ताक्षराणि भिन्नाकाराणि तत्र निक्षिप्तानि। तानि संशोधयितुं यदा स उक्तोऽभूत्तदावधि तस्य अक्षरसंयोजकः क्वचिदन्यत्र कार्यव्यापृतोऽभूत्। अतस्तत्र संशोधनाभावे ग्रन्थप्रकाशन- मवरुद्धमतिष्ठत। अत्रान्तरे श्रीमहेशकुमारस्य स्थानान्तरणं राजकोटे जातम्। श्रेयांसि बहुविघ्नानि ! अद्यावधि सत्याग्रहनीतिकाव्यस्य चतुर्थं संस्करणं प्रकाशनं प्रतीक्षते । अस्तु !

अर्वाचीनसंस्कृतस्य एकविंशीये प्रथमे द्वितीये च संयुक्तेऽस्मिन्नङ्के सत्याग्रहनीति-काव्यस्य चतुर्थसंस्करणस्य तत्सम्पादकीयं, यन्मूलग्रन्थकर्तुः राष्ट्रभाषानूदयितुश्च जीवनकाले २१-११-१९९६ तारिकायां मुद्रणाय सन्नद्धमासीत्, अविकलरूपेण प्रकाश्यते। अयमेव श्रद्धाञ्जलिः ब्रह्मलीनेभ्यः श्रीवासिष्ठेभ्योऽर्वाचीनसंस्कृतस्य !

सम्पूर्णस्याप्यस्य लेखस्य पुनरक्षरयोजना श्रीमता पण्डितचन्द्रभानशर्मणा तत्तनयेन चि० प्रवीणशर्मणा च मनोयोगेन कृता । एतावुभावपि धन्यवादार्हौ।

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५-४-१९९९
'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सत्याग्रहनीतिकाव्यसमीक्षणम्

## (सत्याग्रहनीतिकाव्यस्य चतुर्थसंस्करणस्य सम्पादकीयम्)

## 'सत्याग्रहनीतिकाव्य'-कारः श्री १०८ पं० सत्यदेवो वासिष्ठः

पञ्चापप्रदेशान्तर्गत-जालन्धरमण्डलस्थमाहिलगहिलाख्यग्रामे वसिष्ठगोत्रात् सहजपालेतिप्रवरात् सारस्वतब्राह्मणवंशात् पितुः श्रीअनन्तरामशर्मणो जनन्यां श्रीमत्यां द्रौपद्यां २७.८.१९१२ तमेशवीयेऽब्दे समुत्पन्नः श्री सत्यदेवो वासिष्ठः सत्याग्रहनीतिकाव्यस्य कर्त्तास्ति । अनेन स्वजन्मतिथेरुल्लेखः सत्याग्रहनीतिकाव्ये एवं विहितोऽस्ति–

**नन्दतर्काङ्कचन्द्रेऽब्दे भाद्रे भौमेऽग्निभूदिने ।**
**वसाविष्टे धनिष्ठायां गुणपादेऽङ्गलग्नके ॥**

(सत्याग्रहनीतिकाव्यम् ५/४/३)

नन्द (९), तर्क (६), अङ्क (९), चन्द्र (१)-संख्या **'अङ्कानां वामतो गति'**रिति नियमात् वैक्रमाब्दः १९६९ सिद्ध्यति। भाद्रपदमासि प्रविष्टायां त्रयोदश्यां रक्षापूर्णिमायां मङ्गलवासरे सूर्योदयादिष्टघटी ८-धनिष्ठानक्षत्रस्य तृतीये चरणे कन्यालग्नेऽस्य जन्म बभूवेति भावः। अस्य पितामहस्य नाम 'श्रीकृष्ण' इति मातामहस्य च नाम 'श्रीलक्ष्मणदास शर्मा' इत्यासीत्। पित्रा बालः सत्यदेव आजन्मन आदशवर्षमुर्दूभाषां पाठितः। तदनन्तरञ्च 'संस्कृतमेवाध्यापनीयमस्मा' इति कृतनिश्चयेन पित्रा १९७९ तमे वैक्रमाब्देऽमृतसरनगरतो नातिदूरे गण्डासिंहवालानाम्नि स्थाने स्थिते विरजानन्दब्रह्मचर्याश्रमेऽयं संस्कृतमध्येतुं प्रवेशितः। तत्र तदध्यक्षेण आचार्य श्रीब्रह्मदत्तजिज्ञासु-महोदयेनायं वर्णोच्चारणादारभ्यार्षप्रक्रिययाष्टाध्यायीतः पातञ्जल-महाभाष्यान्तं व्याकरणं निरुक्ताङ्गपुरस्सरं धर्मशास्त्रं च पाठितः। बाल्येऽस्य स्मरण-शक्तिरत्यन्तं तीव्रासीत्। ९-३-१९३० तारिकायामाचार्यजिज्ञासुना गृहीतायां स्मरणशक्तिपरीक्षायामनेन घण्टाचतुष्टयचत्वारिंशन्मिनट (४ घं० ४० मि०)-मिते काले अष्टाध्यायी-धातुपाठ-निघण्टु-परिभाषापाठ-लिङ्गानुशासनानां ८८५९ सूत्राणां समग्रः पाठः श्रावितः। अस्यां परीक्षायामनेन ५०० अङ्कानां मध्ये ४९७ अङ्का उपलब्धाः। श्रीजिज्ञासुसौहार्देन वाराणस्यामयं श्रीशङ्कररामत्रिपाठीमहोदयात् ग्रामेगेय-आरण्यक-ऊह-ऊह्येति चतुर्विध-गानपुरस्सरां सामसंहितामपाठीत्। ततश्च वेदमूर्ति-श्रीरामचन्द्रभट्टरटाटेमहोदयात् दर्श-पौर्णमासप्रक्रियां क्रियाकलाप-ज्ञान-पुरस्सरामज्ञासीत्। पुनरयं गुरुवरजिज्ञासुना ज्यौतिषाचार्यस्य श्रीपूर्णचन्द्रत्रिपाठिनः सकाशे ज्यौतिषशास्त्र-मध्येतुं प्रेरितः।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरं लवपुरं (लाहौरनगरं इदानीं पाकिस्तानस्थं) श्रीजिज्ञासुमहोदयस्य निरीक्षणे श्रीवासिष्ठेन अजमेरस्थायाः परोपकारसभायाः कार्यं श्रीमद्दयानन्दस्वामिप्रणीतस्य पाणिनीयाष्टाध्यायी-भाष्यस्य तृतीय-चतुर्थाध्याययोः सम्पादनानुवाद-टिप्पणादि-लेखनकर्म वर्षत्रयं यावद्विहितम्। तत्रैव लवपुरे वैद्यचूडामणेः श्रीनाथूराममौद्गल्यादायुर्वेदीय-ग्रन्थानां विशिष्टं ज्ञानमनेन सम्प्राप्तम्।

तदनु चायं वैद्यवृत्तिमधिष्ठायामृतसरनगरेऽवात्सीत्। तत्र चायुर्वेदस्याद्यगुरुणा भिषक्शिरोमणिना यतिप्रवरपण्डित-तिलकरामशर्मब्रह्मचारिमहोदयेन सविशेषं नाडीविज्ञानं पञ्चीकृत-पञ्चभूतानामूहापोहने च सम्यग् विज्ञापितः। तस्यैव प्रेरणयाऽनेन 'नाडीतत्त्व-दर्शनम्' इत्येतन्नाम प्रबन्धो निरमायि ।

श्रीवासिष्ठाय तद्गुरुभिरनेक उपाधयोऽदीयन्त। तद्यथा सर्वाङ्गसामाध्ययनानन्तरं **'सामस्वरभास्कर'** इति पदं काशीस्थश्रीशंकररामत्रिपाठिना गुर्जरब्राह्मणेन ४.९.१९३४ ई०तारिकायामस्मै प्रदत्तम्। इतरवेदाध्ययनं पुरस्कृत्य **'चतुर्वेदी'**त्युपाधि रस्मै काशीस्थपण्डितरामचन्द्रभट्टरटाटे-महाराष्ट्रब्राह्मणेन ४.९.१९३४ ई० तारिकायां प्रदत्तः। **'आयुर्वेदाचार्य'** इतिपदमनेन श्रीपण्डितनाथूराममौद्गल्यात्तद्विद्यालयाध्यक्षात् १८.३.१९३९ ई० तारिकायां सम्प्राप्तम्। **'साङ्गोपवेदवेदचतुष्टयी'**ति पदं पण्डितश्रीब्रह्मदत्तजिज्ञासुनास्मै १९४२ तमेशवीयेऽब्दे जनवरीमासे (१६ माघे १९९८ वैक्रमाब्दे) समर्पितम्। **'आयुर्वेदानूचान'** इति पदमस्मै श्रीतिलकरामशर्मब्रह्मचारिणा २००२ तमे वैक्रमेऽब्दे माघे मासि १५ तिथौ प्रादीयत। श्रीवासिष्ठो गुरोराशीर्वादात्मकान्येतानि पदानि सादरं स्वनाम्ना सह लिखति। किञ्चायं स्वनाम्नोऽग्रे **'१०८'** इति पदं लिखति। तद्रहस्यं चानेनेत्थं प्रकाशितम्–"ज्योतिर्ज्ञानस्य सारभूतेन रहस्यमयेन चाष्टोत्तरशत १०८ इत्यङ्कविद्यापदेन सममान्यहं श्रीलालाहरभजनेन, ज्ञापितश्चाहमेतद्विषयकं ज्ञानम्, अत एव मयैतदङ्कविद्यापदं १०८ स्वनामतः पूर्वमङ्क्यते। पद्यञ्च ममैतदत्र--

**भानां विभ्रमतां भेषु रूपमष्टोत्तरं शतम् ।**
**वेद्मि वच्मि ततश्चार्थान् ततोऽस्म्यष्टोत्तरं शतम् ॥**

(आत्मपरिचयः श्रीविष्णुसहस्रनाम-सत्यभाष्यम्, तृतीयं संस्क. १९९६, पृ० १३) नाडीतत्त्वदर्शनस्य पञ्चमाध्याये श्रीवासिष्ठेन स्वायुर्वेदगुरूणां स्मरणमित्थमकारि

**श्रीनाथुरामो भिषजां वरेण्यो मौद्गल्यगोत्रो महनीयकीर्तिः ।**
**श्रीरामपूर्वस्तिलको महात्मा विरक्तचूडामणिरार्तबन्धुः ।**



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. शिलाङ्ग-गोत्रस्थ-तपोमहिष्ठादालब्धविद्योऽत्र हरस्य भक्तः ।
श्रीसत्यदेवेन कृते प्रबन्धे नाडीविधाने यशसा जुषन्ताम् ॥

(नाडीतत्त्वदर्शनम्)

सत्याग्रहनीतिकाव्ये कविना स्वगुरू मौद्गल्य-(तिलक) रामौ इत्थं वर्णितौ–

**स्वस्थं मनः स्वस्थशरीरयोगात् सम-त्रिदोश्च मनःप्रसादात् ।**
**मौद्गल्य-रामौ[1] रवितः पुरस्ताद्व्यायच्छतोऽद्याप्युपखाङ्गवर्षौ ॥**

(सत्याग्रहनीतिकाव्यम् ५.२.५१)

**१. श्रीनाथूरामो मौद्गल्यः, श्री तिलकराम ब्रह्मचारी, आभ्यामायुराम्नायो कविनाऽऽप्तः। मौद्गल्य-आयुर्वेद-विद्यालय-लवपुरतः-'आयुर्वेदाचार्य' पदं समुत्तीर्णम्, विक्रमाब्दे १९९५। राम-आयुर्वेद-विद्यालय-अमृतसरतः 'आयुर्वेदानूचानं'-पदञ्च समुत्तीर्णम्, विक्रमाब्दे २००२। एतयोर्नाम-कीर्तनमानृण्याय।** (अनन्तवृत्तिः)

वाराणसेयविद्वत्परिषदध्यक्षेण २००५ तमे वैक्रमाब्दे पौषकृष्णैकादश्यां (२५.१२.१९४८ ई० तारिकायां) नाडीतत्त्वदर्शनस्य कृतान्वेषणपूर्वकस्य निबन्धस्याक्षरशः श्रवणानन्तरं श्रीवासिष्ठः **'भिषक्केसरी'**ति पदेन सभाजितः। (द्र० आत्मनिवेदनं कृतज्ञताप्रकाशश्च. नाडीतत्त्वदर्शनम्, तृतीयं संस्करणम्, पृ० ६-९)

१९३९ तमे ईशवीयेऽब्दे हैदराबादसत्याग्रहप्रसङ्गेऽनेन अष्टादशमासावधिकः कारावासोऽपि भुक्तः। तत्रैवानेन **'सत्याग्रहनीतिकाव्यस्य'** रचना प्रारब्धा।

श्रीवासिष्ठेन लवपुर (लाहौर)-दिल्ली-भिवानीस्थ-सनातनधर्मायुर्वेदमहाविद्यालयेषु प्रधानाध्यापकत्वेन झज्जरस्थ-गुरुकुले चायुर्वेदविभागाध्यक्षत्वेन अध्यापनकर्मापि विहितम्। चरकसंहितादिग्रन्थानामयमनुपमो विद्वान् ।

श्रीवासिष्ठः सितारवादनेऽपि नैपुणीं भजति। सितारवाद्येऽयं वेदमन्त्रान् श्लोकाँश्च सुमधुरतया मूर्च्छयति । प्रयागवास्तव्यः (स्व०) श्री त्रिलोकचन्द्रवसुरस्य सितार-शिक्षक आसीत्। सितार-शिक्षणमस्य नाडीपरीक्षाविधावपि सहायकमभूदित्यनेन स्वीकृतम्। (द्र० आत्मपरिचयः, श्रीविष्णुसहस्रनाम-सत्यभाष्यं, तृतीयं संस्करणम् १९९६, पृ० १३)

अद्यत्वे श्रीवासिष्ठः 'देवसदनम्, महम मार्गः, भिवानी-१२५०२१' इत्यत्र निवसन् आतुरेभ्य आरोग्यं यच्छति।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# व्यक्तित्वम्

यथा श्रीपण्डिततिलकरामशर्मब्रह्मचारिणा १९५० तमेशवीयेऽब्दे परिश्रमी निरलसः परोपकारी विद्याविनयसम्पन्नः श्रीवासिष्ठो वर्णितः, यथा चास्य परिश्रमक्षमता, त्यागक्षमता, विविधबाधासहनक्षमता, एकान्तनिश्चयिता, दानशीलता, परोपकृतिपरता पं० मुंशीरामशर्मशास्त्रिणा १९६९ तमे ईशवीयेऽब्दे साक्षात्कृता (द्र० भाष्यकारविषयको मेऽनुभवः, श्रीविष्णुसहस्रनामसत्यभाष्यम् पृ० १९-२४) यथा च पं० युधिष्ठिरमीमांसकादिभिरन्यैश्च विद्वद्वरैरस्य सद्गुणा बहोः कालात्पूर्वं (१९५८ तमे खैष्टेऽब्दे) वर्णिताः, तत्र नास्त्यद्यापि काचिन्न्यूनता । कृतज्ञता अस्य स्वभावसिद्धो गुणः । यस्य कस्यापि साहाय्यं स्वीकुरुते तस्यास्मिन् जन्मन्येवानृण्याय यतते । मम सौभाग्यान्मयि प्रीतिमावहता वसिष्ठगोत्रेण स्व० पण्डितहरिरामशास्त्रितनुजन्मना पूर्वं भिवान्यां कृताङ्गलाध्यापनेन सम्प्रति च भारतीयराजस्वसेवास्थेन सीमाशुल्ककेंन्द्रीयोत्पादनशुल्कनिरीक्षणनिदेशालये अतिरिक्तमहानिदेशकपदभाजा नित्यं विष्णुस्मरणपरेण श्रीमहेशकुमारेण साकं १०-१२-१९९५ तोऽद्यावधि नैकवारं भिवान्यां गतेन मयापि तथैव साक्षात्कृतश्चतुरशीतिवर्षीयो ब्रह्मर्षिः श्रीसत्येदवो वासिष्ठो यथा पूर्वोक्तैर्विद्वद्भिः। श्रीविष्णुसहस्रनामसत्यभाष्यस्य तृतीयसंस्करणस्य सम्पादकीये मयाऽस्य दिनचर्याया संक्षिप्त उल्लेखो व्यधायि यस्यावलोकनं कर्तुमर्हन्ति पाठकाः (द्र० विष्णुसहस्रनामसत्यभाष्यम्, प्रथमो भागः (१९९६), सम्पादकीयम् पृ० ऊ-ॠ) । केऽस्मादृशा लौकिका जना अस्यालौकिकव्यक्तित्वस्य प्रमापयितारः ? का चाधिगतकतिपयाक्षरा लेखनी अस्य व्यक्तित्वस्य प्रकाशनाय समर्था स्यात् ? केवलमनुभव एव तत्र प्रमाणम् । यः कोऽप्येकवारमस्य सौम्यमूर्तेर्ब्रह्मर्षेर्दर्शनं करोति तस्य चेतसि प्रसन्नता द्रागेव पदं निदधाति । यथा सूर्योऽथ च विष्णुः शब्दसहः क्षमावान् राजते तथैव तदुपासकोऽयं ब्रह्मर्षिरपि । झटिति स्मृतिपथमायाति श्रीवासिष्ठस्य विष्णुकाव्यस्य पद्यमिदम्-

**लोकेऽस्ति कः शब्दसहः प्रसिद्धः सूर्योऽथ विष्णुस्तदुपासको वा ।**
**क्षमा विभूषा सकलस्य लोके सर्वं क्षमावान् सहते क्षमायाम् ॥**

(विष्णुकाव्यम्, १२५६)

अस्य जीवनं सत्यव्यवहारस्य, क्षमाशीलतायाः, परोपकृतेः, आर्जवस्य, वेदज्ञतायाः, लोकज्ञतायाः, ब्रह्माराधनायाः, त्यागस्य सर्वभूतहितनिरततायाश्च पर्यायः । 'यादृगेव


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**ददृशे तादृगुच्यते'** (ऋ० ५/४४/६)- इतिश्रुत्यनुसारं यथादृष्ट एव मयासावत्रोच्यते । अस्य वैदुष्यस्य, अनुभवस्य, परोपकारव्रतस्य, त्यागशीलतायाः नित्यं प्रसन्नतायाश्च इदमित्थं वर्णने वाचि लेखन्यां वा प्रभूता शक्तिरपेक्ष्यते ।

## श्रीवासिष्ठस्य रचनाः

श्री १०८ पं० सत्यदेववासिष्ठमहोदयेन चत्वारो ग्रन्थाः प्रणीताः- १. **सत्याग्रहनीतिकाव्यम्, २. नाडीतत्त्वदर्शनम्, ३. श्रीविष्णुसहस्रनामसत्यभाष्यं, ४. विष्णुकाव्यञ्च** । सत्यभाष्यस्य पद्यात्मकोंऽश एव विष्णुकाव्याभिधां लभते । एतदतिरिक्तं काश्चन प्रकीर्णा रचना अप्यनेन प्रणीताः । एतेषां ग्रन्थानां विषयेऽत्र किञ्चित्सङ्केत्यते:-

### सत्याग्रहनीतिकाव्यम्

श्रीवासिष्ठस्येयमाद्या कृतिः । १९३९ तमे ईशवीयेऽब्दे भाग्यनगरे (हैदराबादनगरे) आर्यसमाजप्रचालिते सत्याग्रहे कारावासं पूरयता श्रीवासिष्ठेन कारागारे केनचिद्बन्दिना समानीतानि भर्तृहरेः शतकानि पाठं पाठमिदं सत्याग्रहनीतिकाव्यं प्रणीतम् । कारागारे कर्गलस्य प्राप्तिर्दुष्करासीदिति कृत्वानेन 'पेंसिल'-लेखन्या स्व 'चरकसंहितायाः' पृष्ठानां पार्श्व (हाशिया) स्थाने (परिसरभुवि) काव्यमिदं लेखितम् । मया चरकसंहितायास्तानि पृष्ठानि-यत्रेदं काव्यं पेन्सिलद्वारा अंकितमासीत्-स्वनेत्राभ्यां १९९६ तमेईशवीयेऽब्दे जनवर्यां भिवानीस्थे देवसदनेऽवलोकितानि । कथंकथमपि विघ्नानुत्तीर्य काव्यमिदं कारागाराद्बहिरानीतवान् कविः । यथोक्तं तेन पर्यालोचकान् प्रति-

**नानाविधा विघ्नसमुद्रवीचीः प्रतीर्य मान्याः ! भवतां पुरस्तात् ।**
**काव्यं मदीयं परिवीक्षणाय स्वान्तेन शान्तेन पुरस्करोमि ॥**

(सत्याग्रहनीतिकाव्यस्य पर्यालोचकान् प्रति, ४)

अस्य काव्यस्य विभाजनमध्यायेषु तत्पादेषु च कृतं कविना । सत्याग्रहनीतिकाव्ये पञ्चाध्यायाः प्रत्यध्यायं च चत्वारः पादाः सन्ति यत्र पूर्वं ९८५ पद्यानि आसन् । अस्मिन् संस्करणे एकः श्लोकः कविना, मन्येऽप्रासङ्गिकत्वात्, काव्यान्निष्कासितः । स चायम् -

**नासया तैलमाकृष्य ततश्चामलकं जलम् ।**
**नासाकृष्टं मुखान्मुञ्चन् शतं जीवत्यनामयः ॥**

(पूर्वसंस्करणे ५-२-३३)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थमस्मिन् संस्करणे ६८४ पद्यानि पञ्चस्वध्यायेषु सन्ति ।

प्रथमाध्यायात्पूर्वं त्रयोदशपद्यैर्मङ्गलाचरणम्, एकादशभिः पद्यैः काव्यनिबन्धनस्य हेतु-निरूपणम्, एकेन पद्येन च सत्याग्रहस्यादिस्रोतसो निरूपणं प्रस्तौति कविः। काव्यस्यान्तेऽस्मिन् संस्करणे एकं षट्चरणात्मकं पद्यमन्यदपि संयोजितं कविना । प्रस्तावनारूपेण **'किञ्चिदात्मनिवेदनम्'** इतिशीर्षकेण द्वादश श्लोकाः किञ्च **'सत्याग्रहनीतिकाव्यस्य पर्यालोचकान् प्रति'** - इत्येतच्छीर्षकान्तर्गतं पञ्च श्लोकाः कविनोपनिबद्धाः । इत्थं 'सत्याग्रहनीतिकाव्यस्य' साकल्येन श्लोक-संख्या ६८४+१३+११+१+१+१२+५=७२७ भवति ।

## सत्याग्रहनीतिकाव्यस्य प्रतिपाद्यम्

सत्याग्रहनीतिकाव्यस्य प्रारम्भः समापनञ्च मङ्गलाचरणेन भवतः । आरम्भमङ्गलाचरणानन्तरं कविः काव्यनिर्माणस्य हेतुमुपस्थापयति । तदनु कविः सत्याग्रहस्यादिमस्रोतस्त्वेन प्रकृतिं वर्णयति । प्रथमाध्यायस्य **'दुर्जनगर्हात्मके'** प्रथमे पादे दुर्जनानां, कुटिलानां, खलानां मूर्खाणां च गर्हा, **'सुजनप्रशंसात्मके'** द्वितीये पादे सुजनानां-सत्याग्रहिणां, क्षमिणां, देशोद्धारकर्तॄणां, परोपकारिणां सद्वृत्तानां, विदुषां च महिमा, **'क्षुत्क्षामीयात्मके'** तृतीये पादे काराकष्टानि, **'अहिंसाव्रतमाहात्म्यीये'** चतुर्थे च पादे अहिंसादियमानां महिमा प्राधान्येन गीयन्ते ।

द्वितीयाध्यायस्य **'राष्ट्रपतनोत्थानीये'** प्रथमे पादे राष्ट्रस्याल्पायुष्ट्वे हेतुः, पराधीन-जातेरवस्थावर्णनम्, जातेरुद्दिधीर्षाक्रमः, कर्म-प्रेरणा च वर्ण्यन्ते । **'त्रिविधराजभेदीये'** द्वितीये पादे स्वधर्मस्थ-विधर्मस्थ-पारदेशिकभेदेन त्रिविधानां राज्ञां वर्णनं, राज्ञः कर्तव्यावबोधनं, राजविभागेषु नियोजनार्हाणां जनानां च वर्णनं करोति कविः । **'स्वराज्यमहिमवर्णनीये'** तृतीये पादे वैदेशिकस्य भूपस्य अहितावहता, स्वदेशीयस्य भूपस्य सुखावहता, निर्भीकतोपदेशः, देशद्रोहिणं प्रति वचनं, देशोद्दिधीर्षोरवस्थेत्यादिका विषया वर्णिताः। **'सदैवमृद्धीये'** चतुर्थे पादे कविः सत्याग्रहस्य पद्धतिं, विजिगीषुं, विघ्नं, स्वगुरूपासनं, स्वदिनचर्यां, विघ्नोत्पत्तिं तत्स्वरूपं च प्रधान्येन वर्णयति।

तृतीयाध्यायस्य **'वारिपटुतीये'** प्रथमे पादे कविर्वारिमिषेण नेतुः कर्तव्यं कथयति; **'आदर्शकर्मवर्णनीये'** द्वितीये पादे कर्मवीरस्य आदर्शकर्माणि निर्दिशति; **'उद्बोधनीयात्मके'** तृतीये पादे समाजस्य विविधवर्गस्थान् जनान् स्वदेशोद्धाराय


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्याग्रहं कर्तुं सम्बोधयति; **'षड्ऋतुवर्णनीये'** चतुर्थे पादे षट्सु ऋतुषु प्रकृतेः कारावासिनां सत्याग्रहिणां च दशायास्तुलनात्मकं वर्णनमुपन्यस्यति।

चतुर्थाध्यायस्य **'नानावर्षगणीये'** प्रथमे पादे कविः दैव-कर्म-निर्धनता-काल-भृति-मृत्यु-विषयेषु स्वविचारान् प्रस्तौति। अस्मिन् पादे भृतेः कुत्सा वैशिष्ट्यातिशयं भजते। **'सन्मित्राश्रयीये'** द्वितीये पादे मित्रं वस्त्रञ्चाधिकृत्य, **'आप्तविद्यीये'** तृतीये पादे विद्यार्थिनमधिकृत्य, **'धर्माभिधे'** चतुर्थे पादे च धर्ममधिकृत्य प्राधान्येन स्वविचारान् प्रस्तौति कविः।

पञ्चमाध्यायस्य **'सत्यविभूति'**नाम्नि प्रथमे पादे सत्यस्य महिमानं मिथ्यावादिनश्च त्याज्यतां, **'परमायुषीये'** द्वितीये पादे आयुर्वेदशास्त्रोक्तं स्वस्थवृत्तोपदेशं, **'ऋतुचर्याभिधे'** तृतीये पादे चरक-सुश्रुतोक्तां ऋतुचर्यां, **'स्वातन्त्र्यीये'** चतुर्थे पादे च स्वातन्त्र्यस्य महत्त्वं, भक्त-शूरवीर-धीर-पण्डित-लक्षणानि, सत्याग्रहविराम-सन्धिं, सत्याग्रहनीतिकाव्यस्य रचनाकालस्थानादिनिरूपणं, स्वजन्मकालं, स्वगुरुपरिचयं स्वकाव्यविषये स्वनिवेदनं च वर्णयति कविः । काव्यान्ते च ब्रह्मणः पूर्णत्वं स्तुवन् मङ्गलमाचरति। (विस्तरार्थं विषय-सूची द्रष्टव्या)

## सत्याग्रहनीतिकाव्यस्य शिल्पविधानम्

कविना सर्वत्र प्रसादगुणोपेता भाषा प्रयुक्ता। काव्यमिदं दुःसन्ध्यक्षरवर्जितमस्तीति कविः स्वयं भणति–

**नवपञ्च समा यावत् काव्यं विज्ञैरपीक्षितम् ।**
**वादितं सप्ततारेण दुःसन्ध्यक्षर-वर्जितम् ॥**

(किञ्चिदात्मनिवेदनम्, २)

कविना अनुष्टबुपजाति-शार्दूलविक्रीडितेन्द्रवज्रोपेन्द्रवज्रा-वसन्ततिलका-शालिनी-शिखरिणीन्द्रवंशा-मालिनी-मन्दक्रान्ता-स्रग्धरा-रथोद्धता-द्रुतविलम्बित-वंशस्थवृत्तेषु पद्यानि रचितानि यत्र स्त्याग्रहनीतेः स्वरूपं वर्णितम् किञ्च दिसम्बर १९३८ तः–८ अगस्त १९३९ यावत् प्रचालितस्य सत्याग्रहस्य, कारागारे बन्दिष्वत्याचाराणां, स्वास्थ्यरक्षणनियमादीनां च वर्णनं कृतम्। ग्रन्थकर्त्रा स्वोपज्ञानन्तवृत्तिरपि काव्यस्यास्य कृता ।

## काव्यरूपम्

'सत्याग्रहनीतिकाव्यम्' किंरूपमिति जिज्ञासायमिदं कथयितुं शक्यते यदिदं मुक्तकं प्रबन्धश्चोभयमप्यस्ति । पूर्वापरसम्बन्धसापेक्षं काव्यं प्रबन्धकाव्यं भवति,


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
पूर्वापर-सम्बन्ध-निरपेक्षं च मुक्तकं भवति । यत्र कविः भाग्यनगरीयसत्याग्रहस्येति-वृत्तमुपनिबध्नाति तत्रास्य प्रबन्धात्मकता विलोक्यते; अन्यत्र पुननीर्तिवचने स्वस्थवृत्तादिपरकेषु सुभाषितेषु च मुक्तकात्मकतास्य साक्षात्क्रियते । प्रबन्धात्मकता यथाऽत्र-

निषिद्ध आसीत्किल तत्र यज्ञः सम्भूय सन्ध्याऽपि निवारिताऽभूत् ।
संस्कार-कृत्यानि निराकृतानि देवालयानां रचना निषिद्धा ॥
जराकृशस्यामरमन्दिरस्य जीर्णोद्धृतिश्चापि निवारिताऽभूत् ।
सुरालयेष्वात्मगृहेषु किं वा ध्वजोच्छ्रयश्चापि नृपेण रुद्धः ॥
तद्राज्यबाह्यस्य च धर्मदेष्टुर्धर्मोपदेशोऽपि निषिद्ध आसीत् ।
तद्देशसम्भूतजनोऽपि तद्वत् सद्धर्मकार्याय निवारितोऽभूत् ॥
यदाप्तुमाज्ञां नृभिरर्थ्यते स्म न्यायालये तेऽधिकृता निमित्तैः ।
सन्दूष्य तान् नेति वचोऽभिभाष्य पौरानकुर्वन् सततं निराशान् ॥
धर्माच्च तर्कादथ राजनीतेः पराङ्मुखं वीक्ष्य नृपं समन्तात् ।
सर्वे निरुद्धात्म-मनोविकाराः सत्याग्रहायैकधियो बभूवुः ॥
भूतनन्दाङ्कचन्द्राब्दे (१९९५) पौषे विक्रमवर्षतः ।
सत्याग्रहः समारब्धः पूर्वं तत्पुरवासिभिः ॥
ततस्तं चिर-सञ्चारं कर्त्तुमाङ्गलराज्यतः ।
प्राज्ञास्तत्र समायाता आदिष्टा रण-संसदा ॥
नीतः सोऽर्थाप्तिसंयुक्तः सन्धिपूर्वः समाप्तिताम् ।
अङ्गनन्दाङ्कचन्द्राब्दे (१९९६) श्रावणस्य जिनांशके ॥ (१/२/४-११)

मुक्तकात्मकता यथात्र-

सत्याग्रहज्ञानजुषो नरा ये तच्च्यावने नालमिहास्ति लक्ष्मीः ।
नूनं दवाग्नेः शमने समर्थो वायुः कदाचिन्न समृद्धवेगः ॥ (१/२/१४)
आतङ्कयाग्रहिणं राजा शक्तः स्यात्तदसुक्षये ।
किन्त्वजोऽप्यस्य नालं स्यात् गतिं रोद्धुं शुभावहाम् ॥ (१/२/१६)

कविः काव्यस्य प्रयोजनमित्थं प्रस्तौति-

काव्यनिमाणचातुर्यं कवीनां धर्म उच्यते ।
किं तया काव्यनिर्मित्या देशं जातिं न योद्धरेत् ॥


CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

**राष्ट्रोन्निनीषया काव्यं कुर्वन् विज्ञानवर्धनम् ।**
**तृणाय मन्यते राज्यं कविः सत्याप्तिलिप्सया ॥** (१/२/३४-३५)

श्रीवासिष्ठस्य काव्यगुरुः श्रीकेदारनाथशर्मा सारस्वत आसीदित्यसावस्मिन् काव्ये स्वीकरोति-

**सन्तीह नाना कविकर्मदक्षाः केदारनाथोऽस्ति मयाऽत्र वन्द्यः ।**
**यस्योपदेशैरुत शर्वदृष्ट्या काव्याङ्कनं पूर्तिमगान्ममेदम् ॥** (५/४/३२)

कविनास्य काव्यस्य रचना पाण्डित्यप्रदर्शनाय न कृता अपितु आत्मभावानां नैसर्गिकप्रकाशनायैव कृता-

**कवेः कर्म कविर्वेत्ति वाचका दोषमेव हि ।**
**मर्त्यः स्खलनधर्माऽस्ति तस्माच्छिद्रं प्रपूर्यताम् ॥**
**शब्दजालमपाकृत्य साधु-शब्द-विभूषितम् ।**
**कृतं काव्यं प्रसादाय नहि क्लेशाय चेतसः ॥**
**नात्युक्तं कविधर्मेण, नावनीतमधर्मतः ।**
**यथाभावानुगैः पद्यैः कृतं स्वान्तःप्रकाशनम् ॥** (५/४/३६-३८)

काव्यस्यान्ते कवेः सारगर्भिता अष्टपदात्मिका **'नोच्चैरुत्पत रे'** इत्येतच्छीर्षकैका गीतिरपि सङ्कलितास्ति यस्यामन्योक्तिशैल्या जीवः प्रबोध्यते ।

## काव्येऽभिव्यक्तं कवेर्व्यक्तित्वम्

सत्याग्रहनीतिकाव्ये तत्कर्तुः व्यक्तित्वमपि समुन्मीलितं भवति । कवेर्नाम सत्यदेवोऽस्ति। तस्य जन्म २७-८-१९१२ ई. तारिकायां जातम्। तस्य पिता वसिष्ठ-गोत्रीयः सहजपालप्रवरः सारस्वतब्राह्मणः श्री अनन्तरामः । माता तस्य द्रौपदी । श्रीब्रह्मदत्तजिज्ञासुरस्य व्याकरणगुरुः । श्रीनाथूराममौद्गल्य-श्रीतिलकरामब्रह्मचारिभ्यां तेनायुर्वेदविद्या गृहीता । श्रीकेदारनाथसारस्वतस्तस्य काव्यगुरुः । भाग्यनगर (हैदराबाद)-कारागारेऽसौ सत्याग्रहार्थं १९३८ तमे खीष्टाब्दे कारावासं प्राप्तवान् । तस्य यौवनं गुरूणां सेवायां व्यतीतम् । गुरुसेवां तु स श्रेष्ठत्वेन स्वीकरोति किन्तु पात्रमार्जनं स कष्टकरं मनुते । स सहशिक्षाया विरोधी अस्ति । स कामुकानामध्यापकानां निन्दकः। सोऽध्ययनकाले विद्यार्थिनां श्रृङ्गारप्रियताया विरोधी अस्ति। कविः सत्ये निष्ठावानस्ति, सत्यपालनमार्गे ये ये विघ्नाः समायान्ति तान् विजेतुं स यत्नवानस्ति। स सत्यं शरणं गच्छति । सत्ये तस्य हार्दिकी श्रद्धास्ति (द्र० मङ्गलाचरणम्,,


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
हेतुनिरूपणम्) । कविः जन्मान्तरे विश्वसिति (द्र० हेतुनिरूपणम्, ७) । स ज्यौतिषशास्त्रे आस्थावानस्ति । कविर्वेदज्ञताया लोकज्ञतायाश्च समन्वये विश्वसिति स देशभक्तोऽस्ति, देशोद्धाराय च यतते (१/१/४) । स निर्भीक उत्साही चास्ति। स हि देशस्य स्वतन्त्रतामभिलषति (१/२/३) । स हि विनयी अस्ति ।

स निजत्रुटीः प्रमार्जयितुं सर्वदा सन्नद्धस्तिष्ठति । स हि धर्मवीरः, अत एव धर्मरक्षार्थं सत्याग्रहं करोति । स हि गुरुभक्तः, अत एव तदाज्ञया सत्याग्रह-संग्राम-क्षेत्रेऽवतरति । स स्वगुरून् सश्रद्धं सङ्कीर्तयति । स हि धैर्यवान्; काराकष्टानि धीरतया सहते । स हि पितृभक्त; स्वपितृनाम्ना अनन्तवृत्तिं रचयति । स हि पितुर्वात्सल्यभाजनम्; कारागारे तस्य पत्रं लभते । स हि मातृभक्तः, तां स्तौति। स हि देशस्योद्धाराय परिश्रमं त्यागं च वृणुते । स हि सूक्ष्मेक्षिकया लोकं पश्यति। स हि संयमधनः । स स्वास्थ्यरक्षार्थं व्यायाममावश्यकं मनुते । अवश्यं सोऽपि स्वगुरू श्रीनाथूराममौद्गल्य-तिलकरामब्रह्मचारिणाविव युवावस्थायां व्यायामी अभवत्। स अन्यायस्य विरोधं कर्तुं सोत्साहं सन्नद्धोऽस्ति । स हि कष्टसहिष्णुरस्ति । स शृङ्गारचर्चां तावन्न कर्तुमिच्छति यदवधि देशे स्वराज्यं, सुखं समृद्धिश्च न भवेयुः। स आयुर्वेदशास्त्रस्य गम्भीरो विद्वानस्ति। चरक-सुश्रुत-वाग्भटादीनां ग्रन्थास्तेन सम्यगधीताः । भर्तृहरिस्तस्य प्रियतमः कविः । महाभारत-श्रीमद्भागवत-प्रभृतिग्रन्थान् सोऽधीतवान् । स भृतिं निन्द्यां स्वाभिमानविरोधिनीं च मनुते । स स्वावलम्बनस्य पक्षधरः । स कस्माच्चिदपि दानं न गृह्णाति । स स्वार्जितधनेन वपुर्मनश्च पुष्णाति। स शिष्येभ्यो विद्यां प्रयच्छति । स हि चिकित्साकर्म कुर्वन् आतुरेभ्यो वटिकां सत्यामावश्यकतायां च धनमपि प्रयच्छति । सत्याग्रहनीतिकाव्ये यत्कविना सिद्धान्तितं तस्य सोऽद्यापि (चतुरशीतिवर्षवयसि) स्वजीवने पालनं करोति-इति जानन्ति मादृशाः प्रत्यक्षदर्शिनः । इदमस्ति तस्य जीवनचर्यानिदर्शकं पद्यम्-

**पुष्णामि चार्जितधनेन वपुर्मनश्च नैवाददे दानमभीप्स्यमन्यैः ।**
**विद्यां ददाम्यहरहो वटिकां धनञ्च कुर्वे स्थितीरघभिदो निचिताघशान्त्यै॥**

(सत्याग्रहनीति० २/४/२६)

## सत्याग्रहनीतिकाव्ये संवादः, शब्दार्थहरणम् उपजीवनं वा

राजशेखरेण काव्यमीमांसायां हरणस्य चर्चा कृतास्ति । हरणस्य परिभाषां स इत्थं प्रस्तौति- **'परप्रयुक्तयोः शब्दार्थयोरुपनिबन्धनं हरणम् । तद् द्विधा परित्याज्य-**


CC-0. In Public Domain. Gurukul Kangri Collection Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**मनुग्राह्यं च ।'** (काव्यमीमांसा, अ० ११) भावोऽयम्-यदा पूर्वकविप्रयुक्तशब्दावल्या भावराशेश्च परवर्ती कविः स्वरचनायामुपयोगं करोति तदा स शब्दहरणमर्थहरणं वा करोति । इदं हि हरणं कदाचिन्नैव कर्तुं कदाचिच्च स्वप्रतिभाप्रकर्षात्कर्तुं युज्यते । त्याज्यं हरणं निन्दितं भवति, अनुग्राह्यं पुनः स्वागतार्हं मन्यते ।

शब्दहरणस्य पञ्च प्रकारा राजशेखरेण निर्दिष्टाः-(१) पदहरणम्, (२) पादहरणम् (३) अर्द्धहरणम् (४) वृत्तहरणम् (५) प्रबन्धहरणञ्च-**'तयोः शब्द-हरणमेव तावत्पञ्चधा-पदतः, पादतः, अर्द्धतः, वृत्ततः, प्रबन्धतश्च'** (काव्यमीमांसा, अ० ११)

राजशेखरस्य मतेन एतेषामन्योऽन्यसमन्वयेऽन्येऽपि भेदाः भवितुं शक्नुवन्ति । केचिद् विचारकाः हरणात्मिकां क्रियां चौर्यं मन्यन्ते, अपरे हरणस्यावश्यकतां प्रतिपादयन्ति, केचिद् हरणं स्वीकरणं कथयन्ति । काव्यमीमांसाकारस्तु **'तदिदं स्वीकरणापरनामधेयं हरणमेव'** इत्यभिदधाति । सोऽग्रे लिखति-**'यत्तु परकीयं स्वीयमिति प्रोक्तानामन्यतमेन कारणेन विलपन्ति तन्न केवलं हरणम्, अपितु दोषोदाहरणम्। मुक्तक-प्रबन्ध-विषयं तत् । मूल्यक्रयोऽपि हरणमेव । वरमप्राप्तिर्यशसो न पुनर्दुर्यशः । 'तद्वदुक्तिहरण' मित्याचार्याः ।'** (काव्यमीमांसा, अ० ११)

शब्दहरणप्रकरणमुपसंहरन् राजशेखरः कथयति यदि पूर्वोक्तीनामर्थान्तरे सङ्क्रमणं विधीयेत तर्हि तासां प्रत्यभिज्ञानं न भवति, अपितु ताः चारुतयास्वाद्यतां यान्ति किन्तु यदि तासां यथावत्पुनराख्यानं क्रियते तर्हि चौर्यमेव । स हि तादृशं हरणमनुमनुते यन्निगूहितं तिष्ठेत्। एतदर्थं हरणकर्त्रा कविना आच्छादकेन संवर्गकेण वा भाव्यम्-

**"उक्तयो ह्यर्थान्तरसङ्क्रान्ता न प्रत्यभिज्ञायन्ते, स्वदन्ते च ; तदर्थास्तु हरणादपि हरणं स्युः" - इति यायावरीयः ।**

नास्त्यचौरः कविजनो नास्त्यचौरो वणिग्जनः ।
स नन्दति विना वाच्यं यो जानाति निगूहितुम् ॥
उत्पादकः कविः कश्चित् कश्चिच्च परिवर्तकः ।
आच्छादकस्तथा चान्यस्तथा संवर्गकोऽपरः ॥
शब्दार्थोक्तिषु यः पश्येदिह किञ्चन नूतनम् ।
उल्लिखेत्किञ्चन प्राच्यं मान्यतां स महाकविः ॥

(काव्यमीमांसा, अ० ११)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यमीमांसायाः द्वादश-त्रयोदशाध्याययोरर्थहरणस्य विचारोऽस्ति । तदनुसारं द्वात्रिंशत्प्रकारकमर्थहरणं भवति । अर्थो हि त्रिधा-(१) अन्ययोनिः, (२) निह्नुतयोनिः (३) अयोनिश्च । आद्ययोर्द्वौ द्वौ भेदौ भवतः; पुनश्चतुर्णामपि अष्टौ अष्टौ भेदा भवन्ति । तद्यथा- "**त्रिपथमर्थमध्यगीष्महि यदुतान्ययोनिर्निह्नुतयोनिरयोनिश्च। तत्रान्ययोनिर्द्विधा प्रतिबिम्बकल्प आलेख्यप्रख्यश्च । निह्नुतयोनिरपि द्विधा तुल्यदेहितुल्यः परपुरप्रवेशसदृशश्च । अयोनिः पुनरेक एव ।**" (काव्यमीमांसा, १२)

काव्यमीमांसाकार आनन्दवर्धनमनुसरन्नप्यत्र काञ्चिन्नवीनतां प्रस्तौति । परपुरप्रवेशनाम्नः संवादभेदस्य चर्चा आनन्दवर्धनेन न कृता; तेन त्रयाणामेव चर्चा कृता-

**संवादो ह्यन्यसादृश्यं तत्पुनः प्रतिबिम्बवत् ।**
**आलेख्याकारवत्तुल्यदेहिवच्च शरीरिणाम् ॥**
**तत्र पूर्वमनन्यात्म, तुच्छात्म तदनन्तरम् ।**
**तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत्कविः ॥**

(ध्वन्यालोकः, ४/१२-१३)

राजशेखरात्प्रभावितो हेमचन्द्राचार्योऽपि छायाया अर्थादर्थस्योपजीवनप्रसङ्गे परपुरप्रवेशमपि भेदं स्वीकरोति- "**छायायाः प्रतिबिम्बकल्पतया आलेख्यप्रख्यतया तुल्यदेहितुल्यतया परपुरप्रवेशप्रतिमतया चोपजीवनम् ।**" (काव्यानुशासनम् १/१०)

राजशेखरेण अर्थहरणस्य द्वात्रिंशद्भेदानां स्वरूपं विस्तरशो दर्शितम्। प्रतिबिम्बकल्पस्य काव्यस्य रूपमित्थम्-

**अर्थः स एव सर्वो वाक्यान्तरविरचनापरं यत्र ।**
**तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ॥**

प्रतिबिम्बकल्पस्य काव्यस्य व्यस्तक (व्यत्यस्तक)-खण्ड-तैलबिन्दु-नटनेपथ्य-छन्दोविनिमय-हेतुव्यत्यय-संक्रान्तक-सम्पुटाख्या अष्टौ भेदास्तेन निर्दिष्टाः।

आलेख्यप्रख्यस्य लक्षणम्-

**कियतापि वस्तुसंस्कारकर्मणा वस्तु भिन्नवद्भवति ।**
**तत्कथितमर्थचतुरैरालेख्यप्रख्यमिति यावत् ॥**

समक्रम-विभूषणामोष-व्युत्क्रम-विशेषोक्ति-उत्तंस-नटनेपथ्य-एकपरिकार्य-प्रत्यापत्ति-संज्ञकाः अस्याष्टौ भेदा भवन्ति।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुल्यदेहितुल्यस्य लक्षणम्–

**विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।**
**तत्तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोऽपि ॥**

अस्य विषयपरिवर्त–द्वन्द्वविच्छित्ति–रत्नमाला–संख्योल्लेख–चूलिका–विधानापहार–माणिक्यपुञ्ज–कन्दाभिधेया अष्टौ भेदा भवन्ति।

परपुरप्रवेशप्रतिमस्य लक्षणम्–

**मूलैक्यं यत्र भवेत्परिकरबन्धस्तु दूरतोऽनेकः ।**
**तत्परपुरप्रवेशप्रतिमं काव्यं सुकविभाव्यम् ॥**

अस्य हुडुयुद्ध–प्रतिकञ्चुक–वस्तुसञ्चार–धातुवाद–सत्कार–जीवञ्जीवक–भावमुद्रा–तद्विरोधीत्यष्टौ भेदाः परिगणिताः। 'पुर'शब्दः शरीरार्थकः। धरणिर्हलायुधश्च शरीरार्थे 'पुर'मिति शब्दं गणयतः। तद्यथा–

**पुरं शरीरमित्याहुर्गृहोपरिगृहे पुरम् ।**
**पुरो गुग्गुलुराख्यातो नगरेऽपि पुरं पुरी ॥**

–धरणिः।

(अमरकोष 'रामाश्रमी' टीकायाम् **'अगारे नगरे पुरम्'** (३.३.१८३) इत्यस्य व्याख्यायामुद्धृतम्।)

**तनुस्तनूः संहननं शरीरं कलेवरं विग्रहदेहकायाः ।**
**अङ्गं वपुर्वर्ष्म पुरं च पिण्डं क्षेत्रं च गात्रं च घनश्च मूर्तिः ॥**

(हलायुधकृता 'अभिधानरत्नमाला' २.३५५)

अतः 'परपुरप्रवेश' इत्यस्य 'परकायप्रवेश' इत्यर्थः कर्तुं युज्यते।

मोनियर विलियम्स- कृतशब्दकोषे शत्रुनगरप्रवेशात्मकोऽर्थः स्वीकृतोऽस्ति। डा. ए. एम. उपाध्याय–महाभागेन क्वचित् परनगरप्रवेशात्मकः क्वचिच्च परकायप्रवेशात्मकोऽर्थो विहितः (द्र. : Kavyanusasanam of Hemachandra : A Critical Study : Dr. A.M. Upadhyay pp 50. 51, 56.

एतेषां सर्वेषां भेदानां लक्षणानां परिज्ञानार्थं काव्यमीमांसाया द्वादशस्त्रयोदशश्चाध्यायौ द्रष्टव्यौ।)

हेमचन्द्राचार्यः 'काव्यानुशासन'स्य स्वोपज्ञविवेकटीकायां **'यथोत्तरं चामीषां चतुर्णामपि प्राधान्यम्'** इत्याचक्षाणः परपुरप्रवेशप्रतिममर्थहरणं सर्वोत्तमं प्रतिबिम्बतुल्यं च निकृष्टं प्रतिपादयति।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्याग्रहनीतिकाव्ये शब्दहरणस्य अर्थहरणस्य च परित्याज्यान्यनुग्राह्याणि वा प्रभूतान्युदाहरणनि द्रष्टुं शक्यन्ते । कविना बहूनि पद्यान्येवम्भूतानि विरचितानि यानि महाभारतस्य, श्रीमद्भागवतस्य भर्तृहरेरन्येषां वा पूर्वकवीनां पद्यैः साम्यं बिभ्रति; यथा–

१. कालदिग्भिरमेयाय सत्यधृन्मात्रमूर्तये ।
सत्तपस्त्यागयुक्ताय नमः सत्याग्रहाय ते ॥
(सत्याग्रह०, मङ्गलाचरणम्, १)

सत्याग्रहनीतिकाव्यस्य मङ्गलाचरणस्य प्रथमोऽयं श्लोको भर्तृहरेर्नीतिशतकस्य मङ्गलाचरणात्मकमिमं श्लोकमुपजीवति–

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥
(नीतिशतकम्, १)

२. किरात-हूणान्ध्र-पुलिन्द-पुक्कसा आभीर-कङ्का यवनाः खसादयः।
अन्ये च पापा ऋतधारणाश्रयाद् विशुद्धिमाप्ता ऋतपाय ते नमः॥
(सत्याग्रहनीति०, मङ्गलाचरणम्, ७)

अस्मिन्पद्ये श्रीमद्भागवतीयस्यास्य पद्यस्य प्रतिबिम्बो भासते–

किरात-हूणान्ध्र-पुलिन्द-पुक्कसा आभीर-कङ्का यवनाः खसादयः ।
येऽन्ये च पापा यदुपाश्रयाश्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ॥
(श्रीमद्भागवत० २/४/१८)

३. शमप्रधानैस्तपसाऽतिदीप्तैः सञ्चीयते वह्निसमं हि तेजः ।
प्रदाहशीलं हि तपोऽस्ति यस्माद्भस्मत्वमायाति नरोऽवमन्ता ॥
(सत्याग्रहनीति० १/२/१३)

इदं पद्यं महाकवेः कालिदासस्याभिज्ञानशाकुन्तलस्येदं पद्यमुपजीवति–

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला अपि सूर्यकान्तास्तदन्यतेजोऽभिभवाद् दहन्ति ॥
(अभिज्ञानशाकुन्तलम्, २/७)

४. अद्रेः शृङ्गं कथमपि नरः पर्यटन् वाऽधिरोहेत्
सर्पं कालानलसमविषं धारितुं वा क्षमः स्यात् ।
रोद्धुं शक्तोऽप्यथ भुवि भवेद् यादसां भीषणानां
जिह्वास्याहो परमिह मनाग् भेषजं नास्ति लोके ॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्रेय-धन्वन्तरि-मार्ग-चायिनौ विषापहाराय सदा प्रभू स्तः ।
मूर्खस्य दोषापगमाय हा पुनर्न मान्त्रिको नैव च भेषजः प्रभुः ॥
(सत्याग्रहनीति० १/२/२४, २५)

अनयोः पद्ययोः कालिदासकृतमेघदूतस्य भर्तृहरेर्नीतिशतकस्य च पद्यानां प्रभावोऽवलोक्यते–

'अद्रेः शृङ्गं हरति पवनः' (मेघदूतं)
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत् । (नीतिशतकम्, ४)
शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गो-गर्धभौ ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥
(नीतिशतकम्, ११)

५. सूनुः प्रियतमा स्वामी मित्रं परिजनो मनः ।
आकारो विभवो वक्त्रं यस्यादेशकरः सती ॥
सकृपः स्नेहवद्धश्च क्लेशलेश-विवर्जितम् ।
रुचिरो निभृतश्चैव विद्याभूषितमेव च ॥
सम्पद्भिराभिः संयुक्तो नरो नो चेत् परोपकृत् ।
श्वसन्नपि स धिक्कार्यः पांसुराशेरुपासकः ॥
(नीतिशतकम्, १/२/४०-४२)

एते श्लोका भर्तृहरेरनेन पद्येन प्रभाविताः सन्ति -

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः ।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना ॥
(नीतिशतकम्, २५)

६. नो यान्ति सत्य-निभृते पथि दण्डभीता
गत्वाऽपि विघ्नविहताः प्रतियन्ति मध्याः ।
दण्डैरनेकविधकैः प्रतिहन्यमाना
गन्तव्यमार्यपुरुषा न परित्यजन्ति ॥
(सत्याग्रहनीति०, १/२/४५)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं पद्यमिदं पद्यं स्मारयति–

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥
(मुद्राराक्षसम् २/१७; नीतिशतकम्, २७)

७. संसारे मनुजाः प्रलम्भनधियां नॄन् वञ्चयन्तेऽन्वहं
तेऽन्तर्भावमवाप्तुमन्यजनुषः स्वं कुर्वते तन्मनः ।
सूक्त्यैके रसयन्ति हृत्कटुगिरा सन्तोषयन्त्या परं
स्वातन्त्र्ये विपदेति भूतिबहुला मा ब्रूहि दीनं वचः ॥
(सत्याग्रहनीति०, २/३/१२)

इदं पद्यमस्य पद्यस्य च्छायामनुहरति–

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यति तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥
(नीतिशतकम्, ५१)

८. कुत्सेयुः कुशलाः स्तुवन्तु बहु वा प्राणाः प्रणश्यन्तु वा
न्यायार्थं समरे प्रदत्तचरणो धीरो न पश्चाद्व्रजेत् ।
निर्देशं परिषद्व्यवस्यति तु यं तं कर्तुमातिष्ठते
विच्छेद्योत्पथगं जलं तरणकृद् यात्येव लभ्यां भुवम् ॥
(सत्याग्रहनीति०, ३/२/३७)

सत्याग्रहनीतिकाव्यस्येदं शार्दूलविक्रीडितं भर्तृहरेरस्य वसन्ततिलकावृत्तस्य भावं शब्दान्तरैर्यथावश्यकं स्वीकरोति–

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥
(नीतिशतकम्, ८४)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९. यावत्कार्यसहं भवेद्वपुरिदं यावच्च नेता ज्वरा
यावत्साधनसन्ततेरुपगतिर्यावन्मनः संयतम् ।
तावत्सत्यविधौ यतेत तपसा श्रान्तेन्द्रिये तेजसि
चिन्ताभिः परिलुप्तसर्वविभवे सत्ये श्रमः कीदृशः ॥
(सत्याग्रहनीति०, २/४/२८)

सत्याग्रहनीतिकाव्यस्येदं पद्यं भर्तृहरेरिदं पद्यमनुसति–

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥
(वैराग्यशतकम्, ८४)

१०. क्वचिद्दण्डाघातः क्वचिदपि नृणां गर्हितवचः
क्वचिल्लोष्ठाघातः क्वचिदपि च बन्धालयगमः ।
क्वचिद्धूलिक्षेपः क्वचिदपि च वेत्राततिसहो
भृशं न्यायार्थी स्वं चरणमथ पृष्ठे न कुरुते ॥

क्वचिद्देशाद्देशं क्वचिदपि च रोगैर्विलपनं
क्वचिद्वर्चोवाहः क्वचिदपि च कर्मातिकरणम् ।
क्वचिन्म्लाने वासः क्वचिदपि निरन्नेन शयनं
पदं पश्चान्नेतुं मनसि सुजनो नैव लषति ॥

क्वचित्खातो भूमेः क्वचिदपि कदन्नेन सुहितिः
क्वचित्स्वाङ्गे कीलाः क्वचिदपि च मित्रादिमरणम् ।
क्वचिच्छाणं वासः क्वचिदपि च देहान्तगमनं
पदं पश्चात्कर्तुं मनसि सुजनो नाभिलषति ॥
(सत्याग्रहनीति०, ३/२/३८-४०)

'क्वचिदि'ति शब्देन प्रारब्धास्वेतासु शिखिरणीषु क्वचिदारब्धानामेतेषां पद्यानां कश्चित्प्रभावोऽवलोकयितुं शक्यते–

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं
क्वचिच्छाकाहारी क्वचिपि च शाल्योदनरुचिः ।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्॥
(नीतिशतकम्, ८२)

क्वचित्सुभ्रूभङ्गैः क्वचिदपि च लज्जापरिणतैः
क्वचिद्भीतित्रस्तैः क्वचिदपि च लीलाविलसितैः।
नवोढानामेभिर्वदनकमलैर्नेत्रचलितैः
स्फुरन्नीलाब्जानां प्रकरपरिपूर्णा इव दृशः॥
(शृङ्गारशतकम्, ४)

क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरः
क्वचिद्भूमीशय्यः क्वचिदपि च पर्यङ्कशयनः।
क्वचिद्भिक्षावृत्तिः क्वचिदपि च मृष्टाशनरुचि-
महात्मा योगज्ञो गणयति न दुखं न च सुखम्॥
(सुभाषितरत्नभाण्डागारम्, ३८४/३९)

११. कदा सत्ये शोकोद्भवविमति-मोहाब्धितरणे
तपःपूतैः सेव्ये प्रणिहितमना गद्गदगिरा।
मम स्वान्ते सत्य ! प्रततसुखदाम्भोधि-निहित !
वसेत्याशंसंस्त्वां निमिषमिव नेष्यामि दिवसान्॥
(सत्याग्रहनीति०, ३/३/५६)

'कदा'-शब्देनारब्धे 'निमिषमिव नेष्यामि दिवसान्' इत्यनेन वाक्यांशेन च समापितेऽस्मिन् शिखरिणीवृत्तेऽधोदत्तानां तथाभूतानां पद्यानां प्रभावो द्रष्टुं शक्यते-

कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम्।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान्॥
(सुभाषितरत्न०, ३८५/५९। पद्यमिदं वैराग्यशतकस्य केषुचित्संस्करणेषु सङ्कलितमस्ति। साहित्यदर्पणेऽपि मनाक्परिवर्तनेनेदं समुद्धृतमस्ति।)

कदा वृन्दारण्ये विमलयमुनातीरपुलिने
चरन्तं गोविन्दं हलधरसुदामादिसहितम्।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अये कृष्ण स्वामिन्मधुरमुरलीवादन विभो
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥

(सुभाषितरत्न०, ३८५/५७)

कदा वा साकेते विमलसरयूतीरपुलने
चरन्तं श्रीरामं जनकतनयालक्ष्मणयुतम् ।
अये राम स्वामिञ्जनकतनयावल्लभ विभो
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥

(सुभाषितरत्न०, ३८५/५८)

१२. सत्याग्रही सत्यपदं प्रपित्सुर्वेदान्तसारं हृदि संस्मरंस्तु ।
न जातु कामान्न भयान्न लोभाद्धर्मं विलुम्पेच्छ्वसनस्य मोहात् ॥
नित्यो धर्मः सौख्य-दुःखे त्वनित्ये देही नित्यो हेतुरस्य त्वनित्यः ।
हित्वाऽनित्यं प्रश्रयेन्नित्यमेव यस्मान्नित्ये नित्यधर्मा रमेत ॥

(सत्याग्रहनीति०, ४/४/६)

अस्मिन् पद्यद्वये महाभारतीयमिदं पद्यं साकल्येन निगीर्णमस्ति-

न जातु कामान्न भयान्न लोभाद् धर्मं त्यजेज्जीवितस्यापि हेतोः।
नित्यो धर्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ॥

(महाभारतम्, स्वर्गारोहणपर्व ५/६३)

१३. वृष्यं पुष्टिदमायुष्यं शुचि रूपप्रसादनम् ।
केशश्मश्रुनखादीनां कल्पनं सम्प्रसाधनम् ॥

(सत्याग्रहनीति०, ५/२/४१)

अयं श्लोकोऽमुं श्लोकमनुहरति-

पौष्टिकं वृष्यमायुष्यं शुचि रूपविराजनम्।
केशश्मश्रुनखादीनां कल्पनं सम्प्रसाधनम् ॥

(चरक०, सूत्रस्थानम् ५/९९)

१४. विहितमविहितं वा कुर्वता कृत्यजातं
सकलयतनयोगात् तत्फलं चिन्तनीयम् ।
अतिरभसकृतानां निश्चितेऽर्थेऽस्ति शङ्का
तपति विविधचिन्तस्तत्फलान्तं प्रतीक्षी ॥

(सत्याग्रहनीति०, ४/८/२५)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं पद्यं भर्तृहरेरिदं पद्यमनुसरति–

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥

(नीतिशतकम्, १००)

१५. सत्याग्रहं भज सदा त्यज लोकवादं
सेवस्व शास्त्र-निपुणं त्यज मूर्खसङ्गम् ।
दोषान् विविच्य मनसो वपुषश्च नित्यं
नम्रत्वमात्मनि निधाय रमस्व लोके ॥

(सत्याग्रहनीति०, ५/१/१०)

अस्य पद्यस्य रचनासरणिः श्रीमद्भागवतीयस्यास्य पद्यस्य सरणिमनुसरति–

धर्मं भजस्व सततं त्यज लोकधर्मान्
सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् ।
अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा
सेवाकथारसमहो नितरां पिब त्वम् ॥

(श्रीमद्भागवत-माहात्म्यम्, ५/८०)

१६. कायेऽस्थिमांसरुधिरेऽभिमतिं विमुञ्च
जायासुतादिषु मृषा ममतामपेहि ।
पश्यानिशं जगदिदं परिवृत्तिशीलं
तस्मादृताप्ति-नियतो भव सत्यनिष्ठ ! ॥

(सत्याग्रहनीति०, ५/१/१४)

अस्मिन् पद्ये श्रीमद्भागवतमाहात्म्यस्थस्यास्य पद्यस्य प्रभावोऽवलोकनीयोऽस्ति–

देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं
जायासुतादिषु सदा ममतां विमुञ्च ।
पश्यानिशं जगदिदं क्षणभङ्गनिष्ठं
वैराग्यरागरसिको भव भक्तिनिष्ठः ॥

(श्रीमद्भागवत-माहात्म्यम्, ५/७९)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
079678
0.79678

१७. पुण्योदयेन बहुजन्मसमर्जितेन सत्याप्तये किल यदा यतते ऽत्र धीरः।
अज्ञानहेतुकृतमोहमदान्धकारा नश्यन्ति तस्य हृदयाल्लभते च शर्म ॥
(सत्याग्रहनीति०, ५/१/२०)

अत्रापि पद्ये श्रीमद्भागवत-माहात्म्यस्थस्यास्य पद्यस्य पदानां प्रभूतः प्रभवोऽवलोक्यते–

भाग्योदयेन बहुजन्मसमर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः ॥
(श्रीमद्भागवतमाहात्म्यम्, २/७६)

१८. केचिद्वदन्ति धनहीनजनो जघन्यः केचिद्वदन्ति गुणहीनजनो जघन्यः ।
आनन्तरामिरसकृन्मतमेतदीर्त्ते सत्याग्रहेण रहितः पुरुषो जघन्यः ॥
(सत्याग्रहनीति०, ५/१/२१)

केचिद्वदन्ति मुनयो ग्रहचक्रमेतत् केचिद्वदन्ति सुधियो ग्रहचक्रमेतत् ।
नूनं वदामि बहुधा सुपरीक्ष्य चाहम् आचार-तप्त-जनुषः शुभ-भेषु जन्म ॥
(सत्याग्रहनीति०, ५/१/३०)

'केचिद्वदन्ती'ति वाक्यांशेन प्रारब्धयोरनयोः पद्ययोरुपरि अस्य पद्यस्य प्रभावो द्रष्टुं शक्यते–

केचिद्वदन्ति धनहीनजनो जघन्यः केचिद्वदन्ति गुणहीनजनो जघन्यः।
व्यासो वदत्यखिलवेदविशेषविज्ञो नारायणस्मरणहीनजनो जघन्यः ॥
(सुभाषितरत्न०, पृ० ३९२/२४२)

१९. वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति भृतका भ्रष्टश्रियं मन्त्रिणः
श्रद्धा-सत्य-मुचं नरस्य हृदयं देवोऽपि मुञ्चेन्न किम् ॥
(सत्याग्रहनीति०, ५/१/२३)

अस्य पद्यस्य पदशय्या अधोदत्तस्यास्य पद्यस्य पदशय्यामनुधावति–

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसा
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मन्त्रिणः ।
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः
सर्वः कार्यवशाज्जनोऽभिरमते तत्कस्य को वल्लभः ॥
(सुभाषितरत्न०, १८५/१०१३)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२०. न कश्चित् कस्यचिन्मित्रं न कश्चित्कस्यचिद् रिपुः ।
सत्यासत्यस्य वृत्तेन मित्रामित्र-समुद्भवः ॥
(सत्याग्रहनीति०, ५/१/२४)

अयं श्लोक इमं श्लोकमाधारीकृत्य विरचितोऽस्ति--

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
कारणेन हि (व्यवहारेण) जायन्ते मित्राणि रिपवस्तथा ॥
(सुभाषितरत्न०, १६७/३४६)

२१. यः प्रीणयेत्सुचरितैर्धरणीं स भक्तो यः संस्कृतिं वितनुयात्सरणौ स शूरः।
भाषां च यो व्यवहरेन्निजकां स वीरो भूषां निजां परिवसेत् सततं स धीरः॥
(सत्याग्रहनीति०, ५/४/१९)

'यः प्रीणयेत्सुचरितै'रितिपदैः प्रारब्धमिदं पद्यमिदं पद्यमनुसरति–

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते॥
(नीतिशतकम्, ६८)

२२. परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
वृथा कालो नीतो व्यपगमितमेतन्नृजननम् ।
प्रियालापा लब्धा न च सुखदसत्याग्रहकृतः
स्थितौ सत्यस्याहो क्वचिदपि न यत्नः कृत इति ॥
(सत्याग्रहनीति०, ३/३/२९)

अस्मिन् पद्ये भर्तृहरेरस्य श्लोकस्य प्रभावोऽवलोकयितुं शक्यते–

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणो
विभुक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते ॥
(वैराग्यशतकम्, ३२)

२३. कालो व्यतीतः स हि यौवनस्य यस्मिन् विकारान् समुपैति चेतः ।
नक्तं दिनं चार्जयतोऽर्थविद्यां सपर्यया तोषयतो गुरूंश्च ॥
(सत्याग्रहनीति०, २/४/२५)

इदं पद्यं भर्तृहरेरनेन पद्येनानुप्राणितमस्ति–

अतिक्रान्तः कालो लटभललनाभोगसुभगो
भ्रमन्तः श्रान्ताः स्मः सुचिरमिह संसारसरणौ ।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदानीं स्वःसिन्धोस्तटभुवि समाक्रन्दनगिरः
सुतारैः फूत्कारैः शिव शिव शिवेति प्रतनुमः ॥
(वैराग्यशतकम्, ३०)

एवमेवाधोदत्तानि पद्यान्यपि पूर्वकवीनां पद्यान्युपजीवन्ति, यथा–

२४. पादेनाहतमुत्थितं मृदु रजो नेत्रं नृणामन्धयेत्
भ्रातः पश्य दशां जडस्य भुवने चेष्टावतां का कथा ।
अत्याश्चर्यमिदं यदेति विनतिं पद्भ्यां मुहुर्घातितो
हन्तारं विमलैः सुबोधनपदैः सत्याग्रही बोधयन् ॥
(सत्याग्रहनीति०, १/४/११)

पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥
(शिशुपालवधम् २/४६)

२५. दुर्गमारण्यगिरिषु पशुभिः पक्षिभिः सह।
संवासः सुचिरं श्रेयान् न पुनर्दुष्ट-सङ्गमः ॥
(सत्याग्रहनीति० १/१/१८)

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥
(नीतिशतकम्, १४)

२६. रथः सिनं नुः पुरुषो नियन्ता खान्यश्वतुल्यानि मनश्च रश्मिः ।
बुद्धिः प्रणेत्री विषयाश्च मार्गाः सत्याग्रही संयमनाङ्कुशः स्यात् ॥
(सत्याग्रहनीति०, ४/४/१८)

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥
(कठोपनिषद्, १/३/३-४)

२७. व्यादायास्यं तु सिंहस्य दन्तान् सङ्कलयेत् क्वचित् ।
शक्नोति सत्पथं नेतुं कुटिलं नेह किञ्चन ॥
(सत्याग्रहनीति०, १/१/८)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरा-
त्समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम् ॥
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥
(नीतिशतकम्, ४)

२८. कदाचिद्यत्नतो मथ्नन् तोयात्स्नेहमवाप्नुयात्।
जिह्मं सत्पथि चानेतुं कृतो यत्नस्तु नश्यति ॥
(सत्याग्रहनीति०, १/१/९

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ॥
कदाचिदपि पर्यटञ्छशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥
(नीतिशतकम्, ५)

२९. रतिर्धर्मे न राष्ट्रस्य सेवायां नो रतं मनः ।
येषां ते वपुषो भारं वहन्तोऽटन्ति भूतले ॥
(सत्याग्रहनीति०, १/१/१७

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥
(नीतिशतकम्, १३)

३०. नैपुण्यं स्वजने दयां परिजने शाठ्यं शठे चान्वहं
प्रीतिं साधुजने नयं क्षितिपतौ विद्वज्जने चार्जवम् ।
शौर्यं शत्रुजने क्षमां लघुजने नारीजने संयमं
कुर्वन्तो विचरन्ति ये बुधवरास्तेष्वेव सत्यस्थितिः ॥
(सत्याग्रहनीति०, १/२/३७

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥
(नीतिशतकम्, २२)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३१. विकलः पुच्छशृङ्गाभ्यां ज्ञान-विज्ञानवर्जितः।
अन्नादः पशुवज्ज्ञेयो यो न धर्माय कल्पते ॥
(सत्याग्रहनीति०, १/१/१६)

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ॥
(नीतिशतकम्, १२)

३२. नूनं न ते कविवराः कविशब्दभाजो येषां मनांसि न रमन्त ऋताग्रहेषु ।
तस्माद्विशुद्धतमसत्यवचोऽनुनेतुं काव्यं प्रणीय जगतो हृदयं पुनन्तु ॥
(सत्याग्रहनीति०, ३/३/६)

नूनं हि ते कविवरा विपरीतबोधा ये नित्यमाहुरबला इति कामिनीनाम् ।
याभिर्विलोलतरतारकदृष्टिपातैः शक्रादयोऽपि विजितास्त्वबलाः कथं ताः॥
(शृङ्गारशतकम्, १०)

३३. सम्पत्सहायस्य नरस्य लोके भवन्ति मित्राणि सुखाशयानि ।
सन्मित्रसादृश्यमिहाशु लोकान् प्रख्यापयन्तः पुरतो भ्रमन्ति॥
हेयानि मित्राणि तु तादृशानि मित्रब्रुवाण्येव यतो भवन्ति।
चाटुत्वसन्दर्शनजो विकारस्तेषां स्वभूत्यर्थमिहाभ्युपैति ॥
(सत्याग्रहनीति०, ४/२/४-५)

साईं या संसार में, मतलब का व्यवहार ।
जब लगि पैसा गाँठ में तब लगि ताको यार ॥
तब ताको यार, यार सँग ही सँग डोलै ।
पैसा रहा न पास, यार मुख सौ नहिं बोलै ॥
कह गिरधर कविराय, जगत यहि लेखा भाई।
बिन बेगरजी प्रीत, यार बिरला कोउ साईं ॥
(गिरधर)

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः य स च पण्डितः ॥
(रामायणम्, हितोपदेशः)

३४. मित्रं विपत्तिं सहते दुरन्तामापद्गृहीतो व्यथते न किञ्चित् ।
ददाति वक्ति प्रकरोति सर्वं स्नेहातिरेकाद् वृणुते मृतिं च ॥
(सत्याग्रहनीति०, ४/२/७)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**पापान्निवारयति योजयते हिताय गुह्यानि गूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥**
(नीतिशतकम्, ७३)

एतेषु पद्येषु राजशेखरोक्तशब्दहरणार्थहरणयोरनेके भेदाः सुलभ्याः सन्ति। काव्यमीमांसाकारस्य दृष्टिः क्वचिदेतानि पद्यानि त्याज्यत्वेनोद्घोषयिष्यति क्वचिच्चानुग्राह्यत्वेन।क्वचित् सत्याग्रहनीतिकारं **'परोक्तिपाटच्चरतारतं'** (काव्यमीमांसा अ० १०) **'चौरं' 'भ्रामकं'** वा भणिष्यति, क्वचित्पुनस्तस्य कवित्वं स्वीकरिष्यति। तद्यथा– **'कालदिग्भि०'** (१) **'शमप्रधानैः०'** (३) **'अद्रेः शृङ्गं'** (४) **'नो यान्ति'** (६) **'यः प्रीणयेत्सुचरितैः'** (२१) **'पादेनाहतमुत्थितं'** (२४) प्रभृतीनि पद्यानि पदहरणस्य पदोपजीवनस्य वा; **'यावत्कार्यसहं भवेद्वपुरिदं यावच्च नैता जरा'** (९) पादहरणस्य पादोपजीवनस्य वा, **'किरातहूणान्ध्रपुलिन्दपुक्कसा आभीरकङ्का यवना खसादयः'** (२) अर्द्धहरणस्य, **'शमप्रधानैस्तपसातिदीप्तैः'** (३) व्यस्तार्धहरणस्य; **'सत्याग्रही सत्यपदं प्रपित्सुः'** (१२) **'वृष्यं पुष्टिदमायुष्यं'** (१३) प्रबन्धहरणस्य सकलोपजीवनस्य वा उदाहरणत्वेन ग्रहीतुं शक्यन्ते । **'संसारे मनुजाः'** (७) इत्यादिपद्यं समस्यापूर्तेरुदाहरणत्वेनापि ग्रहीतुं शक्यते।

एवमेवोद्धृतेष्वनुद्धृतेषु वा पद्येषु कविः क्वचिद् भ्रामकः, कवचिच्चुम्बकः, क्वचित्कर्षकः क्वचिच्च द्रावकः सन्नर्थहरणं छायोपजीवनं वा कुर्वन् द्रष्टुं शक्यते।

प्रतिबिम्बकल्पस्य छन्दोविनिमयाख्यो भेदः **'कुत्सेयुः कुशलाः'** (८) **'रथः सिंन नुः पुरुषो नियन्ता'** (२६) इत्यत्र, नटनेपथ्याख्यः **'सम्पत्सहायस्य** (३३) इत्यत्र, हेतुव्यत्ययाख्यो **'नो यान्ति सत्यनिभृते'** (६) इत्यत्र द्रष्टुं शक्यते। राजशेखरः प्रतिबिम्बकल्पमर्थहरणं वीक्ष्य भणिष्यति **'सोऽयं कवेरकवित्वदायी सर्वथा प्रतिबिम्बकल्पः परिहरणीयः'** (काव्यमीमांसा, १२) क्षेमेन्द्रश्च छायोपजीवनं कवित्वलाभाय अनुमंस्यते।

एष्वेवोदाहरणेषु आलेख्यप्रख्यस्य, तुल्यदेहितुल्यस्य परपुरप्रवेशप्रतिमस्याप्यर्थस्योदाहरणानि लब्धुं शक्यन्ते यानि उत्तरोत्तरं ग्राह्यत्वेन निर्दिश्यन्ते काव्यमीमांसकैः । **'क्वचिद्दण्डाघातः'** (१०) **'कदा सत्ये'** (११) इत्यत्र तुल्यदेहितुल्योऽर्थः साक्षात्कर्तुं शक्यते। काव्यमीमांसायां सुरानन्दस्य मतमुद्धरन् राजशेखरस्तुल्यदेहितुल्यमनुग्राह्यत्वेन निर्दिशति– **'सोऽयमुल्लेखवाननुग्राह्यो मार्ग'** इति सुरानन्दः। (काव्यमीमांसा, १३) । परपुरप्रवेशसदृशस्योदाहरणं **'सूनुः प्रियतमा स्वामी'** (५) त्यादिपद्ये द्रष्टुं शक्यते। अत्र **'पूर्वं सदृशः पश्चाद्भिन्नो जीवञ्जीवकः'** (काव्यमीमांसा, १३) इत्यतल्लक्षणात्मकः परपुरप्रवेशसदृशस्य जीवञ्जीवको नाम भेदोऽस्ति यो हि


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
काव्यशास्त्रिणां मतेन स्वागताहों भवति । अत्राद्ययोरनुष्टुभोः भर्तृहरेः **'सूनुः सच्चरितः'** इत्यादि पद्यस्य भावो यथावद् गृहीतः, अन्तिमे चानुष्टुभि भिन्नत्वेनोपसंहृतः। अत्र कवेर्द्रावकरूपं समुल्लसति यद्धि तस्य कवित्वं प्रतिष्ठापयति।

इत्थमुक्तेषूदाहरणेषु क्वचित्कवेर्मौलिकता दृश्यते क्वचिच्चार्थहरणं परोपजीवित्वं च सिद्ध्यति। इमं संवादं वा शब्दार्थहरणं वा उपजीवनं वाधिकृत्य सत्याग्रहनीतिकारः किं चिन्तयतीत्यप्यस्माभिरन्वेषणीयम् । २१.५.१९९६ ई० तारिकाया भिवान्यां देवसदने एतत्पंक्तिलेखकेन सह वार्तालापे यत् कविनोक्तं तस्य सार इत्थं प्रस्तोतुं शक्यते–

यथा हि कश्चित् पथिकः स्वलक्ष्यमाप्तुं पूर्ववर्तिभिः कृतं सेवितञ्च राजमार्गं बहुदूरं यावत्सेवते; स्वलक्ष्यमाप्तुं यदा स उचितं मनुते तदा तं राजमार्गं परित्यज्य अवान्तरं मार्गमुपमार्गं वा गृह्णाति, एवमेवायं कविः पूर्वकवीनामुक्तीः तदवधि विना परिवर्तनमनुहरति यदवधि तत्र परिवर्तनं नापेक्ष्यते। किन्तु यदा कविना तत्र किञ्चिन्नवीनं तत्त्वं संयोजयितुमिष्यते तदा स तत्र परिवर्तनं करोति। पूर्वकविभिर्यथानुभूतं तथैव पूर्वकवीनामुक्तीः स्वकाव्ये निदधता कविनाप्यनुभूतम्–इत्यस्ति कवेर्मतम् । यत्रांशे कवेरनुभूतिर्नवीना, तदनुसारमेव नवीनशब्दयोजना तेन कृता। उक्तं हि कविना आत्मनिवेदने–

**अन्तःसंवेद्यसद्भावैर्दुर्भावैर्माध्यमैश्च वा ।**
**आबालवृद्धलोकोऽयं काव्यं कायति सर्वदा ॥**
**अतस्त्वानन्त्यमापन्नाः कवीनां वाग्विभूतयः ।**
**एकोऽर्थस्त्वल्पभेदेन श्रुतौ गीतो यथासकृत् ॥**
**क्वचिद् दृश्येत चेत्साम्यं शब्दे भावे च प्राक्तनैः।**
**'तत्तथैवानुभूतं नो' ज्ञेयमत्र मनीषिभिः ॥**
**न चात्राभिनवं किञ्चिद् न चैवास्ति पुरातनम् ।**
**उक्ति-वैचित्र्य-सद्योगान्नूतनत्वाय कल्पते ॥**

(किञ्चिदात्मनिवेदनम्, ३-६)

कवेः पक्षत इदमपि केचिदाहुः–लभ्यन्ते बहून्येतादृशान्युदाहरणानि वेदेषु, पुराणेषु काव्येषु च। एक एव मन्त्रो मनाक्परिवर्तनेन ऋग्वेदेऽथर्ववेदे च मिलति। एक एव श्लोक उपनिषत्सु गीतायां च मनाक्परिवर्तनेन लभ्यते। **'प्रारभ्यते न खलु विघ्नभयेन नीचैः'** रित्यादिपद्यं मुद्राराक्षसे नीतिशतके च यथावत् लभ्यते। भासस्य पदावलीं कालिदासोऽनेकत्र गृह्णाति कालिदासस्य **'भवन्ति नम्रास्तरवः फलोद्गमैः'** रिति (अभिज्ञान० ५/१२) पद्यं भर्तृहरेर्नीतिशतके (७१) यथावत्


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्यते। बाणस्य पदावलीमर्थं च रविषेणोऽनेकत्रानुकरोति; अनेके कवयः मेघदूतस्य प्रत्येकं पादं समस्यापूरणाय प्रयुञ्जते। **'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनी'** त्यादि गीतायाः श्लोको रविषेणकृतपद्मपुराणेऽविकलरूपेण प्राप्यते। काव्यमीमांसा-कारोऽप्यनेकत्र पूर्वकवीननुहरति। कुर्वन्त्येव पूर्वकवीनामनुसरणं प्रायः परवर्तिनः कवयः। तदैव तु–

**अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।**
**वश्यश्च पुत्रोऽर्थकरी च विद्या षड्जीवलोकस्य सुखानि राजन् ॥**

इतीदं पद्यं दण्डनाथः स्व प्रयोजमनुरुद्ध्येत्थंरूपेण पुनर्वक्ति–

**वश्या सुता वृत्तिकरी च विद्या नीरोगता सज्जनसङ्गतिश्च ।**
**इष्टा च भार्या वशवर्तिनी च दुःखस्य मूलोद्धरणानि पञ्च ॥**

(सायण-संकलित-सुभाषितसुधानिधिः, पृ० १८३)

किञ्च, काव्यप्रकाश-दशरूपक-साहित्यदर्पणादीनां शास्त्रीयग्रन्थानां कारिकासु मनाक्परिवर्तनेन प्रायः पूर्वाचार्योक्ता शब्दावली एव अनुस्रियते। इत्थं पूर्वकवीनां पद्यानां सकलोपजीवनेऽपि का हानिः? का चोद्वेगजनकता?

अस्य तर्कस्य विपक्षेऽपि कश्चिदेवं ब्रूयात्–

कविर्यदि पूर्वकवीनां पद्यानि पूर्वकविप्रतिपादितार्थप्रस्तुत्यै यथावत् अनुकरोति तदा तस्य न मौलिकता, अपितु अनुकर्तृत्वमेव सिद्ध्यति। कविना हि स्वरचना करणीया भवति न तु पूर्वकवीनां पद्यानां दूरं यावदनुवर्तनम् । एतेनोपजीव्यकाव्यानां तुः शक्तिः सिद्ध्यति किन्तूपजीविनः कवेर्यशसो वृद्धिर्न भवति । यद्युपजीव्यपद्यानां त्रयः सार्धत्रया वा पादा कविनोद्ध्रियन्ते तर्हि तेन का तत्र प्रतिभा प्रकाशिता। यदि तेन पूर्वकवीनां पद्यानां सङ्कलनमक्रियत तर्हि **'तत्तथैवानुभूतं नो'** इत्युक्तेरौचित्यं स्यात् । अस्यां स्थितौ कविः पाठकों भावक एव स्यान्न तु रचनाकारः । कवेर्विविधकाव्यज्ञता तु अनुकर्तृत्वेऽपि सिद्ध्यत्येव।

अत्र प्रसङ्गेऽस्माभिरिदमवधेयं यत् **'सत्याग्रहनीतिकाव्यं'** श्रीसत्यदेववासिष्ठस्य 'प्रथमा रचनास्ति। काव्यप्रणयनकाले स सप्तविंशतिवर्षदेशीय आसीत्। भाग्यनगर (हैदराबाद) कारागारेऽस्य प्रथमं लेखनं तेन कृतम्, तदनु च चतुर्दशवर्षपर्यन्तं विद्वद्भिरिदं काव्यमीक्षितम्। कविनापि संशोधनं परिवर्धनं कृतम्। प्रतिसंस्करणमपि सहृदयसम्मतं संशोधनं तेन कृतं, यथा हि संसूच्यते तृतीयसंस्करणे पं० युधिष्ठिर-मीमांसकस्य वक्तव्येन। इतः पूर्वं तेन कस्यापि ग्रन्थस्य रचना नैव कृतासीत्। पं० केदारनाथसारस्वतः कवेः काव्यगुरुरासीत् यस्योपदेशानामपि काव्यपूर्त्तौ काचिद् भूमिकासीदिति कविना स्वयं सङ्केतितम्। (द्र० सत्याग्रहनीति० ५/४/३२) श्रीसारस्वतः


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**'सुप्रभात'**नाम्नः संस्कृत-पत्रस्य यशस्वी सम्पादक आसीत्। तेन राजशेखरकृतायाः **काव्यमीमांसाया** हिन्दी-भाषानुवादोऽपि कृतः, यस्य प्रकाशनं बिहार-राष्ट्रभाषा-परिषत्तः समभूत्। काव्यमीमांसायामेव तेन क्षेमेन्द्रो हेमचन्द्रश्चोद्धृतौ स्तः। अतः कवेः काव्यगुरोः काव्यभ्यासिने देयैरुपदेशैः परिचयः सिद्ध्यत्येव। तस्मादुपदेशं कविः कुत्र कदा वा लब्धवान्? अस्य प्रश्नस्य द्विधा उत्तरं दातुं शक्यते-(१) कारागारयात्रायाः पूर्वमेव, (२) कारागाराद्बहिरागत्य ग्रन्थप्रकाशनात्पूर्वं वा । काव्यं कर्तुं विचारयितुं च ये जानन्ति ते भवन्ति काव्यज्ञास्तेषां शिक्षया (उपदेशेन) काव्यरचनायां पौनःपुन्येन प्रवृत्तिरभ्यासः कथ्यते। मम्मटाचार्येण**'काव्यज्ञशिक्षयाभ्यासः'** इत्युक्तमस्ति (काव्यप्रकाशः, प्रथम उल्लासः)। हेमचन्द्राचार्येण **'काव्यानुशासने'** अभ्यासस्य क्रमः सविस्तरं प्रदर्शितः। **''काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरभ्यासः।''** (काव्यानुशासनम् १/९) एतत्सूत्रानन्तरं तेन शिक्षायाः स्वरूपं प्रदर्शितम्- **''शिक्षां लक्षयति-सतोऽप्यनिबन्धो नियमश्छायाद्युपजीवनादयश्च शिक्षा।''** अस्मिन् सूत्रे हेमचन्द्राचार्यः छायाद्युपजीवनमप्यभ्यासाङ्गत्वेन निर्दिशति। स लिखति-**''छायायाः प्रतिबिम्बकल्पतया आलेख्यप्रख्यतया तुल्यदेहितुल्यतया परपुरप्रवेशप्रतिमतया चोपजीवनम्, आदिशब्दात्पदपादादीनां च काव्यान्तराद्यथौचित्यमुपजीवनम्। पुनरादिपदात्समस्यापूरणाद्याः।''** (काव्यानुशासनम् १/१०) हेमचन्द्रः स्वोपज्ञविवेकटीकायां छायापदस्य अर्थरूपमर्थं करोति-**'छायाया अर्थादर्थस्य'** (तत्रैव विवेकटीकायाम्)। वस्तुतोऽत्र प्रसङ्गे विवेकटीकायां हेमचन्द्रो **राजशेखरकृतकाव्यमीमांसायाः क्षेमेन्द्रकृतकविकण्ठाभरणस्य** चोद्धरणानामेव प्राधान्येनोपजीवी लक्ष्यते। राजशेखरसम्मतस्य अर्थहरणस्य स **'छायोपजीवन'**मितीमां संज्ञां करोति। शब्दहरणस्य च पदोपजीवनं, पादोपजीवनं, पादद्वयोपजीवनं, पादत्रयोपजीवनं, पदैकदेशोपजीवनम्, उक्त्युपजीवनमित्यादीन्यभिधानानि स्वीकरोति। अभ्यासक्रमे स पादसमस्यायाः, पादद्वयसमस्यायाः, पादत्रयसमस्यायाश्च पूरणं, वाक्यार्थशून्य-वृत्ताभ्यासं, पुरातनवृत्तेषु पदपरावृत्त्याभ्यासञ्च परिगणयति। अतोऽग्रे स लिखति-**'एवं महाकाव्यार्थचर्वणपरकृतकाव्यपाठाद्याः शिक्षा अप्यूह्याः।'** (विवेकः १/१०) हेमचन्द्रो यथौचित्यमुपजीवनमेव अनुजानाति न तु पादचतुष्टयोपजीवनम्। स पादचतुष्टयोपजीवनं (सकलोपजीवनं) तु परिपूर्णं चौर्यमेव कथयति, अत एव तस्योदाहरणं 'विवेकटीकायां' न ददाति-**'पादचतुष्टयोपजीवने तु परिपूर्णं, चौर्यमेवेति न तन्निर्दिश्यते।'** (विवेकः १/१०) किन्तु क्षेमेन्द्रस्तु **'कविकण्ठाभरणे'** अभ्यासकर्तुः **'सकलोपजीविनं'** भेदमपि स्वीकरोति-


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'छायोपजीवी पदकोपजीवी पादोपजीवी सकलोपजीवी ।
भवेदथ प्राप्तकवित्वजीवी स्वोन्मेषतो वा भुवनोपजीव्यः ॥
(कविकण्ठाभरणम् २/१)

क्षेमेन्द्रेण कविकण्ठाभरणस्य प्रथमे सन्धौ अकवेः कवित्वशक्तिरुपदिष्टा– **'प्रथमं तावद्दिव्यः प्रयत्नः, ततः पौरुषः।'** दिव्यः प्रयत्नः सरस्वतीसमाराधनात्मकः। पौरुषश्च गुरूपदेशादभ्यास एव। स लिखति– **'अथ पौरुषः। तत्र त्रयः शिष्याः काव्यक्रियायामुपदेश्याः। अल्पप्रयत्नसाध्यः, कृच्छ्रसाध्यः, असाध्यश्चेति।'** (कविकण्ठाभरणम्, १/१४) कृच्छ्रसाध्यस्य शिष्यस्य कृते स इममभ्यासक्रममुपदिशति–

**पठेत्समस्तान्किल कालिदासकृतप्रबन्धानितिहासदर्शी ।
काव्याधिवासप्रथमोद्गमस्य रक्षेत्पुरस्तार्किकगन्धमुग्रम् ॥
महाकवेः काव्यनवक्रियायै तदेकचित्तः परिचारकः स्यात् ।
पदे च पादे च पदावशेषसम्पूरणेच्छां मुहुराददीत ॥
अभ्यासेहेतोः पदसंनिवेशैर्वाक्यार्थशून्यैर्विदधीत वृत्तम् ।
श्लोकं परावृत्तिपदैः पुराणं यथास्थितार्थं परिपूरयेच्च ॥''**
(कविकण्ठाभरणम् १/१९-२१)

क्षेमेन्द्रेणापर्युक्तानां काव्यरचनाभ्यासोपक्रमाणामुदाहरणान्यपि दत्तानि। स पुराणश्लोकस्य परावृत्तिपदैः पूरणमित्थमुदाहरति

**परावृत्तिपदैर्यथा–**

**'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥'
'वाण्यर्थाविव संयुक्तौ वाण्यर्थप्रतिपत्तये।
जगतो जनकौ वन्दे शर्वाणीशशिशेखरौ ॥'**

द्वितीये सन्धौ क्षेमेन्द्रश्छायोपजीविनः, पदकोपजीविनः, पादोपजीविनः सकलोपजीविनश्च उदाहरणानि ददाति। एवंप्रकारकाण्यनेकान्युदाहरणानि 'सत्याग्रहनीतिकाव्ये'ऽप्युपलभ्यन्ते यानि कवेरभ्यासकालिकतां द्योतयन्ति। सम्भाव्यते यदेवम्प्रकारकस्य काव्यरचनाभ्यासस्योपदेशः कवेः काव्यगुरुणा श्रीकेदारनाथसारस्वतमहाभागेन कृतो भवेत्। तदनुसारं काव्यरचनायाः प्रारम्भिक्यामवस्थायां सत्याग्रहनीतिकारेण एवम्प्रकारकाणि पद्यानि रचितानि स्युः–

**किरातहूणान्ध्रपुलिन्दपुक्कसा आभीरकङ्का यवनाः खसादयः ।
अन्ये च पापा ऋतधारणाश्रयाद्विशुद्धिमाप्ता ऋतपाय ते नमः ॥**
(सत्याग्रहनीतिकाव्यम्, मङ्गलाचरणम्, ७)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्यमिदं श्रीमद्भागवतीयस्यास्य पद्यस्योपजीवि–

**किरातहूणान्ध्रपुलिन्दपुक्कसा आभीरकङ्का यवनाः खसादयः ।**
**येऽन्ये च पापा यदुपाश्रयाश्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ॥**

(श्रीमद्भागवतम्, २/४/१८)

'सत्याग्रहनीतिकाव्यस्य' उपर्युद्धृतं पद्यं श्रीमद्भागवतीये पद्ये कतिपयपदपरावृत्त्या रचितम्। किञ्चात्र रचनाकर्तुः सकलोपजीविप्रायत्वं स्पष्टं विलोक्यते। भागवतीयपद्यस्य पादद्वयं तु यथावदत्र गृहीतम्। **'येऽन्ये'** इत्यस्य स्थाने **'अन्ये'** इति पदं प्रयुक्तम्। **'यदुपाश्रयाश्रयात्'** इत्यस्य स्थाने **'ऋतधारणाश्रयात्'** इत्येतत्पदं न्यस्तम्। **'शुद्ध्यन्ति'** इत्येकपदस्य **'विशुद्धिमाप्ता'**–इत्यनेन पदद्वयेन परिवर्तनं कृतम्। **'तस्मै प्रभविष्णवे नमः'** अस्य वाक्यखण्डस्य स्थाने **'ऋतपाय ते नमः'** इतिवाक्यखण्डः परिवर्तितः।

यथा वा–

**केचिद्वदन्ति धनहीनजनो जघन्यः केचिद्वदन्ति गुणहीनजनो जघन्यः।**
**आनन्तरामिरसकृन्मतमेतदीर्त्ते सत्याग्रहेण रहितः पुरुषो जघन्यः ॥**

(सत्याग्रहनीति०, ५/१/२१)

अस्य पद्यस्योपजीव्यं पद्यमिदमस्ति–

**केचिद्वदन्ति धनहीनजनो जघन्यः केचिद्वदन्ति गुणहीनजनो जघन्यः।**
**व्यासो वदत्यखिलवेदविशेषविज्ञो नारायणस्मरणहीनजनो जघन्यः ॥**

(सुभाषितरत्नभाण्डागारम् पृ०३९२/२४२, पाठा., व्यासो वदत्यखिलशास्त्रपुराणवेत्ता)

अस्य पद्यस्य प्रथमद्वितीयौ चरणौ कविना यथावद्गृहीतौ । तृतीये चरणे यथोपजीव्यपद्ये प्रथमपुरुषक्रियया वाक्यविन्यासः कृतस्तथैवोपजीविना कविनाऽपि प्रथमपुरुषव्याहारः कृतः। **'नारायणस्मरणहीनजनो'** इत्यस्य स्थाने **'सत्याग्रहेण रहितः पुरुषः'** इति वाक्यांशं संस्थाप्य **'जघन्य'** इति पदेन पद्यस्य समाप्तिः कृता।

शेषेषूदाहरणेष्वपि समीक्षकैः सत्याग्रहनीतिकाव्यकारस्य पूर्वकविपद्योपजीवनं स्वयं विवेचनीयम्। एतादृशपद्येषु कविः सत्यदेवो वासिष्ठः 'कृच्छ्रसाध्यः शिष्य' इव पदानुजीवी, पादानुजीवी सकलानुजीवी च दृश्यते। एतादृशानि पद्यानि, राजशेखरसदृशानां काव्यशास्त्रिणां मतेन न भवन्ति प्रायः कवेर्यशसः प्रकाशकानि । एतादृशानि स्थलानि वीक्ष्य कश्चिदिमां राजशेखरोक्तिं पुनरुपस्थापयितुं यदि समुत्सहेत


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्हि तस्य जिह्वां कीलयितुं न कोऽपि प्रभवेत्–

**पुंसः कालातिपातेन चौर्यमन्यद्विशीर्यते ।**
**अपि पुत्रेषु पौत्रषु वाक्चौर्यं न च शीर्यति ॥**

(काव्यमीमांसा, अ० ११)

सरस्वतीकण्ठाभरणस्य 'रत्नदर्पणा'ख्याया व्याख्यायाः कर्तुः रत्नेश्वरस्य मतेन तु अन्योक्तीनामनुकृतिश्छायालङ्कारपदेनोच्यते । स लिखति–'**अत्र केचिदन्यच्छायायोनिजमपि काव्यं छायालङ्कारव्यवहारभूमिमाहु**' रिति । तन्मते '**लोके बिम्बप्रतिबिम्बयोः प्रतिबिम्बं चमत्कारितया प्रसिद्धम् ।**' अतस्तन्मते पूर्वकविप्रणीतकाव्यानामनुकरणमलङ्कारत्वमेव बिभर्ति न तु दोषत्वम् । (द्र० सरस्वतीकण्ठाभरणम् २/३९, रत्नदर्पण-व्याख्या)

सत्याग्रहनीतिकाव्यस्यानेकेषु पद्येषु सत्यपि संवादे, हरणे उपजीवने वा सत्याग्रहनीतिकाव्यस्य स्वारस्यमनेकत्र प्रत्यक्षीकर्तुं शक्यते । राष्ट्रियभावनाभरितेऽस्मिन् काव्ये सप्तविंशतिवर्षदेशीयः कविः स्वदेशोद्धाराय जनान् प्रेरयति । स्वातन्त्र्यलाभाय स सत्याग्रहस्यावश्यकतां निरूपयति । यत्र स विप्रान्, क्षत्रियान्, वैश्यान्, पृथुधियः कवीन्, उपदेशकान्, विदुषः, साधून्, धीरान्, सुहृदः, सङ्गीतज्ञान्, मल्लान्, तरुणान् यौवनाहङ्कृतान्, सामान्यान्, मूर्खान्, दुराग्रहिणः, ईर्ष्यालून् सत्याग्रहिणश्च स्वेन स्वेन कर्मणा देशोद्धारार्थं प्रयतितुं प्रबोधयति तत्र तस्य सहजभावानामुच्छलनं साक्षात्कर्तुं शक्यते । दिङ्मात्रमुदाह्रियते । पृथुधियः प्रति कविर्भणति–

**नित्यं राष्ट्रविवृद्धये पृथुधियः ! क्षेत्रेषु मोदान्विताः**
**श्रान्त्वा धान्यसमृद्धिमेव बहुलां संवर्धयन्तां चिरम् ।**
**यन्त्राणामपि चालनं विविधविज्ञानस्य संशिक्षणं**
**लब्ध्वा देशहिताय चात्र सुहृदः! सत्याप्तये युद्ध्यताम् ॥**

(सत्याग्रहनीति० ३/४/४)

कवीन् प्रति कवेरुक्तिस्तस्य मौलिकदृष्टिं सङ्केतयति–

**किं कर्तुं कवयो न वोऽत्र सुशकाः काव्यायुधस्येहया ?**
**धिग् वो धिक् कविता यदि स्थ पतिताः शृङ्गारकूपेऽन्धवत् ।**
**उद्बुध्यात्मयशोऽन्विताः सुकविताः सत्याग्रहे योज्यताम् ।**
**काव्यं सर्वमनोऽभिसारि वदत प्रेर्येत सत्ये च यत् ॥**

(सत्याग्रहनीति०, ३/३/५)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविना सितारवादनमपि शिक्षितम् । सः व्यर्थगीतानि परिहृत्य भैषज्यवेदानुगाम् (अथर्ववेदीयराष्ट्रसूक्तोक्तां) गीतिं ससङ्गीतं गातुं सङ्गीतज्ञान् प्रेरयति-

**सङ्गीतं जगतो मनोऽभिरमणं तुष्ट्यै भुवि भ्रातरः**
**शिष्यान् शिक्षयतानिशं च नवका तन्त्र्याहतिः श्राव्यताम् ।**
**त्यक्त्वा रासभवन्निनादभणितिं गाताग्रहे धैर्यदां**
**मोहाबद्धहृदां विकारशमनीं भैषज्यवेदानुगाम् ॥**

(सत्याग्रहनीतिः, ३/३/१३)

कविः पराधीनजातेरवस्थावर्णने या मार्मिकोक्तीः समुद्गिरति तत्र तस्य राष्ट्रप्रेमा, स्वातन्त्र्यलाभेच्छा, सत्याग्रहं प्रत्युत्साहश्च सहजतया समुच्छलति । लोकमान्यबालगङ्गाधरतिलकस्य **'स्वातन्त्र्यं मम जन्मसिद्धोऽधिकार'** इत्यस्मिन् वाक्ये निष्ठां दधानः कविर्जनान् स्वातन्त्र्यलाभाय सत्याग्रहं सेवितुं प्रेरयति-

**स्वातन्त्र्यं निजजन्मसिद्धमखिलं प्रेष्ठं विधायात्मना**
**धैर्यक्षान्तिसमन्विताः सुमनुजाः ! सत्याग्रहः सेव्यताम् ॥**

(सत्याग्रहनीतिः, २/१/१५)

काव्येऽनेकत्र वर्णनकौशलमपि कवेर्मौलिकतां पिशुनयति । तृतीयाध्याये सत्याग्रहिणामुत्साहपूर्वकं गमनस्य, पौराणां च तैः साकं प्रदर्शनरूपतामुपागतस्य समूहगमनस्य यथा कविना वर्णनं कृतं तत्तु सत्याग्रहयात्रायाश्चित्रमिवाक्ष्णोः पुरः समुपस्थापयति । प्रसादगुणोपेता शब्दावली, स्वभावोक्तेर्विच्छित्तिः, धर्मवीरो रसः, रचनाकर्तुश्च तत्रोपस्थितिः- सर्वमपि सम्मिल्य रमणीयमुत्साहोत्सवं चक्षुषोः पुरस्तादुपस्थापयति । रथस्य, बलीवर्दयोः, खड्गधारिणोरश्वारोहिणोः, ध्वजवाहिनां, जयघोषिणां बालानां तरुणानां किञ्च वृद्धानाम्, ओ३मङ्कितकेतुवाहकस्य नेतुः सत्याग्रहिणां 'मार्ले'-ग्रामाप्तेः, पेनगङ्गायां जलपानस्य, स्नानस्य, तरणस्य तथा जलविनोदस्य, समूहिकभोजनस्य सत्याग्रहिणामग्रे प्रयाणस्य च यथा प्रत्यक्षपश्येन वर्णनं कविना विहितं तत्र सहृदयानां मनांसि द्रागेव मज्जन्ति । कवेर्मौलिकता नूनमत्र समुल्लसति । अग्रोनिरत्रार्थः । दिङ्मात्रमुदाह्रियतेः

रथवर्णनम्-

**रथः सुपुष्पैस्तरु - पर्ण - रम्यैरलङ्कृतः सन्मनुजैर्वरिष्ठैः ।**
**'ओ३म्' केतुनाऽगात् सुषमां विशिष्टां द्वाभ्यां बभासे पृथगासनाभ्याम् ॥**


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलीवर्दनिरूपणम्-

प्रियौ युवानौ वपुषा बलिष्ठौ गत्या विशिष्टौ ककुदा सुरूपौ ।
केनापि विज्ञेन सुशिक्षितौ तौ शोभामधृष्यां ययतू रथोढौ ॥

रथगमनम्-

सितारुणौ श्रेष्ठतमौ प्रसन्नौ रथं बलीवर्दवरौ प्रणुत्तौ ।
शुभेक्षणावूहतुरप्रमत्तौ यतिः स्थितो यत्र वनी च मुख्यः ॥
तस्याग्रतः खड्गविभूषिताङ्गौ यातो हयाभ्यां धवलारुणाभ्याम् ।
श्वेताश्वपृष्ठे व्यलसद् युवैकः शोणाश्वपृष्ठे व्यलसच्च वृद्धः ॥
बालाः युवानः किमु वापि वृद्धा हर्षान्विताः स्फूर्तिभरं प्रपन्नाः ।
चेलुस्तदान्योन्यपुरः पुरस्तात् केतून् समुन्नीय जयान् ब्रुवन्तः ॥
पुष्पाणि पौरा ववृषुस्तदानीं समूह्य वाद्यं जयमुत्समीर्य ।
दृष्ट्वाद्भुतं दृश्यमदृष्टपूर्वं प्रावेश्य सीमां स्वगृहान् प्रतीयुः ॥

(सत्याग्रहनीति०, ३/४/२०-२८)

एवंविधेषु स्थलेषु सत्याग्रहनीतिकारो न कमपि पूर्वकविमनुसरति अपितु तस्य वाग्धारा राष्ट्रियभावनया समृद्धा सती अपूर्वामेव काञ्चिद्विच्छित्तिं तनोति।

## सत्याग्रहनीतिकाव्ये कवेरायुर्वेदज्ञतायाः प्रतिफलनम्

मम्मटादिभिः काव्यशास्त्रिभिः काव्यहेतु-प्रतिपादनप्रसङ्गे लोकशास्त्र-काव्याद्यवेक्षणाद् व्युत्पत्तिरुपदिष्टा। लोकस्य प्रत्यक्षदर्शनात् महाकविसम्बन्धिनां काव्यानां पाठात् विविधशास्त्राणामभ्यासाच्च कवेः प्रतिभा समृद्धिं भजते; कवौ कविकर्मनैपुणी आविर्भवति। सत्याग्रहनीतिकार आयुर्वेदशास्त्रस्य विश्रुतो विद्वानस्ति। तस्य शास्त्रज्ञताया अस्मिन् काव्ये यदि प्रतिफलनं भवति, तर्हि स्वाभाविकमेव।

पञ्चमाध्यायस्य तृतीये पादे कविना **'ऋतुचर्या'** वर्णिता यत्र चरकस्य सुश्रुतस्य च प्रभावः स्पष्टतयावलोक्यते। कवेरयं विशेषो यत्तेन चरकसंहितातः केवलं शाकाहारिणामेव ऋतुचर्या स्वपद्येषु पुनरुपस्थापिता। एतेन कवेः शाकाहारं प्रति पक्षपातः सुतरां सिद्ध्यति। किञ्च, ब्रह्मचारित्वात् कविः स्त्रीप्रसङ्गस्य चर्चां परिहरति। तेन छन्दोविनिमयेनात्र प्रसङ्गे काचिद्रमणीयताऽपि संयोजिता। अनुष्टुब्वृत्तोक्ता ऋतुचर्या तेन शार्दूलविक्रीडितवृत्तेषु संक्षिप्य प्रस्तुता; उदाहरणार्थम्-


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. हेमन्तचर्या

तस्मात्तुषारसमये स्निग्धाम्ललवणान् रसान् ।
औदकानूपमांसानां मेद्यानामुपयोजयेत् ॥
विलेशयानां मांसानि प्रसहानां भृतानि च ।
भक्षयेन्मदिरां शीधुं मधु चानुपिबेन्नरः ॥
गोरसानिक्षुविकृतीर्वसां तैलं नवौदनम् ।
हेमन्तेऽभ्यस्यतस्तोयमुष्णं चायुर्न हीयते ॥
अभ्यङ्गोत्सादनं मूर्ध्नि तैलं जेन्ताकमातपम् ।
भजेद्भूमिगृहं चोष्णमुष्णं गर्भगृहं तथा ॥
शीतेषु संवृतं सेव्यं यानं शयनमासनम् ।
प्रावाराजिनकौशेयप्रवेणीकुथकास्तृतम् ॥
गुरूष्णवासा दिग्धाङ्गो गुरुणाऽगुरुणा सदा ।
शयने प्रमदां पीनां विशालोपचितस्तनीम् ॥
आलिङ्ग्यागुरुदिग्धाङ्गीं सुप्यात्समदमन्मथः ।
प्रकामं च निषेवेत मैथुनं शिशिरागमे ॥
वर्जयेदन्नपानानि वातलानि लघूनि च ।
प्रवातं प्रमिताहारमुदमन्थं हिमागमे ॥

(चरकसंहिता, सूत्रस्थानम् ६/११–१८)

हेमन्ते

प्रातर्भोजनमम्ल-मिष्ट-लवणानभ्यङ्ग-घर्म-श्रमान्
गोधूमैक्षव-शालि-माष-लशुनं पिष्टं नवान्नं तिलान् ।
कस्तूरी-वरकुङ्कुमागरुयुतामुष्णाम्बुशौचेऽनलं
स्निग्धं स्त्रीषु मितो गुरूष्णवसनं सेवेत हैमन्तिके ॥
वर्जयेदन्नपानं तद्वातलं लघु यद्भवेत् ।
प्राग्वातं प्रमिताहारमुदमन्थं च हैमने ॥

(सत्याग्रहनीति॰, ५/३/१-२)

२. हेमन्तशिशिरौ तुल्यौ शिशिरेऽल्पं विशेषणम् ।
रौक्ष्यमादानजं शीतं मेघमारुतवर्षजम् ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद्धैमन्तिकः सर्वः शिशिरे विधिरिष्यते ।
निवातमुष्णं त्वधिकं शिशिरे गृहमाश्रयेत् ॥
(चरकसंहिता, सूत्रस्थानम्, ६/१९-२०

शिशिरे

हिमोक्तपथ्यं शिशिरेऽपि पथ्यं विशेषतो रौक्ष्यमिहास्त्यपथ्यम् ।
निवातमुष्णं गृहमन्तरङ्गं नृभिः प्रयत्नेन निषेवणीयम् ॥
(सत्याग्रहनीति०, ५/३/३

३. वसन्तर्तुचर्या

वसन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥
तस्माद्वसन्ते कर्माणि वमनादीनि कारयेत् ।
गुर्वम्लस्निग्धमधुरं दिवास्वप्नं च वर्जयेत् ॥
व्यायामोद्वर्तनं धूमं कवलग्रहमञ्जनम् ।
सुखाम्बुना शौचविधिं शीलयेत्कुसुमागमे ॥
चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ।
शारभं शाशमैणेयं मांसं लावकपिञ्जलम् ॥
भक्षयेन्निर्गदं सीधु पिबेन्माध्वीकमेव वा ।
वसन्तेऽनुभवेत्स्त्रीणां काननानां च यौवनम् ।
(चरक० सूत्रस्थानम्, ६/२१-२६

वसन्ते

वान्तिं नस्यमथाभयां च मधुना व्यायाममुद्वर्तनं
ना सेवेत मधौ कफघ्नकवलं शाकानि पत्रैर्विना ।
गोधूमांश्चणकान् सुशालि-तुवरीं मुद्गान् यवान् धूम्रकान्
लेपं चन्दन-कुङ्कुमागरुयुतं रूक्षणं कटूष्णं लघु ॥
(सत्याग्रहनीति० ५/३/४

४. ग्रीष्मर्तुचर्या

मयूखैर्जगतः स्नेहं ग्रीष्मे पेपीयते रविः ।
स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितम् ॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीतं सशर्करं मन्थं जाङ्गलान्मृगपक्षिणः ।
घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति ॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम् ।
लवणाम्लकटूष्णानि व्यायामं चात्र वर्जयेत् ॥
दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतले ।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके ॥
व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः ।
सेव्यमानो भेजदास्यां मुक्तामणिविभूषितः ॥
काननानि च शीतानि जलानि कुसुमानि च ।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः ॥

(चरकसंहिता, सूत्रस्थानम्, ६/२७-३२)

गीष्मे

स्वादुस्निग्ध-हिमं लघु द्रवमयं लेह्यं रसालां सितां,
सक्तु-क्षीर-शतावरीं गुरुवचो वातं तु लूकां विना ।
शीतांशुं शयनं दिने मलयजं शीतं पयः पानकं
सेवेतोष्ण-दिने त्यजेच्च कटुकं क्षाराम्लघर्मश्रमान् ॥

(सत्याग्रहनीति०, ५/३/५)

५. वर्षर्तुचर्या

आदानदुर्बले देहे पक्ता भवति दुर्बलः ।
स वर्षास्वनिलादीनां दूषणैर्बाध्यते पुनः ॥
भूबाष्पान्मेघनिस्यन्दात् पाकादम्लाज्जलस्य च ।
वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः ॥
तस्मात्साधारणः सर्वो विधिर्वर्षासु शस्यते ।
उदमन्थं दिवास्वप्नमवश्यायं नदीजलम् ॥
व्यायाममातपं चैव व्यवायं चात्र वर्जयेत् ।
व्यक्ताम्ललवणस्नेहं वातवर्षाकुलेऽहनि ।
विशेषशीते भोक्तव्यं वर्षास्वनिलशान्तये ॥
अग्निसंरक्षणवता यवगोधूमशालयः ।
पुराणा जाङ्गलैर्मांसैर्भोज्या यूषैश्च संस्कृतैः ॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिबेत् क्षौद्रान्वितं चाल्प माध्वीकारिष्टमम्बु वा ।
माहेन्द्रं तप्तशीतं वा कौपं सारसमेव वा ॥
प्रघर्षोद्वर्तनस्नानगन्धमाल्यपरो भवेत् ।
लघुशुद्धाम्बरः स्थानं भजेदक्लेदि वार्षिकम् ॥

(चरकसंहिता, सूत्रस्थानम् ६/३३-४८)

वर्षा

स्नानं स्वच्छपटं स्त्रजं परिवहेद् गोधूमशाली जमेत्
जह्यान्ना सरिताजलं च दिवस-स्वापं मरुत्पूर्वजम् ।
शाकं पत्रमयं श्रमं प्रकुपिता वाचो हिमं नागरं
वर्षर्तौ विकृतं मनोऽवसदनावश्यायमीदृक् च यत् ॥
भू-बाष्पादथ निःस्वनाज्जलमुचामम्लेऽन्नपाके जले
क्षीणे चाग्निबले भवन्ति कुपिता वातादयो दूषकाः ।
व्यक्ताम्लं लवणं मरुत्प्रशमनं तेलान्वितं चाशनं
सेव्यं दीपन-पाचनं लघु च यत् कौपं जलं स्वश्च्युतम् ॥

(सत्याग्रहनीति०, ५/३/११-१२)

६. शरच्चर्या

वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः ।
तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति ॥
तत्रान्नपानं मधुरं लघु शीतं सतिक्तकम् ।
पित्तप्रशमनं सेव्यं मात्रया सुप्रकांक्षितैः ॥
लावान् कपिञ्जलानेणानुरभ्राञ्छरभाञ्छशान् ।
शालीन् सयवगोधूमान् सेव्यानाहुर्घनात्यये ॥
तिक्तस्य सर्पिषः पानं विरेको रक्तमोक्षणम् ॥
धाराधरातयये कार्यमातपस्य च वर्जनम् ।
वसां तैलमवश्यायमौदकानूपमामिषम् ॥
क्षारं दधि दिवास्वप्नं प्राग्वातं चात्र वर्जयेत् ।
दिवा सूर्यांशुसंतप्तं निशि चन्द्रांशुशीतलम् ॥
कालेन पक्वं निर्दोषमगस्त्येनाविषीकृतम् ।
हंसोदकमिति ख्यातं शारदं विमलं शुचि ॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नानपानावगाहेषु शस्यते तद्यथाऽमृतम् ।
शारदानि च माल्यानि वासांसि विमलानि च ॥
शरत्काले प्रशस्यन्ते प्रदोषे चेन्दुरश्मयः ॥
(चरक०, सूत्रस्थानम् ६/४१-४८)

सेव्याः शरदि यत्नेन कषायस्वादुतिक्तकाः ।
क्षीरेक्षुविकृतिक्षौद्रशालिमुद्गादिजाङ्गलाः ॥
श्वेतस्त्रजश्चन्द्रपादाः प्रदोषे लघु चाम्बरम् ।
सलिलं च प्रसन्नत्वात् सर्वमेव तदा हितम् ॥
सरःस्वाप्लवनं चैव कमलोत्पलशालिषु ।
प्रदोषे शशिनः पादाश्चन्दनं चानुलेपनम् ॥
तिक्तस्य सर्पिषः पानैरसृक्स्त्रावैश्च युक्तितः ।
वर्षासूपचितं पित्तं हरेच्चापि विरेचनैः ॥
नोपेयात्तीक्ष्णमम्लोष्णं क्षारं स्वप्नं दिवाऽऽतपम् ।
रात्रौ जागरणं चैव मैथुनं चापि वर्जयेत् ॥
स्वादुशीतजलं मेध्यं शुचिस्फटिकनिर्मलम् ।
शरच्चन्द्रांशुनिर्धौतमगस्त्योदयनिर्विषम् ॥
प्रसन्नत्वाच्च सलिलं सर्वमेव तदा हितम् ।
सचन्दनं सकर्पूरं वासश्चामलिनं लघु ॥
भजेच्च शारदं माल्यं सीधोः पानं च युक्तितः ।
पित्तप्रशमनं यच्च तच्च सर्वं समाचरेत् ॥
(सुश्रुत., उ.अ. ६४)

शरत्

सर्पिःस्वादुकषायतिक्तकरसा यच्छीतलं यल्लघु
क्षीरं स्वच्छ-सितेक्षवः पटुरसः स्वल्पो मृदुः क्लेदहा ।
गोधूमा यवमुद्गशालिसहिता नादेयमंशूदकं
चन्द्रश्चन्दनमिन्दुराजिरजनी माल्यं पटं निर्मलम् ॥
विश्रान्तिः सुहृदां गणेषु सरसा वाचः सरःक्रीडनं
पित्तानां च विरेचनं बलवतो युक्तं शिरामोक्षणम् ।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतान्यत्र घनावसानसमये पथ्यानि, मुञ्चेद् दीर्घ-
व्यायामाम्ल-कटूष्ण-तीक्ष्ण-दिवसस्वप्नं हिमञ्चातपम् ॥
(सत्याग्रहनीति० ५/३/१३-१४

७. ऋतोरन्त्यादिसप्ताहस्वृतुसन्धिरिति स्मृतः ।
तत्र पूर्वो विधिस्त्याज्यः सेवनीयोऽपरः क्रमात् ॥
(वाग्भटः, अष्टाङ्गहृदयसूत्रम्, अ. ३

ऋतोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः ।
तत्र पूर्वो विधिस्त्याज्यः सेवनीयः परः क्रमः ॥
(सत्याग्रहनीति० ५/३/१५

पञ्चमाध्यायस्य **'परमायुषीय'**नाम्नि द्वितीये पादे कविना स्वस्थवृत्तस्य च विहिता यत्रायुर्वेदशास्त्रज्ञता कवेः प्रतिफलिता दृश्यते। यतो हि कविरायुर्वेदज्ञोऽस्ति तस्माद्दीर्घजीवनलाभाय नियमानां कथनस्यौचित्यं तेन प्रतिपाद्यते–

जीवन्ना परमायुरेतु सबलः सत्त्वात्मदेहान्वित-
स्तस्माद्वक्तुमिहार्हते नयवचो नानाविधं तद्विदा ।
ज्ञात्वा यत्सुखसम्पदा च सहिताः स्वस्था भवेयुर्नराः
स्वास्थ्यायालमिहास्ति वृत्तमुदितं पाल्यं नरैः सर्वदा ॥
(सत्याग्रहनीति० ५/२/१

कः पुनः स्वस्थः? कविरत्र स्वमतमुपस्थापयति–यो नाम रोगैः रिपुभिश्च हीनः साध्व्या श्रिया च सदा युक्तः स्यात्स एव स्वस्थः (सुस्थः)--**"रोगैर्विहीनं रिपुभिश्च हीनं श्रिया च साध्व्या सततं समेतम्। श्रीकृष्णपौत्रः किल सुस्थमीर्ते"**
(सत्याग्रहनीति० ५/२/४

विद्यार्थिनां कृते ब्रह्मचर्यपालनस्यावश्यकतां कविर्निरूपयति। स हि 'सहशिक्षा' न समर्थयते। सत्याग्रहिणं लक्ष्यीकृत्य स नित्यकर्माभिदधाति यत्र ब्राह्ममुहूर्ते शय्यात्यागस्य, **'प्रातरग्निं हवामहे'** इत्यादिसूक्त-जापस्य, शरीरशुद्धेः, व्यायामस्य सन्ध्योपासनस्याग्निहोत्रादेश्चावश्यकतां निरूपयति । तदनु व्यासतो नित्यकर्माभिदधाति यत्रोषःपानस्य, दन्तधावनस्य जिह्वाशोधनस्य, मुखशुद्धेः, गण्डूषधारणस्य शिरसि तैलमर्दनस्य, कर्णतर्पणस्य, पादाभ्यङ्गस्य, शरीराभ्यङ्गस्य, स्नानस्य अनुलेपनस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
वस्त्रस्य, स्रगादिधारणस्य, पादयोर्मलमार्गाणां च पौनःपुन्येन प्रक्षालनस्य, केशप्रसाधनस्य, पादत्रच्छत्रदण्डधारणस्य व्यायामस्य च महत्त्वं प्रतिपादयति। सम्पूर्णेऽप्यध्याये कवेरायुर्वेदज्ञानं प्रतिबिम्बतमस्ति। कविः प्राधान्यतः चरकसुश्रुतवाग्भटानुपजीवति। अग्रे कतिपयान्युदाहरणानि दीयन्ते, यत्र पूर्वं सत्याग्रहनीतिकाव्यस्य तदनु चोपजीव्यस्य ग्रन्थस्य पद्यानि प्रस्तूयन्ते। एतान्युद्धरणानि तुलनात्मकाध्ययनकृते उपकारीणि स्युः। तद्यथा–

१. नव्यं क्लिन्नं सुशाखाग्रं कषायकटुतिक्तकम्।
दन्तपूतिं जमेत् प्रातर्दन्तमांसान्यबाधयन्॥
निहन्ति गन्धवैरस्यं जिह्वादन्तास्यजं मलम्।
दन्तपूतिमपाकृष्य रुच्युत्साहौ प्रयच्छति॥

(सत्याग्रहनीति० ५/२/१३-१४)

आपोथिताग्रं द्वौ कालौ कषायकटुतिक्तकम्।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन्॥
निहन्ति गन्धं वैरस्यं जिह्वादन्तास्यजं मलम्।
निकृष्य रुचिमाधत्ते सद्यो दन्तविशोधनम्॥

(चरक०, सूत्रस्थानम्, ५/७१-७३)

२. दन्तपवनार्हान् वृक्षान् संगृह्णाति–
न्यग्रोधार्क-करञ्ज-निम्ब-कटुका जाती-कदम्बाम्रका
बिल्वोदुम्बर-दाडिमानि बदरी चाम्पेयको मर्कटी।
गायत्री तगरं तथा शुकतरुः शुद्धौ रदानां द्रुमान्
बब्बूलं ककुभं तथा च कुटजं शंसन्ति वै मञ्जनम्॥

(सत्याग्रहनीति० ५/२/१५)

करञ्जकरवीरार्कमालतीककुभासनाः।
शस्यन्ते दन्तपवने ये चाप्येवंविधा द्रुमाः॥

(चरक०, सूत्रस्थानम्, ५/७३-७४)

कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः।
निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा॥
मधुको मधुरे श्रेष्ठः करञ्जः कटुके तथा।

(सुश्रुत०, चिकित्सा अ० २४)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खदिरश्च कदम्बश्च करञ्जश्च तथा वटः ।
तिन्तिडी वेणुपृष्ठं च आम्रनिम्बौ तथैव च ॥
अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा ।
एते प्रशस्ताः कथिता दन्तधावनकर्मणि ॥

(स्मृतिग्रन्थतः

३. दन्तकाष्ठस्पर्शनेऽनर्हान् संगृह्णाति–

हृन्नेत्ररोगी मुखपाक-शोषी नूलज्वरी वारि-तृषी वमी च ।
ताल्वोष्ठ-जिह्वा-गल-दन्त-मूर्च्छा-हिक्कार्दितः श्वासरुजी मदी च ॥
हतप्रभोऽजीर्णरुजी श्रमी च क्लमी च पानेन सकर्णशूली।
काष्ठं स्पृशेन्नैव सुखं प्रपित्सुर्दन्त-प्रमृज्यै स्पृश मञ्जनानि ॥

(सत्याग्रहनीति० ५/२/१६-१७)

न खादेद्गलताल्वोष्ठजिह्वारोगसमुद्भवे ।
अथास्यपाके श्वासे च कासहिक्कावमीषु च ॥
दुर्बलोऽजीर्णभक्तश्च मूर्च्छार्त्तो मदपीडितः ।
शिरोरुगार्त्तस्तृषितः श्रान्तः पानक्लमान्वितः ॥
अर्दिती कर्णशूली च दन्तरोगी च मानवः ।

(सुश्रुत०, चिकित्सा अ० २४)

४. जिह्वा–

वङ्गार्क-तारा-कनकार्द्रकाष्ठं रसज्ञनिर्लेख-विवेकमाहुः ।
जिह्वामतीक्ष्णां कुटिलां विदध्याद् हरेत्तथा दोषचयं मुखस्थम् ॥

(सत्याग्रहनीति० ५/२/१८)

सुवर्णरूप्यताम्राणि त्रपुरीतिमयानि च ।
जिह्वानिर्लेखनानि स्युरतीक्ष्णान्यनृजूनि च ॥
जिह्वामूलगतं यच्च मलमुच्छ्वासरोधि च ।
दौर्गन्ध्यं भजते तेन तस्माज्जिह्वां विनिर्लिखेत् ॥

(चरक०, सूत्रस्थानम्, ५/७४-७६)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. सुगन्धितपदार्थान् संगृह्णाति–

श्रीसंज्ञमेलां कटुकञ्च जातिं कक्कोल-पूगे रजनीश-नाभिम्।
एवंविधं वा मुखशोधनं स्यात् तथा च ताम्बूलमुशन्ति केचित् ॥
सेवेत नूनं शतमायुरिच्छन् हृद्यं सुपथ्यं मुखकण्ठशुद्ध्यै ।
आलस्य-विद्रध्युपजिह्वकानां सतालु-दन्तार्बुद-रोगिणाञ्च ॥
गलास्य-कण्ठापचि-तालुशोष-श्लेष्मामयेभ्यस्तदतिप्रशस्तम् ।
तस्मान्निषेवेत नरः प्रयत्नादाचार्यवर्यैर्गदितान् प्रयोगान् ॥

ताम्बूलभक्षणेऽनर्हान् संगृह्णाति–

न नेत्ररोगे न च रक्तपित्ते क्षुते न दाहे न विषे न शोषे ।
मदात्यये नापि च मोह-मूर्च्छा-श्वासेषु ताम्बूलमुदाहरन्ति ॥

(सत्याग्रहनीति॰ ५/२/१९-२२)

धार्याण्यास्येन वैशद्यरुचिसौगन्ध्यमिच्छता ॥
जातीकटुकपूगानां लवङ्गस्य फलानि च ।
कक्कोलस्य फलं पत्रं ताम्बूलस्य शुभं तथा ॥
तथा कर्पूरनिर्यासः सूक्ष्मैलायाः फलानि च ।

(चरक॰, सूत्रस्थानम्, ५/७६-७८)

रुचिवैशद्यसौगन्ध्यमिच्छन् वक्त्रेण धारयेत् ।
जातीलवङ्गकर्पूरकङ्कोलकटुकैः सह ॥
ताम्बूलीनां किसलयं हृद्यं पूगफलान्वितम् ।
विषमूर्च्छामदार्तानामपथ्यं शोषिणां च तत् ॥

(अष्टाङ्गसङ्ग्रहः, सू॰ ३)

कर्पूरजातिकङ्कोललवङ्गकटुकाह्वयैः ।
सचूर्णपूगैः सहितं पत्रं ताम्बूलजं शुभम् ॥
मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् ।
हनुदन्तस्वरबलजिह्वेन्द्रियविशोधनम् ।
प्रसेकशमनं हृद्यं गलामयविनाशनम् ।
पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे ।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तपित्तक्षतक्षीणे नृणां मूर्च्छापरीतिनाम् ।
रूक्षदुर्बलमर्त्यानां न हितं चास्यशोषिणाम् ॥

(सुश्रुत०, चि० अ० २०)

गण्डूषधारणम्-

(युग्मकम्)

हनोर्बलाप्त्यै वदनोपचित्यै खाद्ये रसाप्त्यै रुचिसम्प्रवृत्त्यै ।
कण्ठास्यशोषं त्वधरस्य भेदं हर्षं सशूलं च रदस्य हर्तुम् ॥
रौक्ष्यं विहन्तुं रदमूलपुष्ट्यै तैलस्य गण्डूषविधिः प्रदिष्टः ।
नरः प्रकामं सुखमीहते चेत् कुर्यादजस्रं मुनिभिः प्रदिष्टम् ॥

(सत्याग्रहनीति०, ५/२/२३-२४)

हन्वोर्बलं स्वरबलं वदनोपचयः परः ॥
स्यात् परं च रसज्ञानमन्ने च रुचिरुत्तमा ।
न चास्य कण्ठशोषः स्यान्नौष्ठयोः स्फुटनाद्भयम् ॥
न च दन्ताः क्षयं यान्ति दृढमूला भवन्ति च ।
न शूल्यन्ते न चाम्लेन हृष्यन्ते भक्षयन्ति च ॥
परानपि खरान् भक्ष्यांस्तैलगण्डूषधारणात् ।

(चरक०, सूत्रस्थानम्, ७८-८१)

७. खालित्य-पालित्य-विरूक्षभेदान् निरासितुं मूर्ध्नि बलस्य चाप्त्यै ।
शिरःप्ररूढान् भ्रमरैरधृष्यान् विधातुमक्ष्णोश्च कलां सुपुष्टाम् ॥
नरो निषेवेत सुरूपमिच्छुर्निद्रां प्रपित्सुश्च शिरस्यतैलम् ।
ब्राह्म्यादि-नानाविधकौषधैश्च निर्मापितं वैद्यवरैरनुष्णम् ॥

(सत्याग्रहनीति०, ५/२/२५-२६)

नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते ॥
न खालित्यं न पालित्यं न केशाः प्रतपन्ति च ।
बलं शिरःकपालानां विशेषेणाभिवर्धते ॥
दृढमूलाश्च दीर्घाश्च कृष्णाः केशा भवन्ति च ।
इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम् ॥
निद्रालाभः सुखं च स्यान्मूर्ध्नि तैलनिषेवणात् ।

(चरक०, सूत्रस्थानम् ५/८१-८३)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरोगतांस्तथा रोगाञ्छिरोऽभ्यङ्गोऽपकर्षति ।
केशानां मार्दवं दैर्घ्यं बहुत्वं स्निग्धकृष्णताम् ॥
करोति शिरसस्तृप्तिं सुत्वक्कमपि चाननम् ।
सन्तर्पणं चेन्द्रियाणां शिरसः प्रतिपूरणम् ॥

(सुश्रुत०, चि० अ० २४)

८. कर्णतर्पणम्-

कर्णरोगा न वातोत्था मन्या-हन्वोर्न सङ्ग्रहः ।
बाधिर्योच्चश्रव-क्ष्वेडा न स्युस्तैलाक्तकर्णिनः ॥

(सत्याग्रहनीति०, ५/२/२८)

न कर्णरोगा वातोत्था न मन्याहनुसङ्ग्रहः ।
नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात् ॥

(चरक०, सूत्रस्थानम् ५/८४)

९. पादाभ्यङ्गः-

पादाभ्यसङ्गस्तु सुस्थैर्य-निद्रा-दृष्टि-प्रसादकृत् ।
पादसुप्ति-भ्रम-स्तम्भ-सङ्कोच-स्फुटनादिहृत् ॥

(सत्याग्रहनीति० ५/२/२९)

खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः ।
सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात् ॥
जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः ।
दृष्टिः प्रसादं लभते मारुतश्चोपशाम्यति ॥
न च स्याद्गृध्रसीवातः पादयोः स्फुटनं न च ।
न सिरास्नायुसङ्कोचः पादाभ्यङ्गेन पादयोः ॥

(चरक०, सूत्रस्थानम्, ५/९०-९२)

पादाभ्यङ्गस्तु तत्स्थैर्यनिद्रादृष्टिप्रसादकृत् ।
पादसुप्तिश्रमस्तम्भसङ्कोचस्फुटनप्रणुत् ॥

(वृद्धवाग्भटः, अष्टाङ्गसङ्ग्रहसूत्र. अ. ३)

१०. शरीराभ्यङ्गः

उत्साह्यभ्यङ्गशीलः स्यान्मुक्तो वात-जरा-श्रमैः ।
स्थिरः प्रियास्यो धीमांश्च सुत्वक् चाप्ताभिसम्मतः ॥

(सत्याग्रहनीति०, ५/२/३०)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नेहाभ्यङ्गाद्यथा कुम्भश्चर्म स्नेहविमर्दनात् ।
भवत्युपाङ्गादक्षश्च दृढः क्लेशसहो यथा ॥
तथा शरीरमभ्यङ्गाद्दृढं सुत्वक् च जायते ।
प्रशान्तमारुताबाधं क्लेशव्यायामसंसहम् ॥
न चाभिघाताभिहतं गात्रमभ्यङ्गसेविनः ।
विकारं भजतेऽत्यर्थं बलकर्मणि वा क्वचित् ॥
सुस्पर्शोऽपचिताङ्गश्च बलवान् प्रियदर्शनः ।
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजर एव च ॥

(चरक॰, सूत्रस्थानम्, ५/८५-८६)

११. तैलाभ्यङ्गानर्हाः-

तैलांभ्यङ्गं त्यजेन्नूनं हितमिच्छन् निजात्मनः ।
कृतसंशोधनोऽजीर्णी निरूढोऽथ नवज्वरी ॥

(सत्याग्रहनीति॰, ५/२/३१)

तरुणज्वर्य्यजीर्णी च नाभ्यक्तव्यौ कथञ्चन ।
तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ॥

(सुश्रुत॰ चि॰ अ॰ २४)

१२. स्नानम्–

सूर्योदयात्प्राक् सकलायुरीहैः स्नानं विधेयं वपुषः प्रमृज्यै ।
मनःप्रसत्त्यै ज्वलनस्य दीप्त्यै नेत्र्यं हितं वारि हिमं न तप्तम् ॥

(सत्यग्रहनीति॰, ५/२/३२)

पवित्रं वृष्यमायुष्यं श्रमस्वेदमलापहम् ।
शरीरबलसन्धानं स्नानमोजस्करं परम् ॥

(चरक॰, सूत्रस्थानम्, ५-९४)

उष्णेन शिरसः स्नानमहितं चक्षुषः सदा ।
शीतेन शिरसः स्नानं चक्षुष्यमिति निर्दिशेत् ॥
श्लेष्ममारुतकोपे तु ज्ञात्वा व्याधिबलाबलम् ।
काममुष्णं शिरःस्नानं भैषज्यार्थं समाचरेत् ॥
अतिशीताम्बु शीते च श्लेष्ममारुतकोपनम् ।
अत्युष्णमुष्णकाले च पित्तशोणितवर्द्धनम् ॥

(सुश्रुत॰, चिकित्सा अध्यायः, २४)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३. स्नानेऽनर्हान् सगृह्णाति–

नार्हं ज्वरे विरेके च नेत्र-कर्णानिलार्तिषु ।
आध्मान-पीनसाजीर्ण-भुक्तवत्स्ववगाहनम् ॥

(सत्याग्रहनीति॰, ५/२/३४)

तच्चातिसारज्वरितकर्णशूलानिलार्तिषु ।
आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितम् ॥

(सुश्रुत॰, चि॰ अ॰ २४)

१४. अनुलेपनम्–

अनुलेपस्तृषा-मूर्च्छा-दुर्गन्ध-श्रम-दाहजित् ।
सौभाग्य-तेजस्त्वग्वर्ण-कान्त्योजोबलवर्धनः ॥
किञ्च तत्रापि यत्नेन, ध्यानं देयं मनीषिभिः ।
स्नानानर्हस्य मर्त्यस्य त्वनुलेपोऽपि नो हितः ॥

(सत्याग्रहनीति॰, ५/२/३५-३६)

वृष्यं सौगन्ध्यमायुष्यं काम्यं पुष्टिबलप्रदम् ।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिषेवणम् ॥

(चरक॰ सूत्रस्थानम्, ५/९६)

१५. वस्त्रम्–

रुच्यं हृद्यं तथायुष्यं वस्त्रं सच्छिल्पिकल्पितम् ।
स्नात्वा वसेत्पारिषदं पुष्पसत्त्वसुवासितम् ॥
यद्वस्त्रं धारितं रात्रौ तत्प्रक्षालनमन्तरा ।
नाच्छादयन् पुनः सभ्यो जयमायुश्च विन्दति ॥

(सत्याग्रहनीति॰ ५/२/३७-३८)

काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत्पारिषदं शस्तं निर्मलाम्बरधारणम् ॥

(चरक॰ सूत्रस्थानम् ५/९५)

१६. स्त्रगादिधारणम्–

वासःस्त्रगादिरत्नानामायुरारोग्यवर्धनम् ।
रक्षोघ्नमर्घ्यमोजस्यं धारणं प्रोच्यते परम् ॥

(सत्याग्रहनीति॰ ५/२/३९)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्यं मङ्गलमायुष्यं श्रीमद्व्यसनसूदनम् ।
हर्षणं काम्यमोजस्यं रत्नाभरणधारणम् ॥

(चरक० सूत्रस्थानम्, ५/९७)

रक्षोघ्नमथ चौजस्यं सौभाग्यकरमुत्तमम् ।
सुमनोऽम्बररत्नानां धारणं प्रीतिवर्धनम् ॥

(सुश्रुत०, चि० अ० २४)

१७. पादयोर्मलमार्गाणां च प्रक्षालनम्-
रुच्यं मेध्यं तथायुष्यं पादरोगनिषूदनम् ।
पादयोर्मलमार्गाणां पावनं यद्धि भूरिशः ॥

(सत्याग्रहनीति०, ५/२/४०)

मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम् ।
पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः ॥

(चरक०, सूत्रस्थानम्, ५/९८)

१८. केशप्रसाधनम्–
वृष्यं पुष्टिदमायुष्यं शुचिरूपप्रसादनम् ।
केश-श्मश्रु-नखादीनां कल्पनं सम्प्रसाधनम् ॥

(सत्याग्रहनीति०, ५/२/४१)

पौष्टिकं वृष्यमायुष्यं शुचि रूपविराजनम् ।
केशश्मश्रुनखादीनां कल्पनं संप्रसाधनम् ॥

(चरक० सूत्रस्थानम् ५/९९)

१९. पादत्रम्–
भयघ्नं वृष्यमायुष्यं पादयोर्व्यसनापहम् ।
नेत्र्यं बल्यं तथा शुच्यं हृद्योपानत्प्रधारणम् ॥

(सत्याग्रहनीति०, ५/२/४२)

चक्षुष्यं स्पर्शनहितं पादयोर्व्यसनापहम् ।
बल्यं पराक्रमसुखं वृष्यं पादत्रधारणम् ॥

(चरक० सूत्रस्थानम् ५/१००)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादरोगहरं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम् ।
सुखप्रचारमोजस्यं सदा पादत्रधारणम् ॥

(सुश्रुत० चि० अ० २४)

२०. छत्रम्–

घर्म-वात-रजोऽम्बुभ्यस्तूत्तमाङ्गभवाद्रुजः ।
त्रात्वा कान्तिं रुचिं शर्म च्छत्रं नृभ्यः प्रयच्छति ॥

(सत्याग्रहनीति०, ५/२/४३)

ईतेः प्रशमनं बल्यं गुप्त्यावरणशङ्करम् ।
घर्मानिरलजोऽम्बुघ्नं छत्रधारणमुच्यते ॥

(चरक० सूत्रस्थानम् ५/१०१).

२१. दण्डधारणम्–

रुच्यं प्रशस्तं सुदृढं च पाणौ दण्डं ध्रियेतात्मबलाप्तिकामः ।
जागर्त्यजस्त्रं रिपुदर्पदान्त्यै देहं च रक्षत्यभितः प्रयुक्तः ॥

(सत्याग्रहनीति०, ५/२/४४)

स्खलतः सम्प्रतिष्ठानं शत्रूणां च निषूदनम् ।
अवष्टम्भनमायुष्यं भयघ्नं दण्डधारणम् ॥

(चरक० सूत्रस्थानम् ४/१०२)

२२. व्यायामः–

व्यायच्छ नित्यं परिहृत्य विघ्नान् व्यायामकारी लभते न रोगान्।
अन्नं कदन्नं समयच्युतं वा भुक्तं च देहाङ्गमुपैति तस्य ॥
कान्तं वपुस्तस्य भवेन्नृलोके ऽत्र्यस्यन्ति तस्माद्रिपवश्च तस्य ।
यत्कर्तुमीष्टे स तदाशु कृत्वा लब्ध्वा जयं हर्षमुपैति भूयः ॥
दोषाः समास्तस्य भवन्ति जन्तोः स्वास्थ्यं त्रिदोषस्य समानभावः ।
किङ्कर्म किं वाऽप्यपकर्म बुद्ध्वा धृत्या हितं कर्म करोति नान्यत् ॥
व्यायामवन्तं सततं समेतः शौर्यं च वीर्यं च समिद्धगात्रम् ।
साध्यस्य सिद्ध्यै बलमाहुरग्र्यं बुधास्तु देहात्ममनोऽर्थजातम् ॥
समिद्धगात्रो विनिहन्ति शत्रून् विद्यातपोभ्यां बलमेति देही ।
बलिष्ठगात्रोऽवति हृद्गुहास्थं सत्येन पूतञ्च मनः शरीरम् ॥

(सत्याग्रहनीति०, ५/२/४५-४९)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धनी ।
देहव्यायामसंख्याता मात्रया तां समचारेत्॥

(चरक॰ सूत्रस्थानम्, न वेगान्धारणीयाध्यायः ७/३१)

शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा ॥
श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता ।
आरोग्यं चापि परमं व्यायामादुपजायते ॥
न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम् ।
न च व्यायामिनं मर्त्यं मर्दयन्त्यरयो भयात् ॥
न चैनं सहसाक्रम्य जरा समधिरोहति ।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च ॥
व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति सिंहं क्षुद्रमृगा इव ॥
वयोरूपगुणैर्हीनमपि कुर्यात्सुदर्शनम् ।
व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् ॥
विदग्धमविदग्धं वा निर्दोषं परिपच्यते ।

(सुश्रुत॰ चि॰ अ॰ २४)

२३. त्रयः स्तम्भाः–

पूर्णमायुष्यमन्विच्छन् त्रीन् स्तम्भाननुपालयेत् ।
ब्रह्मचर्यमथाहारं स्वप्नं चापि यथोचितम् ॥
सुकृतेषु सदा स्वास्थ्यं विकृतेषु रुजां गणः ।
परं प्रयत्नमातिष्ठेत् स्तम्भानामनुपालने ॥

(सत्याग्रहनीति॰, ५/३/१६-१७)

त्रय उपस्तम्भा इति-आहारः स्वप्नो ब्रह्मचर्यमिति, एभिस्त्रिभिर्युक्तियुक्तैरुपस्तब्धमुपस्तम्भैः शरीरं बलवर्णोपचयोपचितमनुवर्तते यावदायुः संस्कारात् संस्कारमहितमनुपसेवमानस्य, य इहैवोपदेक्ष्यते ।

(चरक॰ सूत्रस्थानम् ११/३५)

एतादृशेषु स्थलेषु सत्याग्रहनीतिकाव्यं शास्त्ररूपतामङ्गीकरोति । मन्ये, कविरपि तथ्यमिदं स्वीकरोति यदा स स्वकाव्यं 'शास्त्र' पदेनाभिदधाति–स्वोपज्ञं नीतिशास्त्र


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाप्नुवन् पूर्णत्वात् सत्यरूपात्मकस्य ब्रह्मणः पूर्णत्वं स्तौति।' (सत्याग्रहनीति०, ५/४/३९ पद्यानन्तरमनन्तवृत्तिः)

## सत्याग्रहनीतिकाव्यस्य प्राणवान् पक्षः

समीक्षकैः काव्यस्यास्य सबलपक्षो निर्मलचेतसानुसन्धेयोऽभिनन्दनीयश्च। सत्याग्रहनीतिकाव्यस्य पर्यालोचकान् प्रति कथने क्रियासमभिहारेण कविर्भणति यत्तेन गुणाढ्यमिदं काव्यं विशुद्धशब्दैः संशोध्य मनोज्ञभावैश्च संवर्ध्य महार्घकालेन संयोजितम् । कर्ता स्वकृतौ दोषान्न पश्यति लोकश्च कृतौ दोषमेव पश्यति। एतस्यां स्थितौ सुविज्ञानामिदं कर्तव्यं यत्ते लेखे भावे च सूक्ष्मेक्षिकया स्खलनं वीक्ष्य कविं संसूचयेयुः। तन्मतेनेदं काव्यं महत्तरमस्ति; अतोऽस्य समीक्षणं प्रयत्नमास्थायैव करणीयम्। (द्र० सत्याग्रहनीतिकाव्यस्य पर्यालोचकान् प्रति, १-५)

वस्तुतः प्रयत्नमास्थायैवास्य गुणा दर्शनीयाः ।

कविः स्वकाव्यमक्षयज्योतिःस्वरूपं किञ्चोत्तमं भणति–

**शर्वरीणामनेका मे वीतनिद्रस्य निर्गताः ।**
**तमो भुक्त्वाऽक्षयं ज्योतिर्लिखितं काव्यमुत्तमम् ॥**

(सत्याग्रहनीति०, ५/४/३५)

ननु कात्राक्षयज्योतिष्कल्पता का चोत्तमता?-इति मनाग् विमृश्यते। ध्वनि-मार्गानुयायिभिः स्वीकृतेन व्यङ्ग्यार्थप्राधान्यरूपमानदण्डेन काव्यस्यास्य काव्य-शास्त्रोक्तोत्तमता कदाचिन्न सिद्ध्येत्, यतो हीदं काव्यम् ऋजूक्तिपूर्णमभिधावृत्ति-प्रधानञ्च; किन्तु देशवासिनां चित्ते स्वदेशभक्तिभावानाया समुद्बोधकस्य, पारदेशिकशासनस्य प्रत्याख्यानं कुर्वाणस्य, सत्यस्य सत्याय वा आग्रहं पुष्णतः, राष्ट्रियभावनायाः प्रसारकस्य, देश-जात्युद्धाराकांक्षाभरितस्य **सत्याग्रहनीतिकाव्यस्य** व्यावहारिकी उत्तमता स्वीकार्यैव भवति । कविना कारागारजीवनमनुभूतम्; तेन तत्र बन्दिषु ये अत्याचाराः भवन्ति तान् दृष्ट्वाकर्ण्य वा यद्वर्णनं कृतं तन्मार्मिकं वर्तते। सत्याग्रहिणः षट् ऋतून् कथं यापयन्तीति वर्णयन् कविः कथयति–यस्मिन् वसन्ते सर्वत्र प्राकृतिकं रामणीयकं दृश्यते तस्मिन् देशजातिमतयो विद्वांसो नृपतेरनीतिवचनं व्याहन्तुं सत्याग्रहं कुर्वन्ति। कः पुनर्विद्वान्–

**राष्ट्रं स्वजातिं निजसंस्कृतिञ्च भाषां च भूषां परितो ह्रसन्तीम् ।**
**दृष्ट्वोन्नयायैव निजं वयो यो व्यासह्य कष्टं व्ययते स विद्वान् ॥**

(सत्याग्रहनीति०, ३/४/३)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भयङ्करग्रीष्मेऽपि सत्याग्रहिणः कथं न प्राणान् परित्यजन्तीत्यत्र स्वातन्त्र्याशामेव हेतुमाचष्टे कविः-

लोकाः पश्यत सत्यदीप्तमनसः कारासु सत्यप्रियाः
सोढ्वा क्लेशमहर्निशं विजहति प्राणान्न चित्रं न किम् ?
आशा जीवयति स्वलभ्यसुखदा स्वातन्त्र्यभावैर्युता
क्षीयन्ते निजभूतिसाधनरता हृष्यन्ति तापंसहाः ॥

(सत्याग्रहनीति०, ३/४/७)

हेमन्तर्तौ जना दधिदुग्धसर्पिरशनाः सन्तः सुखमुपभुञ्जते किन्तु कारागारे तेजोंऽशसंहारकं लवणाम्लमरिचमयं शुष्कान्नं भुक्त्वाऽपि सत्याग्रहिणः सम्प्राप्तबलाः प्रसन्नाननाश्च दृश्यन्ते। तत्र को हेतुः ? कविर्मनुते यत्स्वातन्त्र्यरूपं घृतमेव तान् सबलयति-

ग्रीष्मे प्राणभृतां यदर्ककिरणैः सत्त्वं हृतं साहसात्
तस्यांशस्य पुपूर्षया प्रतिदिनं कान्तं तु शीतालयम् ।
हेमन्तं सकलेप्सितप्रदमहो ? को नात्र वाञ्छेन्नरः ?
पुष्टिं यान्ति पयोऽथ सर्पिरशनास्तैलोपदिग्धाश्च ये ॥
हेमन्ते सकलेप्सिताप्तिसुखदे कारासु सत्यप्रियाः
शुष्कान्नं लवणाम्लमारिचमयं तेजोंऽशसंहारकम् ।
भुक्त्वाऽप्याप्तबलाः प्रसन्नवदना यान्त्यक्षिमार्गं सदा
विद्वन्? पुष्टिकरं किमस्ति वद तत् ? स्वातन्त्र्यरूपं घृतम् ।

(सत्याग्रहनीति० ३/४/१४-१५)

एतादृशेषु स्थलेषु कवेर्मौलिकता साक्षात्क्रियते यद्यपि **'ग्रीष्मे प्राणभृताम्'** इत्यादिशार्दूलविक्रीडिते भर्तृहरेः **'हेमन्ते दधिदुग्धसर्पिरशना'** (शृङ्गारशतकम् ४८) इतीयं पदावली प्रयुज्यते तथाप्यत्र रचनाकर्तुः कवित्वं विलसति । साधारणजनानां सत्याग्रहिणां च तुलनया किञ्च प्रश्नोत्तरालङ्कारेणात्र यां स्वातन्त्र्यचेतनां कविर्जागरयति तस्या महन्महत्त्वं विद्यते । कविरनेकाभिः सूक्तिभिः पराधीनतापीडितस्य देशस्य यूनां चेतस्सु समुत्साहं समुद्दीपयितुं नूनं समर्थोऽस्ति ।

यद्यपि धर्मरक्षार्थं कृतः सत्याग्रहोऽयं निज़ामहैदराबाद-विरुद्ध आसीत् किन्तु पश्चात् महात्मगान्धिनो नेतृत्वे ब्रिटिशराज्यमुत्खातयितुं कृताय सत्याग्रहाय अने


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
सत्याग्रहेण प्रत्यक्षं परोक्षं वा प्रेरणा अवश्यं दत्ता अभूत् । अतो देशस्वातन्त्र्यलाभार्थमपि कविरत्र उद्बोधनं करोत्येव । इत्थं संस्कृतस्य राष्ट्रिय-काव्यपरम्परायां 'सत्याग्रहनीतिकाव्यं' वैशिष्ट्यमावहत्येव ।

न केवलं भारतराष्ट्रकृतेऽपितु विश्वस्य समस्तराष्ट्राणां कृते मार्गप्रदर्शकमिदं काव्यमस्ति । कवेरनुभवः शास्त्रज्ञानञ्चात्र साक्षात्कर्तुं शक्येते । आयुर्वेदोक्त-स्वस्थवृत्तेन स जनान् स्वस्थान् कर्तुमिच्छति सत्याग्रहस्य प्रतिष्ठया च तान् स्वदेशोद्धारार्थं सर्वथाऽतन्द्रितान् कर्मपरांश्च द्रष्टुमिच्छति । कवेरेव शब्देषु वक्तुमर्हते-

**यावन्ति राष्ट्राणि भुवि स्थितानि काव्यं पथो दर्शकमस्तु तेभ्यः ।**
**सत्यं न लोके व्ययते कदाचिद् राष्ट्राण्यतोऽदः परमाद्रियन्ताम् ॥**

(सत्याग्रहनीति० १/३/३)

सत्याग्रहनीतिकाव्यस्य प्रणयने को हेतुः? - इत्यस्य प्रश्नस्योत्तरत्वेनेदं व्याहर्तुं शक्यते यद्रचनाकारेण देशस्य जातेश्चोद्धारायेदं काव्यं प्रणीतम् (द्र० सत्याग्रहनीति० १/२/३४-३५) । देशस्योद्धाराय प्रथमं स्वातन्त्र्यमिष्यते तदनु च सर्वेषां देशवासिनां देशस्योन्नत्यै समृद्ध्यै च प्रयत्ना अपेक्ष्यन्ते । सत्यनिष्ठाया उभयत्रापि महती आवश्यकता । विश्वस्मिन् जगति कोऽपि देशः स्यात्, तस्योद्धारार्थं समुन्नत्यै समृद्ध्यै च अयमेव पन्था हितकरः । जातेरुद्धारः कथं स्यात् ?- इत्यस्य प्रश्नस्योत्तरार्थं पूर्वं जातिशब्दस्यार्थोऽवगन्तव्यः। प्रथमस्तावदर्थः—उर्दूभाषायां '**कौम**'इति शब्दस्य योऽर्थो भवति आङ्ग्लभाषायां '**नेशन**' शब्दस्य वा योऽर्थो भवति सोऽपि जातिपदेन ग्रहीतुं शक्यते; किञ्च '**नित्यत्वे सत्यनेकसमवेतत्वम्**' इतिन्यायशास्त्रदृशा मनुष्यता सम्पूर्णमानवजातिर्वा '**जाति**' पदेनात्र ग्रहीतुं शक्यते । इत्थं कस्यचिद्राष्ट्रस्य जन्मना कर्मणा वा तत्र निष्ठां दधाना निवासिनः 'जातिपदेन' ग्राह्याः स्युः । अथवा जगद्व्यापिनी मानवजातिरेव 'जाति' पदेनात्र व्यपदेश्या स्यात् ।

सत्याग्रहनीतिकाव्यं स्वदेशस्य विश्वस्य समस्तानां राष्ट्राणां वा वासिनामुत्कर्षं कामयते । देशं जातिं चोद्धर्तुमेव काव्यप्रणयनमभिनन्दति कविः सत्यदेवः । स कथयति-

**राष्ट्रोन्निनीषया काव्यं कुर्वन् विज्ञानवर्धनम् ।**
**तृणाय मन्यते राज्यं कविः सत्याप्तिलिप्सया ॥**

(सत्याग्रहनीति०, १/२/३५)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविर्यस्य राष्ट्रस्य निवासी तस्योन्निनीषा तस्य प्रथमं लक्ष्यम् । तदनु च 'कस्यापि राष्ट्रस्य निवासी इदं काव्यमधीत्य स्वराष्ट्रस्योन्नत्यै प्रयत्नमाचरेदि' ति दृष्ट्यापि स इदं काव्यमुपनिबध्नाति । सत्यं प्रत्याग्रहः, नीतिपालनं स्वास्थ्यरक्षा च कस्यापि राष्ट्रस्योन्नतेः कारणतां यान्ति। असत्यव्यवहारेण क्षणिकोन्नतिर्जायते सत्यव्यवहारेण च स्थायिन्युन्नतिर्भवति। यस्य राष्ट्रस्य निवासिनः स्वस्थाः स्वदेशप्रेमिषश्च भवन्ति तस्य राष्ट्रस्योन्नत्या अवश्यं भाव्यमेव । अतोऽत्र काव्ये वर्णितानि राष्ट्रियभावना-स्वस्थवृत्तनीतिवचांसि सर्वथा, सर्वदा सर्वत्र च प्रासङ्गिगतां भजन्ति, काव्यस्य शक्तिमत्तां च द्योतयन्ति । सहशिक्षादिविषये सन्तु नाम शिक्षाविदां विप्रतिपत्तयः, किन्तु सत्याग्रहस्य, मिथ्याग्रहिणो विहाय, न कोऽपि विरोधी ।

सत्याग्रहनीतिकाव्यस्य कः पुना रचनामार्गः? अस्य प्रश्नस्योत्तरं कविरेव ददाति-

**चन्द्रः कलङ्कयुक्तोऽपि द्युतिं शुभ्रां प्रयच्छति ।**
**तथाऽल्पार्थं वचः साधोः परं शुभ्रायते मनः ॥**

(सत्याग्रहनीति॰, १/२/३३)

इदं हि काव्यं साधोर्वच ('सन्त-वचन्' इति हिन्द्याम्) इव ऋजूक्तिप्रधानम्। काव्यपरीक्षाकाणां दृशा कैश्चन दोषैर्युक्तमपीदं पाठकानां मनो निर्मलयति । सम्पूर्णेऽपि काव्ये द्वित्राण्येवोदाहरणनि सन्ति यत्रार्थावबोधने काठिन्यमनुभूयेत; सर्वत्र पुनः प्रसादगुणोपेता भाषा कविना प्रयुक्ता, यत्रार्थावबोधो द्रागेव जायते । मन्ये कविरप्यनेन वैशिष्ट्येन परिचितोऽस्ति; अत एव विश्वस्तः सन्निदं वक्ति-

**'यथेषोर्विनिपातोऽन्तर्गत्वा मर्माणि विध्यति ।**
**तथैवाध्येतृ-हृन्मर्म स्पृशत् स्फूर्जत् प्रबोधयेत् ॥**
**कवेः काव्यं तदुत्कृष्टं' कवीनां समयो ह्ययम् ।**
**किंश्रेणीकमिदं काव्यं स्वयं तज्ज्ञैर्विविच्यताम् ॥**

(किञ्चिदात्मनिवेदनम्, ८-१०)

काव्ये सद्योऽर्थसमर्पकता आद्यन्तं व्याप्तास्ति ।

ऋजूक्तिमये काव्येऽलङ्कारा अपि यथावसरं स्वाभाविकतया संनिविष्टाः । श्लेषालङ्कारस्य प्रसादगुणोपेतं रूपं पश्यन्तु सुधियः–

**सत्यदेव-पदं प्राप्तुं सत्यां नीतिं समाश्रये ।**
**स्वानुभूत्यागमेनात्र गीतं सत्यं प्रसीदतु ॥**

(हेतुनिरूपणम्, ११)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र **'सत्यदेव-पद'** मित्यत्र सत्यदेव-नाम, सत्यस्वरूपदेवस्य पदं (स्थानं चरणं वा) चेत्यर्थाभिधानात् श्लेषालङ्कारः । अत्रैव श्लोके सूच्यार्थसूचनेन मुद्रालङ्कारोऽप्यस्ति ।

अर्थालङ्कारेषु उपमा-रूपक-दीपक-प्रश्नोत्तर-निरुक्ति-काव्यलिङ्गार्थान्तरन्यासादयो यथावसरं प्रयुक्ताः काव्यस्योत्कर्षं जनयन्ति ।

सूक्तीनां तु निधानमेवेदं काव्यम् । यतो हि कविर्ब्रह्मचारी अतः स शृङ्गारपरकाः सूक्तीः परिहरति। केवलं **'युवतिर्यौवनं प्राप्ता युवानं कं न मोहयेत्।** (३/३/३)-प्रभृतिषु स्थलेषु युवतीनां मनोहरतां स स्पृशति। अन्यत्र स नीतिपरकसूक्तीरेव उपनिबध्नन् दृश्यते। एतासु सूक्तिषु कवेर्जीवनानुभवः जीवनादर्शश्च प्रतिबिम्बितौ भवतः। यत्र पुनः पूर्ववर्तिभिः कविभिः प्रणीतां सूक्तिं शब्दान्तरैः परिवर्त्य यथावद्वा स गृह्णाति तत्र कवेः पूर्वकवि-प्रणीतोक्तौ निष्ठाभिव्यज्यते।

सूक्तीनां कृते आत्मनिवेदनस्य ३, ८, ११, १२ तमानि पद्यानि, मङ्गलाचरणस्य ८, १३ तमे पद्ये, हेतुनिरूपणस्य १, २, ३, ४, ६, ८, ९ तमानि पद्यानि, प्रथमाध्यायस्य प्रथमपादस्थानि ४, ५, ६, ७, ८, ९, १२, १३, १४, १५, १६, १७, १८, १९, २१, २३, २४, २५, २७, २८ तमानि किञ्चाग्रेऽपि प्रत्यध्यायं प्रतिपादमनेकानि पद्यान्यवलोकनीयानि। दिङ्मात्रमुदाह्रियते -

नश्वरं मलमूत्राढ्यं मांसशोणितसञ्चितम् ।
राष्ट्रसेवाकृते देहं हातुं शक्तो न दुर्जनः ॥

(सत्याग्रहनीति॰, १/१/१४)

रतिर्धर्मे न राष्ट्रस्य सेवायां नो रतं मनः ।
येषां ते वपुषो भारं वहन्तोऽटन्ति भूतले ॥

(सत्याग्रहनीति॰, १/१/१७)

विद्या पृथक् शर्मपदं च भिन्नम्

(सत्याग्रहनीति॰, ४/३/७)

व्यायामोऽर्थ्यो रुजापहः ।

(सत्याग्रहनीति॰, ५/२/५२)

किं बहुना, सत्याग्रहनीतिकाव्यस्य बहुसंख्यकानि पद्यानि सुभाषितरूपाण्येव सन्ति। तानि सहृदयैर्मूलकाव्येऽवलोकनीयानि।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
कविः समाजस्य समस्तेभ्यो वर्गेभ्यः सत्याश्रमयाय, देशोन्नत्यै स्वास्थ्यरक्षायै
व प्रेरणां ददाति। स्त्रीणां गृहकार्यलग्नतां सत्यपरतां च सोऽभिनन्दति–

**या दोहनेऽवहनने मथनोपलेपप्रेङ्खेङ्खनार्भ-रुदितोक्षणमार्जनादौ ।**
**सत्यं स्मरन्ति कथयन्ति च पापभीता धन्या भवाब्धिगहने विरलाङ्गनास्ताः ॥**

(सत्याग्रहनीति॰, ३/३/३१)

स्त्रीत्रां दोषगुणानामपि कविश्चर्चां करोति (द्र० तदेव ३/३/३३-३५)

आप्तविद्यीये (४/३) पादे स गुरु-शिष्ययोः कर्तव्याकर्तव्यकर्मणामुल्लेखं करोति। गुरुणा छात्रा न प्रतिशोधबुद्ध्या, न मर्मदेशे, न चाङ्गतोड ताडनीया (४/३/५); अध्यापनकाले तेनापशब्दा न प्रयोज्याः (४/३/६) । छात्रैर्गुरवः मित्रवन्नाचरणीयाः; तैः स्वाध्यायकाले केशप्रसाधनं वेषसुगन्धनं वा न कार्यम्; तैः मद्य-मांस-द्यूत-वाद-वनितानृत्यादि-सेवनं न करणीयम् (४/३/१५-१९)। कवेर्विचाराः श्छात्राणामध्यापकानां च कृते हितकराः सन्ति।

सत्याग्रहनीतिकाव्यस्य प्रत्येकं पद्यं सत्पथाचरणमुपदिशति; सुभाषितत्वं च नैजं पुष्णाति।

कविना सुकुमारमतीनां पाठकानां कृते स्वकाव्यस्य **'अनन्तवृत्ति'**-संज्ञिका टीकापि प्रणीता यया गूढाशयानां पदानां झटित्यर्थावबोधकता सम्भवति। अस्मन्माननीयेन सुहृद्वरेण सुख्यातकविना च डा॰ रुद्रदेवत्रिपाठिमहाभागेनाष्टत्रिंद्वर्षाणि पूर्वम् (२०१ तमे वैक्रमाब्दे, १९५८ तमे खैष्टाब्दे) अस्य काव्यस्य हिन्दी-भावानुवादः कृतो य हि संस्कृतानभिज्ञान् काव्याध्येतॄन् उपकुर्वन् विजयते।

सत्याग्रहनीतिकाव्यमधिकृत्य संशोधकैः समीक्षकैश्चापि विचारितम् । डा॰ रुद्रदेवत्रिपाठिना 'अनुभूतिपुरस्करणम्' संस्कृतमाध्यमेन विलिख्य तस्य हिन्दी-भावानुवादोऽपि कृतः । भिवानीवास्तव्येन डा॰ रामेश्वरदत्तशर्ममहोदयेन हिन्दीभाषामाध्यमेनैव लेखो व्यलेखि । उभावपि लेखौ सत्याग्रहनीतिकाव्ये संगृहीतौ स्तः । एताभ्यां काव्यस्यान्तस्तत्त्वं यथाशक्यं समुन्मील्यते; पाठकैरुभावपि लेखौ पठनीयौ स्तः। १५-८-१९३९ ई॰ तः ८-२-१९५२ ई॰ पर्यन्तं रामदेवभिक्षुस्वामिरामेश्वरानन्द-यमुनादास-आनन्दस्वामिसरस्वती-पं॰ दीनानाथशर्मशास्त्रिसारस्वत-कविरत्न-मेधाव्रतैः स्वसम्मतयोऽपि काव्यमवलम्ब्य प्रदत्ता यत्र काव्यस्य वैशिष्ट्यं सङ्केत्यते। एताः सम्मतयोऽपि पठनीयाः सन्ति ।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्यं हि विचाराणां, कल्पनानां, भावानां सुभाषितानां चाक्षय्यो निधिरस्ति । यदपि अमरभारत्यां विरच्यते तदमरतां दीर्घायुष्यं वाप्नोति । संस्कृतभाषाया रूपं शैली वाऽधुनिके काले कामं किमपि परिवर्तनं गते स्यातां किन्तु यदपि तत्र रचितं तच्चिरकालं यावत् समीक्ष्यते सुधीभिः । राष्ट्रियभावना वा स्यात्, विश्वमङ्गलकामना वा स्यात्, मानवमात्रस्य हितेच्छा वा स्यात्-सर्वमपि संस्कृतसाहित्येऽवलोकयितुं शक्यते । विंशशताब्द्याः संस्कृतसाहित्यस्य मुख्यस्वरो राष्ट्रियभावनैवास्ति यद्यपि विश्वमङ्गलकामना संस्कृतसाहित्यस्य स्थायी मुख्यस्वरो विद्यते । अत एव **'सर्वेऽपि सुखिनः सन्तु'** इत्येषा भावना यथा कविकुलगुरौ कालिदासे दृश्यते-

**सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।**
**सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥**

तथैवाद्यापि दृश्यते-

**परतन्त्रो मा भूत्क्वापि कोऽपि, सर्वः सर्वत्र सदा नन्दतु ।**
**जगतः स्वतन्त्रतामिच्छन्ती, मोदे खलु भारतजनताहम् ॥**

(रमाकान्तशुक्लस्य)

सत्याग्रहनीतिकाव्ये कवेः स्वराष्ट्रभक्तिभावनया साकं मानवमात्रस्य कल्याणेच्छापि जागर्ति । एकतः पराश्रयं, पराश्रितं, पराधीनकर्तारं, पराधीनपद्धतेः कर्तारं तत्सम्बद्धं पौरुषं च धिक्कुर्वन् सत्याग्रहनीतिकारः स्वातन्त्र्यचेतनां मुखरयति- **'पराश्रयं च पुरुषं धिक् कारकं पौरुषम् ।'** (सत्याग्रहनीति० ३/३/३८) अपरतश्च **'स्वास्थ्यं सतां मण्डनम्'** इति भर्तृहरेरुक्तिं समर्थयन् मानवमात्रं स्वास्थ्यलाभाय प्रबोधयति-

**शीलं भोज्यं तथा चर्यां शीलयेत् स्वास्थ्यदां पुमान् ।**
**जयेत् खान्यप्रमत्तः सन् सक्तः खेषु विरुज्यते ॥**

(सत्याग्रहनीति० ५/३/२३)

सदुद्देश्यमिदं हृदि दधानमिदं काव्यं संस्कृत-काव्य-जागति कामपि विशिष्टां विच्छित्तिं विस्तारयति । काव्यमिदं काव्यकर्तारञ्च श्री १०८ पं० सत्यदेववासिष्ठ-महाभागं-यो हि सप्तविंशतिवर्षवयसि काव्यमिदं विरच्यारद्यत्वे चतुरशीतिवर्षवयस्यपि


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
स्वं जीवनं तदनुसारमेव यापनम् 'कुर्वन्नेवेह कर्माणि जीजिविषेच्छतं समा:' इति 'पश्येम शरद: शतं जीवेम शरद: शतं शृणुयाम शरद: शतं प्रब्रवाम शरद: शतमदीना: स्याम शरद: शतं भूयश्च शरद: शतात्' इति च वेदोक्ति चरितार्थयति–एभिशब्दै: सादरमभिनन्दयामि–

जना निजस्वास्थ्यसुरक्षणार्थं
स्वराष्ट्रभक्ते: परिवर्धनार्थम् ।
समस्तविश्वस्य च मङ्गलार्थं
पठन्तु सत्याग्रहनीतिकाव्यम् ॥१॥

श्रीसत्यदेवस्य भिषग्वरस्य
वासिष्ठगोत्रस्य सदाग्रहस्य ।
तपोभिरीड्यं सुयशोऽवगन्तुं
पठन्तु सत्याग्रहनीतिकाव्यम् ॥२॥

सत्यस्य नीतेश्च पथा प्रयातु:
कवे: सुवृत्तानि सुभाषितानि ।
सुमानि भृङ्गा इव सेवितुं जना:
पठन्तु सत्याग्रहनीतिकाव्यम् ॥३॥

प्रसक्तानुप्रसक्त्याग्रे श्रीवासिष्ठस्य अन्यान् ग्रन्थान् विषयीकृत्य किञ्चित्सङ्केत्यते-

## नाडीतत्त्वदर्शनम्

श्रीवासिष्ठस्य द्वितीयोऽद्वितीयो ग्रन्थोऽस्ति नाडीतत्त्वदर्शनम् । अस्य ग्रन्थस्य रूपरेखानिर्माणं, लेखनं, समापनं, पुन:संशोधनञ्च ग्रन्थकर्त्रा १९४३–१९४ तमेशवीयाब्दान्तराले विषमासु परिस्थितिषु व्यधायिषत। ग्रन्थकर्त्ता लिखति–

''अस्यैव निबन्धस्य (नाडीतत्त्वदर्शनस्य) प्रसङ्गे २००३ मिते विक्रम-वत्स जम्मूप्रान्तस्थ-रामपुर-राजौर्यां श्रीविष्णुदाससेठी-पुत्रेण मत्सविध एवाधीयानायुर्वेद सहागमम्। तत्रास्य निबन्धस्य रूपरेखामात्रं निबन्धनं कृतम्। (............असौ से सपरिवार: पाकिस्तानाक्रमणसमये नृशंसतमैर्मृत्युमुखं प्रापित:।)

ततश्चाहं ज्वराक्रान्तोऽपि यानानामव्यस्थया सपादशतमीलपर्यन्तं पद्भ्यामागच्छ खड्गपाणिभिर्यवनैराक्रान्त: कथंकथमपि निबन्धमेनं केवलं पृष्ठे वहन् मृत्युमुखाद वतीर्यामृतसरसि प्राप्त: । तत्र च ज्वरादिरोग-बहुले शरीरे विघ्नबाहुल्यं सहमा


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवास्य पुनर्लेखने परिष्कारे च संलग्नोऽभवम् । तदानीं समये जम्मूप्रान्तस्थ-रतियाँ-ग्राम-वास्तव्यस्य लाला-फतेहचन्द्र-महाजनस्य पुत्रो लालागरीबदासो महाजनः सानुरोधं मदीयं भोजनप्रबन्धं विधायास्य लेखने महान्तमुपकारमातनोत् ।'' (आत्मनिवेदनं कृतज्ञता-प्रकाशश्च, पृ० ८, नाडीतत्त्वदर्शनम्, प्रथमसंस्करणम्, ७-७-१९५०)

इमं ग्रन्थं प्रणेतुं श्रीवासिष्ठस्तद्गुरुणा यतिवर्येण श्रीतिलकरामशर्मब्रह्मचारिणा प्रेरितः । स लिखति- 'मयायमायुष्मान् सत्यदेवो निबन्धलेखनेऽस्मिन् भूयो भूयः प्रेरितः । सोऽयमेकमना अस्मदभिप्रेतमुररीकृत्य सावकाशो निबन्धनेऽस्मिन् बद्धपरिकरोऽभूत् ।

कृते कार्यारम्भे बह्निशून्याभ्रनेत्र (२००३) मिते वैक्रमेऽब्दे २२ तमे फाल्गुनेऽत्रामृतसरसि हिन्दूयवनानां मिथो वधावधः प्रारभत । एवं गच्छति काले सायाह्ने नगरमग्निज्वालाकुलं समभूत् ।

तदग्रिमदिने च नगरमिदमभितो दह्यमानमिवालोक्यत । तस्मिन्समये पलायिताः भूयांसो जनास्त्यक्तनिवासा दग्धगृहाश्चास्माकं निवासे स्वात्मरक्षायै समागताः । तेषां दग्धगृहाणामतिथीनामन्नंपाचनादिपुरीषप्रक्षेपान्तां सेवां कुर्वन्तावावां निशीथे लब्धावकाशौ निबन्धस्यास्य सङ्कलनं कुर्वन्तौ कियन्तं कालमत्यवाहयाव । परं विकारोऽयमनुदिन-मेधमान एवाभवत् । तदावाममृतसरः परित्यज्य शिमला-प्रान्ते 'कुमारहटी'तो नातिदूरे 'अह्रेच' स्थाने श्रीलाला-गीतारामाश्रये स्थित्वा निबन्ध-निबन्धने सम्भार- सङ्कलने च संलग्नावभवाव ।

वेदखाभ्रनेत्रमितस्य (२००४) वैक्रमाब्दस्य वैशाखे मासि पुनरप्ययं वासिष्ठो लवपुरमगादध्यापनाय । परं कतिपयैरेव दिवसैः पुनः प्रदीप्ते यवन-हिन्दु-विद्वेषानले दन्दह्यमाने निखिलेऽपि पञ्चापप्रदेशे लेखकोऽयं जम्मूप्रान्तवर्तिनि 'रामपुर-रजौरी' पत्तने स्वशिष्यस्य गृहे पुस्तकस्यास्य लेखनाय गतः । कतिपयाध्यायान्ते तस्य विष्णुदाससेठीति नामोल्लेखपुरस्सरं कृतज्ञता-प्रकाशनं विहितं लेखकेन ।

पुनः काश्मीराक्रमणसमये यानादिव्यवस्था-भङ्गाज्ज्वराक्रान्तोऽपि लेखकः केवलं पुस्तकसहाय एवातिविस्तृतमध्वानं गच्छन्नसिहस्तैर्यवनैराक्रान्त आयुषः शेषतया जीवनं रक्षन् कार्तिके मासि ममाक्ष्णोरातिथ्यमवाप । ततो मयानेन सङ्कलितो निबन्धः श्रुतः संशोधितः परिष्कृतश्च । पुनरनेन सच्छिष्यगुणयुक्तेन भूमिशयनादि-यतिचर्यामधितिष्ठता भोजनादिष्वप्युपेक्षां विदधता स्वल्पतमं शयनकालं विहाय



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वोऽपि सचयः प्रबन्धलेखने निर्मिताः । एवं ग्रन्थे[illegible]स्मिन् लेखे पुनः पुन परिमार्जन-कारणेन भूयान् कालो व्यतीतः । एवमस्य सम्पादने प्रकाशनेऽ विविधविघ्नबाहुल्येन त्रीणि वर्षाणि व्यतीतानि ।' (प्रथमसंस्करणस्य प्रारम्भिव निवेदनम्-तिलकरामशर्मा ब्रह्मचारी भिषगाचार्यः । अमृतसरः २०-५-१९५०)

इत्थं २००३ तमवैक्रमाब्दात् २००५ तमवैक्रमाब्दं यावदस्य ग्रन्थस्य रचनाकालः ६-१०-१९४८ ई॰ यावत्प्रथमसंस्करणं मुद्रणाय सज्जमभवत् । प्रथमसंस्करणस्याष्टमा ध्यायसमाप्तौ ६-१०-१९४८ (आश्विन प्र॰ २१, २००५) इत्थं तिथिनिर्देशो वर्तते ७-७-१९५० ई॰ तारिकायां ग्रन्थकर्त्रा प्रथमसंस्करणस्य 'आत्मनिवेदनं कृतज्ञताप्रकाशश्च लिखितः । इत्थमस्य ग्रन्थस्य प्रथमं संस्करणं १९५० तमेशवीयेऽब्दे प्रकाशितमभूदिति सुस्पष्टं ज्ञायते । (द्र॰ नाडीतत्त्वदर्शनम् तृतीयं संस्करणं, प्रका॰ रामलाल कपू ट्रस्ट, बहालगढ़ जि॰ सोनीपत) ग्रन्थस्यास्य द्वितीयं मुद्रणं १९६७ तमेशवीयेऽब्दे तृतीयं १९८३ तमेशवीयेऽब्दे चतुर्थं च १९९० तमेशवीयेऽब्दे सञ्जातम् । अद्यत्वे चास्य पञ्चमं संस्करणं मुद्रणाधीनं वर्तते यस्य प्रकाशनं ग्रन्थकृता स्वयमेव कार्यते अस्य प्रकाशनं १९९६ तमेशवीयेऽब्दे आशास्यते । नाडीतत्त्वतदर्शनस्य प्रयोजनमित्थं सङ्केतितं ग्रन्थकृता-

> **धराविधानं भिषगाद्यभूषणं**
> **भिषग्वरैराप्तयशोऽपि तद्भृशम् ।**
> **यशः सुदुह्यादपि मादृशांस्तथा**
> **भिषग्बुभूषूनिति कीर्त्यते मया ॥**

(नाडीतत्त्वदर्शनस्य मङ्गलाचरणम् २)

वैद्यानां कृते धरा (नाडी)-परीक्षणं परमावश्यकम् । ग्रन्थेऽस्मिन् 'रावणनाडीपरीक्षा' नाम्नः प्रबन्धस्य व्याख्या अष्टमाध्याये कृता । ततः पूर्वं सप्ताध्यायाः नाडी-ज्ञान-सौकर्याय रचिताः । ग्रन्थकृता 'कणादनाडीविज्ञानं' 'वसवराजीया नाडी' इत्युभावपि प्रबन्धौ सटिप्पणं ग्रन्थान्ते प्रस्तुतौ ।

नाडीतत्त्वदर्शनस्य पञ्चमाध्याये दूत-नाडी-विज्ञानस्य विवेचनं श्रीवासिष्ठेन कृतम् । दूतनाड्या अद्यत्वेऽयमेक एवं विशेषज्ञः सम्पूर्णेऽपि जगति तिष्ठतीति विश्वसन्ति साम्प्रतिकाः वैद्याः । मया प्रत्यक्षमस्य दूतनाडीविज्ञानस्य चमत्कारः १९९६ तमे खीष्टाब्दे नैकशो दृष्टः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

महाभारतान्तर्गतानां विष्णोः सहस्रनाम्नां वेदशास्त्रोपवृंहिते सत्यभाष्ये श्रीवासिष्ठेन व्याकरणं, मन्त्रलिङ्गं लोके च तेषां व्यापकत्वं प्रतिपाद्य अन्ते सारांशभूताः स्वश्लोकाः निर्दिष्टाः । यथोक्तं तेन- ''प्रतिनाम यथोपयोगि व्याकरणं, नाम्नो व्याप्तिः, लोके तदनुकृतिः, शरीरेषु समन्वयः तन्नाम्नः प्रमापयिता मन्त्रश्च सलोकोदाहरणं निर्दिष्टः ।'' (सहस्रनामसङ्ग्रहीतारं प्रति सत्यभाष्यकृतः कृतज्ञता-प्रकाशनम् पृ० १०)

सत्यभाष्यस्य रचना **'या निशा सर्वभूतानां तस्यां जागर्ति संयमी'** ति गीतोक्तं वचनं चरितार्थयमानेन श्रीवासिष्ठेन भिवान्यां स्वयं निर्मापिते देवसदने द्वादशवर्षैः जागरणशीलेन आर्षपद्धत्या कृता । तन्मित्रेण स्व० पं० मुशीरामशर्मशास्त्रिणास्य राष्ट्रभाषानुवादोऽपि कृतः । ग्रन्थस्य तृतीयं संस्करणं १९९६ तमे ख्रीष्टाऽब्दे अप्रेलमासे मुद्रितम् यस्य प्रकाशनं ग्रन्थकृता स्वयं कृतम् ।

## विष्णुकाव्यम्

सत्यभाष्यस्य पद्यात्मको भाग एव 'विष्णुकाव्य'-संज्ञया प्रकाशितोऽस्ति। अस्यापि कश्चिदस्तीतिहासः । श्रीविष्णुसहस्रनामसत्यभाष्यस्य तृतीयसंस्करणस्य सम्पादनायै- तत्पंक्तिलेखकेनावसरोऽलम्भि । प्रबन्ध-सम्पादकत्वं च तत्र श्रीमहेशकुमार आइ. आर. एस. महाभागो बभार । ग्रन्थसम्पादनकाले तेनैव परामर्शोऽदायि यदस्मिन् संस्करणे 'भवति/भवतः/भवन्ति चात्रास्माक' मितिवाक्यानुगतानि पद्यानि पृथक्परिशिष्टेऽपि देयानि येन पद्यान्यव्यवहितोत्तरं पिपठिषूणामुपकारो भवेदिति । तत्परामर्शो गन्थकृता सम्पादकेन चाभ्युपागम्यत । अत एव तृतीयसंस्करणे 'श्रीविष्णुकाव्यम्' परिशिष्टरूपेणादीयत । (द्र० श्रीविष्णुसहस्रनाम-सत्यभाष्यम्, तृ० सं० १९९६, पृ० १०८९-१३३०)

श्रीविष्णुकाव्यमेव **'विष्णुकाव्य'**मितिशीर्षकेण 'अर्वाचीनसंस्कृतस्य अष्टादशवर्षीये प्रथमे द्वितीये तृतीये च संयुक्तांके २७-५-१९९६ तारिकायामिदम्प्रथमतया स्वतन्त्रग्रन्थरूपेण प्रकाशितं जातम् । ('द्र. अर्वाचीनसंस्कृतम् १८/१-३, २७-५-१९९६ प्रका. देववाणी-परिषद्, दिल्ली, आर ६ वाणी विहारः, नयी दिल्ली-११००५९) अत्र काव्ये १३५६ पद्यानि सन्ति । एतेषु १३५६ पद्येषु श्रीवासिष्ठेन पूर्वं सत्याग्रहनीतिकाव्ये प्रोक्तानि किञ्च सत्यभाष्ये 'भवति चात्रास्माक'मिति वाक्यानुगतानि सिद्धान्तप्रतिपादकानि ३०१, ३०२, ७८०, तमानि पद्यान्यप्यन्तर्भूतानि । एतेषां पूर्वोक्तताज्ञापनायैतानि कोष्ठकेषु निहितानि । ततः पूर्वं २० पद्यानि **'प्रस्तावना-विंशति'**-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीर्षकेण [illegible] विष्णुकाव्यस्य पद्येषु सत्यभाष्यस्य सारसारो निहितोऽस्ति । भाष्यकारस्यात्र रचनाकर्तृरूपं सुतरां प्रत्यक्षीकर्तुं शक्यते । आर्षकाव्यमिदं, मुक्तकान् क्रमबद्धतया, मुक्तकच्छटया प्रबन्धश्रिया चान्वितम् । पद्येषु गभीराशयानां वैशद्याय पादटिप्पण्योऽपि मूलग्रन्थमनु संयोजिताः ।

विष्णुसहस्रनामस्तोत्रस्य प्रत्येकं नाम्नः सत्यभाष्यानुयायिनी संक्षिप्ता पद्यात्मिका विवृतिरत्र प्राप्यते । एक एव विष्णुः ऋषिभिर्बहुभिर्मन्त्रैर्गीतोऽस्ति । **'एकं सद्विप्रा बहुधा वदन्ती'**ति श्रुतिरत्र प्रमाणम् । ब्रह्मर्षिणा श्री १०८ पं॰ सत्यदेववासिष्ठेनाप्यत्र विष्णुकाव्येऽनादिनिधनो विश्वरूपो विष्णुः बहुधा छन्दोभिर्गीतः । विष्णुकाव्यकर्तुः सर्वप्रियं छन्द उपजातिरस्ति । इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणेन उपजातेरधोदत्ता भेदाः कविना प्रयुक्ताः । तद्यथा :-

| छन्दोनाम | प्रथमश्चरणः | द्वितीयश्चरणः | तृतीयश्चरणः | चतुर्थश्चरणः |
|---|---|---|---|---|
| (१) **कीर्तिः** | उपेन्द्रवज्रा | इन्द्रवज्रा | इन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं १५-३५-४५ तमानि पद्यान्यवलोकनीयानि।) | | | | |
| (२) **वाणी** | इन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं ६ संख्याकं पद्यमवलोकनीयम् ।) | | | | |
| (३) **माला** | उपेन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं २-२४ तमे पद्ये द्रष्टव्ये) | | | | |
| (४) **शाला** | इन्द्रवज्रा | इन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं पञ्चमं (५) पद्यमवलोकनीयम् ।) | | | | |
| (५) **हंसी** | उपेन्द्रवज्रा | इन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं २९ संख्याकं पद्यं द्रष्टव्यम् ।) | | | | |
| (६) **माया** | इन्द्रवज्रा | उपेन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं १३८ पद्यमवलोकनीयम्।) | | | | |
| (७) **जाया** | उपेन्द्रवज्रा | उपेन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा |
| (उदाहरणार्थं २०-६३-८२६-८२९ तमपद्यानि द्रष्टव्यानि) | | | | |
| (८) **बाला** | इन्द्रवज्रा | इन्द्रवज्रा | इन्द्रवज्रा | उपेन्द्रवज्रा |
| (उदाहरणार्थं ५७ तमं पद्यमवलोकनीयम्।) | | | | |
| (९) **आर्द्रा** | उपेन्द्रवज्रा | इन्द्रवज्रा | इन्द्रवज्रा | उपेन्द्रवज्रा |
| (उदाहरणार्थं ४-३४-३६ तमपद्यानि द्रष्टव्यानि ।) | | | | |
| (१०) **भद्रा** | इन्द्रवज्रा | उपेन्द्रवज्रा | इन्द्रवज्रा | उपेन्द्रवज्रा |
| (उदाहरणार्थं १, १३, १७, २२, ३० पद्यानि अवलोकनीयानि ।) | | | | |



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(११) **प्रेमा** उपेन्द्रवज्रा उपेन्द्रवज्रा इन्द्रवज्रा उपेन्द्रवज्रा
(उदाहरणार्थं २७-६५ तमे पद्ये विलोकनीये ।)
(१२) **रामा** इन्द्रवज्रा इन्द्रवज्रा उपेन्द्रवज्रा उपेन्द्रवज्रा
(उदाहरणार्थं ३३ तमं पद्यं द्रष्टव्यम्।)
(१३) **ऋद्धिः** उपेन्द्रवज्रा इन्द्रवज्रा उपेन्द्रवज्रा उपेन्द्रवज्रा
(उदाहरणार्थं २३ तमं पद्यमवलोकनीयम्)
(१४) **सिद्धिः** इन्द्रवज्रा उपेद्रवज्रा उपेन्द्रवज्रा उपेन्द्रवज्रा
(उदाहरणार्थं ७-२१-४० तमानि पद्यानि द्रष्टव्यानि।)

वंशस्थेन्द्रवंशयोस्सम्मिश्रणेन 'माधव' नाम्नी उपजातिः सिद्ध्यति। कविना वंशस्थेन्द्रवंशन्द्रवज्रोपेन्द्रवज्रामेलनेनोपजातेरधोदत्ताः प्रकाराः प्रस्तुताः–

(१) वंशस्थम् उपेन्द्रवज्रा इन्द्रवंशा उपेन्द्रवज्रा
(उदाहरणार्थं २६ तमं पद्यं द्रष्टव्यम् ।)
(२) वंशस्थम् उपेन्द्रवज्रा इन्द्रवज्रा उपेन्द्रवज्रा
(उदाहरणार्थं ३२ तमं पद्यमवलोकनीयम् ।)
(३) वंशस्थम् वंशस्थम् इन्द्रवंशा उपेन्द्रवज्रा
(उदाहरणार्थं ३१ तमं पद्यं दृश्यम् ।)
(४) वंशस्थम् वंशस्थम् उपेन्द्रवज्रा इन्द्रवज्रा
(उदाहरणार्थं ७४ तमं पद्यं निभालनीयम् ।)
(५) इन्द्रवंशा वंशस्थम् इन्द्रवज्रा उपेन्द्रवज्रा
(उदाहरणार्थं ३७ तमं पद्यं विलोक्यम् ।)
(६) इन्द्रवंशा वंशस्थम् उपेन्द्रवज्रा इन्द्रवज्रा
(उदाहरणार्थं ८२८ तमं पद्यमवलोकनीयम् ।)

एवमेवान्ये भेदा अपि पाठकैः स्वयं ज्ञेयाः ।

कविना उपजातिमतिरिच्य वंशस्थम् (यथा ८-२८-३९-४७ तमेषु पद्येषु), इन्द्रवज्रा (१०-१८-२४-२५-८८ तमेषु पद्येषु), उपेन्द्रवज्रा (३८-४३-७८-७९२ तमेषु पद्येषु), वसन्ततिलका (८७-१३५६ तमयोः पद्ययोः) अनुष्टुप् (९-८०-९३५-१३५७ तमेषु पद्येषु), शार्दूलविक्रीडितम् (११५७-१२९५ तमयोः पद्ययोः) इत्येतानि वृत्तान्यपि प्रयुक्तानि । कविना छन्दोरचनायां शास्त्रानुमतं पादान्तदीर्घत्वं नैकत्राङ्गीकृतम् । छन्दोरचनायां केचनार्षाः प्रयोगा अपि दृश्यन्ते (यथा ३, १२, ४२४ तमेषु पद्येषु)।

विष्णुकाव्यस्य भाषा सरलास्ति किन्त्वनेकत्र प्रसङ्गगर्भकता तत्र विद्यते यस्या आशयं ज्ञातुं सत्यभाष्यमपि पठनीयमस्ति । क्वचित्पद्येषु वेदमन्त्रांशा अनुस्यूताः


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ति । तथा सम्यग् ज्ञानाय सम्पूर्णा सामग्री ज्ञेयः । अस्यार्षकाव्यस्य पठनेन ज भक्तिरसं ज्ञानगौरवमध्यात्मदर्शनञ्चैकत्रैव लब्धुं समर्थश्चेत्तस्य चेतसि भगवन्तं प्र श्रद्धा किञ्च देववाण्यां सामान्यापि गतिः स्याताम् । रचनाकर्तुः द्वादशवर्षा तपःस्वाध्यायपरता विष्णुकाव्ये प्रतिपदं साक्षात्कर्तुं शक्यते ।

## सत्याग्रहनीतिकाव्यस्य प्रस्तुतं संस्करणम्

सत्याग्रहनीतिकाव्यस्य तृतीयावर्तनं २०४३ तमे वैक्रमेऽब्दे (१९८६) प्रकाशितम् पं॰ रुद्रदेवत्रिपाठिकृतहिन्दीभाषानुवादसहितं प्रथमं संस्करणं २०१५ तमे वैक्रमेऽ (१९५८ ई.) दीपावल्यां प्रकाशितम् । ग्रन्थकृता परिष्कृतं द्वितीयं संस्क प्रथमतृतीयसंस्करणयोर्मध्ये प्रकाशितं जातमिति तृतीयावर्तनस्य प्रकाशकीयेन वक्तव् ज्ञायते । कविनास्य काव्यस्य रचना १९३८ तमे ख्रीष्टाब्दे भाग्यनगर (हैदराबाद)-कारा समारब्धा । चतुर्दशवर्षाणि यावदस्य तेन संशोधनं कृतम् । विदुषां पुरतश्च श्रावितम् । सप्ततन्त्र्यामपि गीतम् । इत्थमस्य काव्यस्य प्रारम्भकालात् विंशतिवर्षानन्त प्रथमं प्रकाशनमभूत् । ग्रन्थकृतैव प्राक्तनसंस्करणानि प्रकाशितानि । अत चतुर्थसंस्करणस्यापि च प्रकाशनं ग्रन्थकृतैव क्रियते ।

अस्मिन् संस्करणेऽनेकत्र कविना सहृदयसम्मतं पाठ-परिवर्तनं कृतम् पञ्चमाध्यायस्य 'परमायुषीय' नाम्नो द्वितीयपादात् त्रयस्त्रिंशत्तमः श्लोकः (५/२/३३): **'नासया तैलमाकृष्ये'** त्यादि ग्रन्थकृता निरस्तः । अतोऽस्मिन् संस्करणे **'परमायुषीय** पादस्य श्लोकसंख्या एकपञ्चाशत् (५१) संवृत्ता । तदनुसारमेव त्रयस्त्रिंशत्तमात्पद्यात सर्वेषामपि पद्यानां संख्या परिवर्तिता ।

अस्मिन् संस्करणे ग्रन्थस्य त्रयः खण्डा सन्ति–**प्रस्तावना-खण्डः**, (२ **काव्य-खण्डः, (३) परिशिष्टखण्डश्च**। प्रत्येकं भागस्य पृष्ठसंख्या १तः प्रारभ्य काव्यखण्डस्य विषयानुक्रमणिकायां पृष्ठसंख्या 'क-ठ'-रूपेण दत्ता।

प्रस्तावनाखण्डे संस्कृतभाषानिबद्धा सामग्री दीयते यस्यां सम्पादकीयं, डा रुद्रदेव त्रिपाठि-विरचिता प्रथमसंस्करणस्य **'रम्याणि वीक्ष्ये'** त्येतच्छीर्षकाङ्कि प्रस्तावना, ग्रन्थकर्त्तुरात्मनिवेदनं, पर्यालोचकान् प्रति निवेदनञ्चान्तर्भवन्ति चतुर्थसंस्करणस्य सम्पादनकाले, प्रथमसंस्करणस्य-सम्पादकः किञ्च सत्याग्रहनीति काव्यस्य राष्ट्रभाषानुवादकर्ताऽद्यत्वे च उज्जयिनीस्थबृजमोहनबिड़लाशो केन्द्रमलङ्कुर्वाणः कवि-सम्पादक-विबुधश्रेष्ठो डा॰ रुद्रदेवत्रिपाठिमहाभागो **'रम्याणि वीक्ष्ये'** त्यादिशीर्षकालङ्कृतायां प्रस्तावनायां यथापेक्षं परिवर्तनं परिवर्धनं वा क पृष्ट आसीत् किन्तु तेन यथापूर्वमेव तस्याः प्रकाशनमिष्टम् । अतः सा भूमिक यथापूर्वमेव प्रकाश्यते। केवलं तस्या मुद्रणगतदोषाणां परिहारस्य प्रयासः क्रियते



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
काव्यखण्डे च रुद्रदेवत्रिपाठिकृतेन हिन्दीभाषानुवादेन साकं श्री १०८ पं० सत्यदेववासिष्ठप्रणीतं 'सत्याग्रहनीतिकाव्यं' स्वोपज्ञानन्तवृत्तिसंवलितं प्रकाश्यते।

परिशिष्ट-खण्डे च कवे: **'नोच्चैरुत्पत रे'** इत्येच्छीर्षिका गीति:, सत्याग्रहनीतिकाव्यस्य अकारादिक्रमेण पद्य-सूची, विदुषां सम्मतयश्च दीयन्ते। श्लोकानुक्रमणिका पूर्वं पृथक्श: प्रकाशिताभूत्। अस्मिन् संस्करणे यथावश्यकं संशोध्य सा परिशिष्ट-खण्डे दीयते। हिन्दी-भाषा-माध्यमेन निबद्धा सामग्री अप्यत्र दीयते यत्र पं० युधिष्ठिरमीमांसक-लिखित: कवि-परिचय:, डा० रामेश्वरदत्तशर्मकृत: **'संस्कृत साहित्य का अमर काव्य सत्याग्रहनीतिकाव्य'** इत्येतच्छीर्षको लेख:, डा० रुद्रदेवत्रिपाठिकृतप्रस्तावनाया हिन्दीभावानुवाद: डा० सुरेन्द्र कुमार 'अज्ञात'कृता च **'प्रशस्ति'** अन्तर्भवन्ति।

**वर्तनी**

अस्माभि: ह्रस्वेकार-मात्रा (ि) संयुक्ताक्षरात् पूर्वमेव स्थाप्यते। **'विद्वद्भि:' 'अङ्घ्रि:' 'षट्त्रिंशत्'**-इत्यादिरूपेण मुद्रितानि रूपाणि अस्माभिर्नादृतानि। **'हलोऽनन्तरा: संयोग:'** इति नियमानुसारमज्भिरव्यहिता हल: संयोगसंज्ञां लब्ध्वा एकं संयुक्ताक्षरं निर्मान्ति । यदि **'विद्वद्भि:' 'अङ्घ्रि:' 'षट्त्रिंशत्'** इत्येवंलेखितेषु संयुक्ताक्षरेषु संयोगात्पूर्वमेव मात्रा स्थाप्यते तर्हि अक्षरयोजनायां सारल्यस्य हेत्वाभासान्तरस्य वानुरोधात् कथम् अज्भिरव्यवहितानां हलां मध्ये स्वररूपिणी मात्रा निधीयेत? अतोऽस्माभि: **'विद्वद्भि:' 'अङ्घ्रि:' 'षट्त्रिंशत्'**-इत्यादीनि ह्रस्वेकारयुतानि रूपाणि अभ्युपगतानि। हलन्तवर्णस्य पृथक्पदान्तस्थत्वे तु हलन्त-वर्णानन्तरमपि ह्रस्वेकारमात्रामभ्युपगच्छाम:, यथा 'देववाणी-परिषद्, दिल्ली' त्यत्र 'षट् त्रिंशच्च जना' इत्यत्र वा। अस्मिन् विषये बहुभिर्विद्वद्भिस्सहास्माकं चर्चा जाता तैश्चास्माकं चेष्टितं पुष्टम्। सङ्गणकयन्त्रे पञ्चमवर्णसंयुक्ताक्षराणि सुलभानीति कृत्वा 'ङ्क' 'ङ्ग' 'ञ्च'-प्रभृतीन्यक्षराणि यथाशक्यं प्रयुक्तानि। अस्माभि: पञ्चमवर्णाभावे-ऽनुस्वारोऽपि स्वीक्रियते किन्तु संस्कृते वरीयान् भाव: पञ्चमवर्णसंयुक्ताक्षरेभ्य एव दीयते। हिन्द्यां प्रायोऽनुस्वारस्यं प्रचलनमस्तीति तमप्युपगच्छाम: । किन्तु हिन्द्यामपि यदि कश्चिल्लेखक: पञ्चमवर्णं प्रयुङ्क्ते तर्हि तस्यापि प्रत्याख्यानं न कुर्म:।

ग्रन्थस्य निर्धारितसमयानुसारं प्रकाशनं तु प्रबन्धसम्पादकोपप्रबन्धसम्पादकयो: श्रीमहेशकुमार-श्रीआनन्दकुमारयोरतन्द्रितप्रयासानामेव फलमस्ति। उभावप्येतावभि-नन्दनीयौ स्त:।

'दूर्वा' संस्कृतपत्रिकाया आद्येन सम्पादकेन 'मृत्कूट'-'स्नेहसौवीर'-प्रभृत्यनेक-ग्रन्थकर्त्रा दोषज्ञशिरोमणिना त्रिपाठिना डा० भास्कराचार्येण सूक्ष्मेक्षिकया ग्रन्थोऽयमाद्यन्त-


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मवलोकितः किञ्च दोषाणामपहाराय यथाशक्यं प्रयत्नः कृतः। तदर्थमसावस्मत्साहित्य-बन्धुरभिनन्दनीयोऽस्ति। श्रीमता त्रिपाठिभास्कराचार्येण ग्रन्थावलोकनानन्तरं स्वोद्गारा अस्मिन् पद्ये निहिताः

**वासिष्ठसूरिः कविसत्यदेवः स्वातन्त्र्यसङ्ग्रामवदान्यसेवः ।**
**प्रणीतवान् विश्वजनानुभाव्यं सुरम्य-सत्याग्रहनीतिकाव्यम् ॥**

(त्रिपाठिनो भास्कराचार्यस्य)

एतत्पङ्क्तिलेखकेन बाल्ये संस्कृतं पठितमासीत्। विगतचतुस्त्रिंशद्भ्यो वर्षेभ्यः संस्कृताभ्यासो हिन्दी-भाषा-साहित्याध्यापनेन आच्छादितः,; अत एवास्य संस्कृतभाषापि बहुत्र हिन्दी-सदृशी एव जायते । अद्यत्वेऽपि च सन्ति बहवो विद्वांसो ये पाणिनीयमनुशासनमक्षरशः पालयितुं क्षमाः। तेषां कृतेऽस्मादृशानां संस्कृतभाषा या बहुत्र सन्धिनियमान् अनिवार्यत्वेन न पालयति, शिथिलेव प्रतीयेत। तथापि **'अकरणान्मन्दकरणं श्रेयः'** इत्युक्तिमनुसृत्य देववाण्यां गद्ये पद्ये वाऽनेन जनेन किमपि लेखितुं प्रयासः क्रियते। किञ्च कृतेऽपि प्रयासे मुद्रणगतदोषाणामत्यन्ताभावं न भवति। न कोऽपि ग्रन्थकर्ता, प्रकाशकः, संशोधकः, सम्पादको वा मुद्रणगतान् दोषान् ग्रन्थे सादरं स्थापयितुं वाञ्छति, अतः पौनःपुन्येन तद्विलोपार्थं यतते। किन्तु ग्रन्थप्रकाशनानन्तरं सूपे पाषाणकण इवाविर्भूय मुद्रणदोषो ग्रन्थास्वादविघ्नं करोत्येव। अतो भाषागतदोषाणां मुद्रणगतदोषाणां च कृते नतशिरस्कः सन्नहं विदुषः क्षमां याचे।

चतुर्थं संस्करणमिदं ग्रन्थकर्तुः, हिन्दीभाषानुवादकर्तुश्च साक्षित्वे प्रकाश्यते-इत्यस्ति महान् प्रमोदहेतुः । अहमुभावपि सश्रद्धं प्रणमन्निदं सम्पादकीयमुपसंहरामि।

देवप्रबोधनी वि०सं० २०५३ ।
२१-११-१९९६
**'रमालयः'** आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः
**अर्वाचीनसंस्कृतस्य**
अस्य च ग्रन्थस्य



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# संस्कृत-जगद्वार्ता:

(१) अ० भा० **प्राच्यविद्यासम्मेलनस्य उनचत्वारिंशमधिवेशनं** वडोदरानगरे एम. एस. युनिवर्सिटी-ओरियण्टलइन्स्टीट्यूटेन १३-१५.१०.१९९८ तारिकासु समायोजितम् यत्र आधुनिकसंस्कृतसाहित्यानुभागे षष्टिप्राया: शोधलेखा प्रास्तूयन्ता । एतदतिरिक्तमनेकै: कविभिस्स्वकीयानां संस्कृतरचनानां पाठोऽपि कृत:। अर्वाचीनसंस्कृतस्य प्रधानसम्पादकेन डा० रमाकान्तशुक्लेनास्याषुभागस्याध्यक्ष्यं निर्व्यूढम्। तेनाध्यक्षीयभाषणे विगतवर्षद्वये प्रकाशितानां संस्कृतरचनानां विस्तृतं सूचनाप्रधानं विवरणमुपन्यस्तम् । 'चेन्नई' नगर्यां २००० तमेऽब्दे चत्वारिंशत्तमेऽधिवेशने आधुनिकसंस्कृतसाहित्यानुभागस्याध्यक्षरूपेण 'अभिराज' डा० राजेंद्रमिश्रो निर्विरोधं निर्वाचितो जात: । सम्मेलनस्य सफलायोजनार्थं स्थानीयसचिवो डॉ० राजेन्द्रनानावटी वर्धापनमर्हति।

-आनन्दवर्धन:

(२) **'समन्वय सन्दर्भ'-नाम्नी राष्ट्रिया संगोष्ठी सम्पन्ना**-(१६-१७.१.९९) जनवरी मासे षोडश-सप्तदशयोर्दिवसयोर्मध्यप्रदेशसंस्कृताकादमी चम्बलजनपदान्तर्वर्तिनो 'भिण्ड'-नगरस्य 'लोकसंस्कृति, संस्कृत व जनकल्याण- परिषद्' इत्येतस्या: संस्थाया: सहयोगेन **'संस्कृतवाङ्मये राष्ट्रियैकताया अखण्डतायाश्च सूत्राणी'**ति विषयमवलम्ब्य 'भिण्ड'नगरे प्रथमवारं एकां राष्ट्रियसंगोष्ठीं समायोजयत्। महर्षिवैदिकविश्वविद्यालयजबलपुरस्य कुलसचिव: डॉ० गोपालकृष्णदवे मुख्यातिथिरूपेण, दिल्लीनगर्या: सेण्टस्टीफन्समहाविद्यालयस्य डा० चन्द्रभूषणझा: विशिष्टातिथ्येन, उज्जैनस्थ: प्रो० केदारनारायणजोशी सारस्वतातिथिरूपेण, मैसूरस्थप्राकृतपालिशोधसंस्थाननिदेशको डॉ० भागचन्द्रजैन आध्यक्ष्येण संगोष्ठ्यां व्यराजन्त। शोधपत्राणां सत्रद्वये प्राय: चत्वारिंशत्पत्राणि प्रस्तुतानि। प्रथमस्य शोधपत्रस्याध्यक्ष्यं डा० चन्द्रभूषणझामहोदयेन अपरसत्रस्य चाध्यक्ष्यं डॉ० केदारनारायणजोशिमहाभागेन निर्व्यूढम्। समारोहस्याङ्गत्वेनैक: कविसमवायोऽप्यायोजितो यस्य सञ्चालनं संस्कृतस्य सुकवि: डॉ० इच्छारामद्विवेदी 'प्रणवो' व्यदधात्। अकादमीसचिव: डॉ०भगवानस्वरूपशर्मा 'चैतन्य:', संगोष्ठी-समायोजक: डॉ० ओम्प्रकाशशर्मा च सर्वेषां समुपस्थितानां विपश्चितां स्वागतं व्याहरताम्। भिण्डनगरस्थकुसुमबाईजैनमहाविद्यालयस्य संस्कृतप्राध्यापिका डा० आशा शर्मा सर्वेभ्य एव जनेभ्यो लेखनी-दैनन्दिनी-कर्गलवेष्टनादिकानुपहारानुपाहृतवती। कार्यक्रमस्य सञ्चालनं सुश्री अनुपमा शर्मा व्यदधात्।

-सुश्री साधना शर्मा, भिण्ड, मध्यप्रदेश:

(३) **केन्द्रीयसंस्कृतप्रतियोगितासमारोह: सम्पन्न:**-दिल्लीसंस्कृताकादमी फरवरीमासस्य षष्ठेऽहनि स्वीयकार्यालयपरिसरं केन्द्रीयसंस्कृतप्रतियोगितासमारोहं समायोजितवती। प्रतियोगितायां गतनवम्बरमासे समायोजितासु दिल्लीशिक्षा-निदेशालयीय-नव(९)-


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मण्डल-शिक्षालयीयासु विभिन्नस्पर्धासु ... प्रतियोगिनो भागं गृहीतवन्तः। 
Digitized by Arya Samaj Foundation Chennai and eGangotri
च विभिन्नानां ४५ विद्यालयानां २५० छात्रा आसन्। समारोहस्याध्यक्षो दिल्ल्यां पूर्वपार्षदः श्री कुलानन्दभारतीयो मुख्यातिथिश्च डॉ० जनार्दनद्विवेदी आस्ताम्। कार्यक्रमस्य सञ्चालन अकादमीसचिवः श्री श्रीकृष्णसेमवालो व्यदधात्। समारोहे बहवः संस्कृतविद्वांसः, छात्राः अभिभावकाश्च समुपास्थिताः अभूवन्। प्रतिस्पर्धाणां निर्णेतृत्वेन डॉ० चन्द्रभूषणझा, डॉ० रमणकुमारशर्मा, श्री श्रीधरप्रसादबलूणी, श्री ओम्प्रकाशठाकुरः, डॉ० सुषमाकुलश्रेष्ठः, डॉ० प्रवेश सक्सेना चात्र समवेता आसन्।

–'प्रभाकर' रामरत्न शास्त्री, संस्कृतामृतसम्पादकः, दिल्ली

**(४) भवभूतिसमारोहः समायोजितः**–फरवरीमासस्य पञ्चविंशतितिथित सप्तविंशतितिथिपर्यन्तं ग्वालियर-नगरेऽखिलभारतीयो भवभूति-समारोहः समायोजितः। समारोहस्य मुख्यातिथिः संस्कृतस्य सुप्रथितो विद्वान् पण्डितगुलामदस्तगीरविराजदार आसीत्। देशस्य नानादिग्विभागेभ्यः समागतैः प्रायः पञ्चाशद्भिर्विद्वद्भिर्महाकवि- भवभूतिविषयकानि शो पत्राणि प्रस्तुतानि। जीवाजीविश्वविद्यालस्य 'गालव'-सभागारे समायोजितस्य प्रथमशो पत्रस्य आध्यक्ष्यं दिल्लीतः समागतेन संस्कृतवार्ताप्रवाचकेन सेण्टस्टीफन्समहाविद्यालयप्राध्यापके डॉ० चन्द्रभूषणझामहोदयेन, विशिष्टातिथ्यं च मध्यप्रदेशसंस्कृताकादम्याः पूर्वसचिवेन डॉ० भास्कराचार्यत्रिपाठिना व्याहृते। द्वितीयेऽहनि सर्वे विद्वांसः कविभवभूतेः कर्मस्थलीभूता पवाया-डबरा-कालप्रियानाथमन्दिरादि- क्षेत्राणां निरीक्षणं कृतवन्तः। समारोहस्य सारस्वतातिथि सागरविश्वविद्यालयादागतः प्रो० राधावल्लभो त्रिपाठी पवाया-ग्रामे समायोजितायां संगोष्ठ्य जनानुदबोधयत्। अकादमीसचिवः डॉ० चैतन्यः, भवभूतिसमितेरध्यक्षः डॉ० दिवाकर विद्यालंकार जीवाजीविश्वविद्यालयस्य छात्रकल्याणाधिष्ठाता डॉ० धीरेन्द्रसिंहचन्देलश्च सर्वेषां विदुषां स्वागतं व्यदधुः। तृतीये दिवस आयोजितस्य शोधसत्रस्य आध्यक्ष्यं मैनपुरीतः समागतेन डॉ० इच्छारामद्विवेदिना निर्व्यूढम् । तदनु स्थानीयप्रशासनपक्षतः सर्वेषामेव विपश्चि प्रावारकवस्त्र-नारिकेलफलादिप्रदानेन सत्कारोऽनुष्ठितः। अवसरेऽस्मिन् एक संस्कृतकवि-समवायोऽप्यायोजितः। जीवाजीविश्वविद्यालयस्य कुलपतिना प्रो० राधारमणदासे ग्वालियरनगरे 'भवभूति-पीठ'स्य संस्थापनमुद्घोषितम्। अनेन पीठेन भवभूतिविषयक एक (Bibliography इति) सन्दर्भग्रन्थो विरचयिष्यते।

–डॉ० आशा शर्मा, कुसुमबाईजैनमहाविद्यालयः, भिण्ड, मध्यप्रदेश

**(५) संस्कृतस्य विकासोपायविषयिणी परिचर्याऽऽयोजिता**–मार्चमासस्य पञ्चमेऽहनि (५-३-९९ ई०) दिल्लीसंस्कृताकादम्या 'पुरानासचिवालय'-सभागारे एक सम्मानसमारोहः समायोजितः। अस्मिन् समारोहे दिल्लीसंस्कृताकादमीसंस्थापक- सदस्य सम्प्रति दिल्लीप्रशासने खाद्यापूर्तिविकासमन्त्री डॉ० योगानन्दशास्त्री, एकोऽपरो विधायक श्री रमाकान्तगोस्वामी च स्वीयसंस्कृतानुरागार्थं बहुमानितौ। समारोहस्याध्यक्ष्यं मुख्यमन्त्रिपदा


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
रूढया शीलादीक्षितमहाभागया विहितम्। एतत्सम्मानसमारोहानन्तरं संस्कृतभाषाया विकासोपायविषय एका परिचर्चाऽऽयोजिता। परिचर्चायाम् आध्यक्ष्यं प्रो० अवनीद्रकुमारेण, मुख्यातिथित्वं डा० शिवनारायणशास्त्रिणा, विशिष्टातिथ्यञ्च प्रो० सत्यदेवचौधरिणा व्याहृतानि। प्रमुखवक्तृषु डॉ० धर्मा, डॉ० सुन्दरी सिद्धार्थः, डॉ० शशितिवारी, संस्कृतामृतसम्पादकः श्री रामरत्नशास्त्री, प्र० थानेशचन्द्र उप्रेती, डॉ० चन्द्रभूषणझाः, श्रीमती स्वराज गुप्ता, श्री ओम्प्रकाश ठाकुरश्चान्यतमे आसन्।

–डा० श्रीमती स्वराज गुप्ता, रामजस विद्यालयः, पूसा रोड, नयी दिल्ली

**(६) संस्कृतसम्भाषणशिबिरस्यायोजनम्**–देववाणी-प्रचाराय कृतैक- निश्चयया 'संस्कृत-भारती'-ति संस्थया 'पूसा रोड'-स्थिते 'रामजस'-विद्यालये १९.०३.९९तः ३०. ०३.९९तमीं तिथिं यावद् बालानां हिताय एकं संस्कृतसम्भाषणशिबिरम् आयोजितम्। शिबिरोद्घाटनोवसरे संस्कृतभारत्या स्वयंसेवकः श्रीविनायकः अवादीद् यत्संस्कृतभाषाऽस्माकं चेतसां भाषा वर्तते। विशिष्टातिथिः डॉ० चन्द्रभूषणझाः संस्कृतसम्भाषणे छात्रैः छात्राभिश्च पाटवमर्जयितुम् अङ्गीकरणीयोपायविषये विस्तरेण प्राभाषत। उद्घाटनसमारम्भावसरस्य मुख्यातिथिः श्रीमती वेदवती धींगरा संस्कृतस्य महत्त्वविषये व्यज्ञापयत्। विद्यालयस्य प्रधानाचार्या श्रीमती मोहिनी बिन्द्रा समेषां समवेतानां अभ्यागतानां स्वागतं व्याहरत्। कार्यक्रमस्य संयोजनं विद्यालये संस्कृतम् अध्यापयन्त्या श्रीमत्या स्वराजगुप्तया समनुष्ठितम्। समारम्भस्य सञ्चालनं नवमकक्षायाः छात्रया महत्कौशलेन सम्पादितम्।

–डा० श्रीमती स्वराज गुप्ता, रामजस विद्यालयः, पूसा रोड, नयी दिल्ली

**(७) पण्डितबलदेवोपाध्यायजन्मशताब्दसमारम्भः**–'जीवेम शरदः शतम्' इति वैदिकीं ऋचमनुसरन्तः संस्कृतस्य सुप्रथिता विद्वांस वाराणसेयाः पण्डिताः बलदेवोपाध्यायवर्य्याः सम्प्रति शतवर्षीयाः संवृत्ताः। तेषां जन्मनः शताब्दपूर्त्तिं समायोजितुं समितिरेका विरचिता। समायोजनस्याङ्गत्वेन **फरवरीमासस्य द्वितीये सप्ताहे वाराणस्यमेका** त्रिदिवसीया 'पुराण-संगोष्ठी' समायोजिता। आचार्योपाध्यायस्य शिष्यवरः काशिराजोऽपि समारम्भेऽस्मिन् समुपस्थाय स्वीयानि संस्मरणानि अश्रावयत्। निखिलेऽपि भारतवर्षे नैके कार्यक्रमाः समायोक्ष्यन्त इति सूच्यते।

**(८) राजधान्यां स्वप्नवासवदत्तं मञ्चितम्**–फरवरीमासस्य पञ्चदशेऽहनि राजधान्यामिन्द्रप्रस्थमहाविद्यालयस्य छात्राभिः स्वीयमहाविद्यालयीये प्रेक्षागृहे महाकवि- भासविरचितस्य स्वप्नवासवदत्तस्य मञ्चनमनुष्ठितम्। सप्ताहानन्तरम्, द्वाविंश्यां तिथौ रूपकस्यापरमपि मञ्चनं 'सफदर हाशमी'-मार्गस्थिते 'श्रीराम सेण्टर'-प्रेक्षागृहे समायोजितं यत्र भारते नेपालदेशस्य राजदूतो डॉ० भैरव बी० थापामहोदयो मुख्यातिथ्येन व्यराजत। डॉ० सुशीला अम्बिकेमहोदयाया निर्देशने डॉ० वन्दिता मधुहासिनी अरोड़ा- महोदयायाश्च सहनिर्देशने रुचिरतयाऽऽयोजितस्यास्य


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
मञ्चनद्वयस्य वैशिष्ट्यमेतदासीत् यदुदयनवसन्तकयौगन्धरायणादीनां पुरुषपात्राणामपि भूमिक छात्राभिरेव निर्व्यूढा। ध्यातव्यमिदं यदिन्द्रप्रस्थमहाविद्यालयस्य स्थापनाया अमृतजयन्तीमहोत्स भारतीयविद्याभवनस्य संस्थापनाया हीरकजयन्तीमहोत्सवं चाभिलक्ष्योभयोः संस्थयं सौजन्येनैतन्मञ्चनमायोजितमासीत्।

**( ९ ) तिरुपतिविद्यापीठस्य दीक्षान्तसमारोहः सम्पन्नः**—मार्चमासस्य नवम्यां तिः (९-३-९९ ई०) तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य चतुर्थो दीक्षरुन्तसमारोहः सम्पन्न तत्रान्ध्रदेशराज्यपालो डॉ० सी० रंगराजन्-महोदयो मुख्यातिथिरूपेण व्यराजत। अवसरेऽस्मि विद्यापीठकुलाधिपतिः डॉ० वी० आर्० पञ्चमुखी संस्कृतस्य विश्रुतविदुषे प्रो० सत्यव्रतशास्त्रि 'महामहोपाध्याय'इति विरुदं समार्पयत्।

**( १० ) संस्कृतविद्वद्भ्यो नागरालंकारणानि प्रत्तानि**—मार्चमास त्रयोविंशेऽहनि राजधान्यां राष्ट्रपतिभवने समायोजित एकस्मिन्भव्यसमारम्भे राष्ट्रस्य द्विषष्टिमिते विशिष्टनागरिकेभ्यो नागरालंकरणानि समर्पितानि। एषु त्रयः संस्कृतविद्वांसो वर्तन्ते। प्र विद्यानिवासमिश्रमहोदयाय 'पद्मभूषणं' प्रदत्तम्। प्रो० सत्यव्रतशास्त्रिमहोदयः 'पद्मश्री'रित्यलङ्क बहुमानितः। अपरोऽप्येकः संस्कृतविपश्चित् 'पद्मश्री'रित्य- लङ्करणेन सत्कृतः।

**( ११ ) संस्कृतवर्षम्**—केन्द्रीयसंस्कृतमण्डलस्याभिसंस्तुती अभ्युपगत्य केन्द्रीयप्रशास प्रवर्तमानाब्दः 'संस्कृतसंवत्सर'रूपेणायोज्यते। मार्चमासस्याष्टादशे दिवसे (१८-३-९ दिल्लीनगर्या राष्ट्रियसंग्रहालयसभागारे संवत्सरारम्भावसरे न्याय- मूर्त्तिनः श्रीरंगनाथमिश्रस्याध्य मानवसंसाधनविकासमन्त्रिणो डॉ० मुरलीमनोहरजोशिनश्च मुख्यातिथ्ये भव्य उत्सव आयोजि अत्र बहवः संस्कृतानुरागिणः समवेता अभूवन्। संस्कृतसंवत्सरायोजनसमितौ प्र मण्डनमिश्र-प्रो०वाचस्पतिउपाध्याय-श्रीचमूकृष्ण शास्त्रि-श्रीरंगनाथमिश्रप्रभृतयः संस्कृत सुप्रथिता विद्वांसः सदस्यरूपेण विराजन्ते। संस्कृतभाषायाः सम्यक्प्रचाराय सकलस्मिन्नपि अशेषदेशे बहवः कार्यक्रमा आयोक्ष्यन्ते।

**( १२ ) संस्कृत—संस्कृति-साधनेति ग्रन्थो लोकार्पितः**—मार्चमासस्यैकोनविंशे दि (१९-३-९९) राजधान्यां 'रफी मार्ग'-स्थितस्य 'कॉन्स्टीट्यूशन क्लब'- सभागृ 'स्पीकर्स हॉल'-कक्षे भारतस्य पूर्वराष्ट्रपतिना डॉ० शंकरदयालशर्म 'संस्कृत-संस्कृति-साधने'ति ग्रन्थो जनेभ्योऽर्पितः। डॉ० कमल आनन्देन हिन्दीभा लिखिते खण्डद्वयात्मकेऽस्मिन् ग्रन्थे सुख्यातसंस्कृतविदुषः प्रो० सत्यव्रतशास्त्रिणः संस्कृता विस्तरेण परिशीलितमस्ति। पञ्जाबविश्वविद्यालयेन अमुं ग्रन्थमाश्रित्य डॉ० आनन्दाय 'डी०लि इत्युपाधिः प्रदत्तः।

**( १३ ) 'वाचस्पति'-पारितोषिकम् उद्घोषितम्**—के०के० बिड़ला-प्रति संस्कृतग्रन्थेभ्योऽनुवर्षं दीयमानं वाचस्पतिपारितोषिकमुद्घोषितमस्ति। ऐषमे राँचीवास्


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य वरिष्ठो विपश्चिद् डॉ० वनेश्वरपाठकमहोदयः पारितोषिकेनानेन सभाजयिष्यते। 'यीशुचरितम्' नाम स्वीयकाव्यग्रन्थार्थमसावस्मै पारितोषिकाय वृतः। 'यीशुचरितम्' नाम्नि ग्रन्थे 'बाइबिल'स्य संस्कृतकाव्यानुवादो विहितः।

**(१४) आचार्यब्रह्मदत्तवाग्मिनोऽभिनन्दनग्रन्थः प्रकाशितः**–हिन्दी- संस्कृतभाषयोः साधकस्य श्रीब्रह्मदत्तवाग्मिनः अभिनन्दनग्रन्थः प्रकाशितः। अस्य सम्पादकः प्रकाशकश्चास्ति हरियाणाराज्यस्य यमुनानगरजनपदान्तर्वर्तिनो 'रादौर'-नगरस्य एम्० एल्० एन्० महाविद्यालये संस्कृतप्राध्यापकः डॉ० हरिसिंह 'शास्त्रि'महोदयः।

**(१५) आकाशवाणीतः संस्कृतवार्त्ताप्रसारणस्य रजतजयन्ती**–ऐषमे जूनमासस्य त्रिंशत्तमायां तिथावाकाशवाणीतः संस्कृतवार्त्ताप्रसारणस्य पञ्चविंशतिर्वर्षाणि पूर्णानि भविष्यन्ति। ३०-०६-७४ तमे दिवसे आकाशवाणीतः संस्कृतवार्त्तानां प्रथमं प्रसारणं सञ्जातमासीत्। संस्कृतवार्त्तानां जनप्रियत्वमवेक्ष्य २१-०८-९४ तमीयाद् दिवसाद् दूरदर्शनेऽपि संस्कृतवार्त्ताप्रसारणं समारब्धम्। परञ्चाऽयं महद् दुखावहो विषयो यद् दूरदर्शने साप्ताहिकमेव संस्कृतवार्त्ताप्रसारणं भवति। ऐषमे संस्कृतवर्षे संस्कृतानुरागिभिरेवं प्रयतनीयं यद् दूरदर्शनतः प्रतिदिनं संस्कृतवार्त्ता प्रसारिता भवेत्। यथोर्दूवार्त्ताऽनुदिनं प्रसारिता भवति तथा प्रायः सर्वासामेव भारतीयभाषाणां जनन्यां संस्कृतगिरायां दैनिकवार्त्तानां प्रसारणमपेक्षितम्?

**(१६) एकादशं विश्वसंस्कृतसम्मेलनम्**–आगामिनि वर्षे २००० तमाब्दे-एप्रैलमासस्य तृतीयदिवसादष्टमं दिवसं यावद् इटलीदेशस्य 'तोरीनो' (तुरीन)-नगरे एकादशं विश्वसंस्कृतसम्मेलनं समायोक्ष्यते। अस्य त्रैवार्षिकसम्मेलनस्यायोजनं संस्कृता- ध्ययनस्य अन्ताराष्ट्रियसंघटनेन विधीयते।

–डॉ० चन्द्रभूषणझाः संस्कृतप्राध्यापकः सेण्टस्टीफन्समहाविद्यालयः, दिल्ली-११०००७
दूरभाषः ७२५६२२८ (आवासीयः)

**(१७) आचार्य बच्चूलाल अवस्थिने साहित्याकादमी पुरस्कारः**– 'प्रतापविजयिनी' काव्यरचनार्थमुज्जयिन्यां कृतवसतिराचार्यबच्चूलालोऽवस्थी १९९८ तमाय वर्षाय साहित्याकादमीपुरस्कारं प्राप। पुरस्कारोऽयमवस्थिमहाभागाय २३.२.१९९९ तमे दिनाङ्के रवीन्द्रभवनेऽदीयत।

–श्रीमती सरोज व्यासः

"देववाणी–परिषद्, दिल्ली"–कृते डा० रमाकान्त शुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली–११००५९ फोन : ५६४०३२४" इति मुद्रणालये मुद्रापयित्वा "आर–६ वाणी विहारः, नई दिल्ली–११० ०५९" तः प्रकाशितम्–अर्वाचीनसंस्कृतम् (२१/१–२) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.४.१९९९ अस्याङ्कस्य मूल्यम् रु० ३०.०० Rs. 30.00



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# देववाणी-परिषद्वार्ता:

(१) **देववाणी-परिषदस्त्रयोविंश: स्थापनादिवस:**–१३-१२-१९९८ तारिकायां 'रमालय:, आर ६, वाणी विहार:, नयी दिल्ली-११००५९' इत्यत्र सम्पन्नोऽभूद्यत्र विद्वदभिनन्दनं, विदुषां भाषणानि, पुरस्कारवितरणम्, काव्यपाठश्च आयोज्यन्त

कार्यक्रमस्य प्रारम्भो डॉ० रमाकान्त शुक्लविरचितया किञ्च कु० मीनू-निधि... वाणीवन्दनया सञ्जात:।

तदनु मुख्यातिथे: स्थानीयविधायकस्य श्रीमुकेशशर्मणो माल्यार्पणेन स्वागतम् परिषन्महासचिवेन डॉ० रमाकान्तशुक्लेन स्वागतभाषणं कुर्वता परिषद: कार्यकलापानां वि... प्रस्तुतम्।

तदनन्तरं दिल्लीसंस्कृताकादम्या संस्कृतसाहित्यसेवासम्मानेन सत्कृतस्य ... सुरेन्द्रनारायणत्रिपाठिन: किञ्च दयावतीमोदीपुरस्कारेण सम्मानितस्य वाणीविहारे कृतव... साहित्यकारस्य डॉ० रामदरशमिश्रस्य परिषत्पक्षतोऽभिनन्दनमक्रियत। अस्मिन्नवसरे मुख्याति... ताभ्यामौर्णप्रावारकं समार्प्यत। महासचिवेन परिषत्प्रकाशिता ग्रन्था उभाभ्यां समर्पिता:।

अस्मिन्नवसरे दिल्लीसंस्कृताकादमीसचिवाय श्रीकृष्णसेमवालमहोदयाय **'संस्कृतलो... सङ्ग्रहमहारथी'**ति विरुद: प्रादीयत।

मुख्यातिथिना परिषद: कार्यक्रमेषु गृहीतभागेभ्यश्छात्रेभ्य: पुरस्कारा: प्रमाणपत्राणि प्रादीयन्त। तेन स्वयंसेविसंस्कृतसंस्थानां संस्कृतप्रचारप्रसारार्थं भूमिका समुपश्लोकिता वि... दिल्ल्या: पब्लिकस्कूलेषु संस्कृतस्य पाठनं प्रचारश्च यथा भवेत्तथा कर्तुं दिल्लीसंस्कृताका... समाहूता। अस्मिन् कर्मणि सा देववाणी-परिषदादीनां संस्थानां सहयोगं लब्धुमपि तेन प्री...

अभिनन्दितैर्विद्वद्भि: स्वविचारा: प्रस्तुता:। डॉ० रामदरशमिश्रेण स्वकविता: पठि...

कार्यक्रमस्याध्यक्ष्यं परिषदुपाध्यक्षया श्रीमत्या रमाशुक्लया कृतम्।

(२) **'अभिराज' डॉ० राजेन्द्रमिश्रस्य काव्यपाठ:**–२०-१-१९९९ ई० तारि... 'रमालय:, आर ६, वाणी विहार, नयी दिल्ली-११००५९' इत्यत्र देववाणीपरिषदायोजि... काव्यपाठगोष्ठ्याम् 'अभिराज' डॉ० राजेन्द्रमिश्रेण 'स्तवमधु', शिवस्तव'श्चेति सर्वलघुवर्णा... काव्यद्वयं श्रावितम्। डॉ० भास्कराचार्यप्रणीत 'लघुरघु'-संज्ञकसर्वलघुवर्णकाव्यपरम्परामग्रे... डॉ० मिश्रेणेदं काव्यद्वयं २-९-१९९८–२०-९-१९९८ तारिकयो: प्रणीतमासीत्। एतदति... अपि लघुवर्णात्मिका रचनास्तेन सद्य एव प्रणीता:। काव्यगोष्ठ्या आध्यक्ष्यं डॉ० काशीनाथतिवा... संयोजनं च डॉ० रमाकान्तशुक्लेन कृतम्।

(३) दिल्ल्यां २३-२-१९९९ ई० तारिकायां देववाणीपरिषदध्यक्षो 'ज्ञानो... **आचार्यबच्चूलालअवस्थिमहाभाग: 'प्रतानिनी'-काव्ये साहित्याकादमीपुरस्... लब्धवान्** । २४-२-१९९९ ई० तारिकायां दिल्लीस्थे होटलनटराजे परिषन्महासचिवेन ... रमाकान्तशुक्लेन परिषत्पक्षत: अवस्थिमहाभागेभ्योऽभिनन्दं व्याहृतम् । (अभिनव:शुक्ल...



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

एकविंशे वर्षे तृतीयोऽङ्कः

कारगिल-विशेषाङ्कः

१५ जुलाई, १९९९

प्रकाशनतिथिः : ३१.७.१९९९

11/10/99
LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

राष्ट्रे जागृयाम
संस्कृतवर्षम् युगाब्द 5101 (1999-2000)

प्रधानसम्पादकः

**डॉ० रमाकान्त शुक्लः**

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली
वि० २०३३ स्थापनाब्दः १९७६

# देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीनसंस्कृतम् (२१/३)

१५ जुलाई, १९९९ ई०

प्रकाशनतिथिः : ३१.७.१९९९

## विषयसूची


| विषय | लेखकः | पृष्ठाङ्कः |
|---|---|---|
| १. सम्पादकीयम् | सम्पादकः | १-२ |
| २. प्रणम्याः कारगिलवीराः | डॉ० रमाकान्तशुक्लः | ३-४ |
| ३. कार्गीलसङ्ग्रामः | प्रा० हरिश्चन्द्ररेणापुरकरः | ५-९ |
| ४. पाकशासनशतकम् (कारगिलविजयम्) | 'अभिराज' डा० राजेन्द्र मिश्रः, | १०-२० |
| ५. भारतस्य विजयोऽयम् | डॉ० रमाकान्त शुक्लः | २१-२२ |
| ६. विश्ववन्द्यं मनोज्ञं सदा भारतम् | श्रीकान्त 'कुशलः' | २३-२४ |
| ७. कुत्र गच्छति देशोऽयम् ? | डॉ० रामकृष्ण सराफः | २५-२७ |
| ८. अन्यापदेशपञ्चकम्-१ | श्री श्रीसुन्दरराजः | २८ |
| ९. अन्यापदेशपञ्चकम्-२ | श्री श्रीसुन्दरराजः | २९ |
| १०. सद्गुणषट्कम् | श्री श्रीसुन्दरराजः | ३० |
| ११. प्रभो ! कामये त्वाम् | पं० चन्द्रभानु त्रिपाठी | ३१ |
| १२. शुभाशंसनम् | प्रो० डॉ० मु० ला० वाडेकरः | ३२ |
| १३. दृश्यते काऽपि लोके विचित्रा प्रथा | डॉ० मनुलता शर्मा | ३३ |
| १४. विधिरमणि ! | डा० भास्कराचार्य त्रिपाठी | ३४ |
| १५. सपदि सुरनदि ! | डा० भास्कराचार्य त्रिपाठी | ३५ |
| १६. स्तवमधु | 'अभिराज' डा० राजेन्द्र मिश्रः | ३६ |
| १७. शिवस्तवः | 'अभिराज' डा० राजेन्द्र मिश्रः | ३७-३८ |
| १८. 'भाति मे भारते' प्राक्तनकाव्यप्रतिबिम्बनम् | डॉ० ललित कुमार गौडः | ३९-४४ |
| १९. भवतां पत्रम् | प्रो० रेवाप्रसाद द्विवेदी | ४५ |
| | म०अ० लक्ष्मीताताचार्यः, राधावल्लभः | |
| २०. देववाणी-परिषद्वार्ता | अभिनव शुक्लः | ४७ |
| २१. संस्कृत-जगद्वार्ता | श्रीमती सरोज व्यासः | ४७ |
| २१. श्रद्धाञ्जलिः | सम्पादकः | ४८ |


अर्वाचीनसंस्कृतम् (पंजी. सं. ३४५५४/७९)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च- डॉ० रमाकान्तशुक्ल भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम म सत्यमस्ति ।

रमाकान्तशुक्लः

३१.७.१९९९ ई.

प्रकाशकः, सम्पाद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सम्पादकीयम्

अद्यत्वे न केवलं सम्पूर्णे भारतेऽपितु विश्वस्य प्रमुखेषु सर्वेष्वपि देशेषु कारगिल-चर्चा प्रवर्तमाना दृश्यते। आकाशवाणी वा स्यात्, दूरदर्शनं वा स्यात्, वृत्तपत्राणि वा स्युः, सावधिकपत्राणि वा स्युः, बसयानानि वा स्युः, रेलयानानि वा स्युः, भोजनालयाः वा स्युः, विद्यालयाः वा स्युः, महाविद्यालयाः वा स्युः, विश्व-विद्यालयाः वा स्युः, अन्यानि वा सार्वजनिकस्थानानि वा स्युः–सर्वत्र विश्वासघातिनः पाकिस्तानस्य दुश्चेष्टाः, भारतीयानां नभोवीराणां स्थलवीराणां च पराक्रमस्य पौनःपुन्येन विस्तृत- वर्णनानि समीक्षाश्च क्रियन्ते। २६-५-१९९९ ई० तारिकायां कारगिलक्षेत्रे भारतीयसेनया पाकिस्तानसेनासमर्थितान् गूढप्रविष्टान् आतङ्कवादिनः किञ्च पाकिस्तानसैनिकान् विद्रावयितुं 'विजयाभियानं' (आपरेशन विजय) प्रारब्धम्।

कारगिलसङ्ग्रामे ४६१ प्रायाः भारतीयसैनिकाः २६ स्वप्राणान् हुतवन्तः। एतान् प्रति सर्वस्मिन्नपि देशे महान् आदरभावः प्रकटीकृतोऽभूत्। संस्कृतरचनाकारैरपि कारगिलसङ्ग्रामं कारगिलसङ्ग्रामवीराँश्च विषयीकृत्य स्ववाक्यपुष्पोपहाराः ग्रथिताः। अर्वाचीनसंस्कृतस्य एकविंशवर्षीये तृतीयेऽस्मिन्नङ्के रचनात्रयं कारगिलसङ्घर्षं विषयीकृत्य प्रकाश्यते।

एतत्पङ्क्तिलेखकस्य **'प्रणम्याः कारगिलवीराः'** इत्येषा रचना पद्यानां षड्विंशत्या प्रणीता । प्रत्येकं पद्यस्यान्ते **'कारगिलवीराः'** इति पदं प्रयुक्तम् –प्रायः प्रथमाबहुवचनत्वेन क्वचिच्च सम्बोधनत्वेन। १९९९ तमे ख्रैस्तेऽब्दे मईमासस्य षड्विंश्यां तारिकायां विजयाभियानं प्रारब्धमभूत् । ४-७-१९९९ तमे दिनाङ्के रात्रौ मया गङ्गोत्तरीधामनि आकाशवाणीवार्तासु श्रुतं - भारतीयैर्वीरैः शार्दूलशिखरे (टाइगर्स हिल' इत्येतन्नाम्नि शिखरे) भारतीयो ध्वजः स्थापित इति । जुलाईमासस्य षड्विंश्यां तारिकायां दूरदर्शनात् आकाशवाणीतश्च श्रुतं कारगिलक्षेत्रात् सर्वेऽपि अवशिष्टा गूढप्रविष्टाः पलायिता इति । मयापि षड्विंशैः पद्यैः कारगिलवीराः नमस्कृताः । इयं रचनां जुलाईमासस्य प्रथमे सप्ताहे प्रारब्धा २६-७-१९९९ तारिकायां च पूरिता संयोजिता च । भारतस्याखण्डताया ऐक्यस्य या पुष्टिरस्माकं कारगिलवीरैः साधिता, सा सदा तिष्ठत्विति परमेश्वरः प्रार्थ्यते, राजनेतारश्च मुहुरनुरुध्यन्ते ऐक्यस्य पालनार्थम्। नमो नमो दिवङ्गतेभ्यो जीवद्भ्यश्च कारगिलवीरेभ्यः!

जूनमासस्य प्रथमे सप्ताहे मया प्रा० हरिश्चन्द्ररेणापुरकरमहाभागा 'अभिराज'डा० राजेन्द्रमिश्रमहाभागाश्च कारगिलविषयिणीं रचनां प्रेषयितुं पोष्टकार्डद्वारा प्रार्थिताः। श्रीरेणापुरकरमहाभागैः **'कार्गीलसङ्ग्रामः'**-इत्येतन्नाम्नी एकोनविंशतिसङ्ख्याकशार्दूल-विक्रीडितमयी रचना मत्सकाशे २७-६-१९९९ ई० तारिकायां प्रेषिता। 'अभिराज'महाशयस्य दूरभाषसन्देशो मया प्राप्तः-ते 'कारगिलपरकं शतकं' स्पीडपोष्टद्वारा



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेषयन्तीति। तच्छतकं १४५ पद्यात्मकं ३०-७-१९९९ ई० तारिकायां मया स्पीडपोष्टद्वारा प्राप्तम्। **'पाकशासनशतकं'** (कारगिलविजयापरनामधेयं) २८-७-१९९९ ई० तारिकायां रात्रौ कविना पूरितम्। एतयो रचनयोः ऐहितासिकदृशा प्रभूता सामग्री कविभ्यां निहिता। अन्यभाषास्वपि कारगिलम्वलब्य कविभिरवश्यमेव काव्यानि प्रणीतानि स्युः किन्तु मम दृष्ट्यां तानि नागतान्यद्यावधि। संस्कृते प्रणीतानि त्रीणि काव्यानि सहृदयानां पुरतः प्रस्तूयन्त एवार्वाचीनसंस्कृतेन।

१६-१२-१९९८ ई० तारिकायां दिल्लीसर्वकारस्य उर्दूहिन्दीसिन्धीपञ्जाबी-संस्कृताकादमीभिः 'शाह आडीटोरियम' इत्यत्र **'विजयदिवसस्य'** समायोजनं कृतमासीत्। तत्र संस्कृतकविरूपेणाहमामन्त्रितोऽभूवम्। तत्र मया **'भारतस्य विजयोऽयम्'** नाम्नी रचना पठितासीत्। सा अस्मिन्नङ्के प्रकाशनीयत्वेन वृतासीत्। अत्रान्तरे **'कारगिल घटना'** घटिता। अतः प्रूफपठनवेलायां त्रीणि पद्यानि टिप्पण्यां कारगिलवीरानुद्दिश्यापि संयोजितानि। इयमपि रचनात्र प्रकाश्यते।

इतः परं श्रीकान्त'कुशलस्य', डा० रामकृष्णसराफस्य, डा० चन्द्रभानुत्रिपाठिनः, डा० मनुलताशर्ममहाभागायाः, श्रीललितकुमारगौडस्य प्रो०मु०ला० वाडेकरस्य च प्रथमप्रवृष्टिरूपेण गद्य-पद्यात्मिका रचनाः प्रस्तूयन्ते। स्वागतमेतेभ्यः सर्वेभ्योऽपि व्याहरति सम्पादकः।

डा० भास्कराचार्यत्रिपाठिना **'लघुरघु'**काव्यं वर्षद्वयपूर्वं रचितम् यत्र सर्वेऽपि लघुवर्णाः प्रयुक्ताः। 'अभिराज'राजेन्द्रमिश्रेणापि तदुत्तरस्वरूपं दीर्घकायं लघुवर्णीयं काव्यं प्रणीतम्। उभयोरपि कवयोः स्थलीपुलाकन्यायेन द्वे द्वे लघुवर्णीये काव्ये सहृदयानां विनोदाय प्रस्तूयेते।

श्रीमान् श्रीसुन्दरराजमहोदयः एकदा मया अन्यापदेशकाव्यं रचयितुं प्रार्थितः। अनेन महानुभावेन दिनद्वयानन्तरमेव भुवनेश्वररस्थितेन दूरवाण्या केचनान्यापदेशश्लोकाः श्राविताः। दिल्ल्यागमनकाले दशसङ्ख्याका अन्यापदेशश्लोकास्तेन मह्यं प्रदत्ताः। अन्येऽपि षट्श्लोकाः सुभाषितपरा दत्ताः। ते सर्वेऽप्यत्र प्रकाश्यन्ते।

प्रो० रेवाप्रसादद्विवेद-म०अ० लक्ष्मीताताचार्य-डॉ० राधावल्लभ त्रिपाठिमहोदयानां पत्राणि स्वतः स्पष्टानि सन्ति।

भारतसर्वकारः प्रवर्तमानं वर्षं संस्कृतवर्षत्वेन मानयति। तदर्थमेकं चिह्नमपि तेनोरीकृतम्, तन्मुखपृष्ठे दीयते।

अर्वाचीनसंस्कृतस्यायमङ्कः कारगिलवीराणां पराक्रमाय स्मृत्यै च समर्प्यते।

विदुषामाश्रवः

३१-७-१९९९

**'रमालयः'** आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# प्रणम्याः कारगिलवीराः[1]

–डॉ० रमाकान्त शुक्लः
'रमालयः' आर ६ वाणी विहारः, नयी दिल्ली–११००५९

जयन्त्येतेऽस्मदीया गौरवाङ्काः कारगिलवीराः ।
समर्च्या आसतेऽस्माकं प्रणम्याः कारगिलवीराः ॥१॥
मई-षड्विंशदिवसादैषमो मासद्वयं यावत् ।
अघोषित-पाक-रण-जयिनो[2]ऽभिनन्द्याः कारगिलवीराः ॥२॥
अकस्मात्प्राविशन्नस्मद्गृहे गूढप्रवेशा ये ।
स्वदेशात्तान् बहिष्कर्तुं प्रचेलुः कारगिलवीराः ॥३॥
परित्राणाय साधूनां विनाशार्थं च दुष्टानाम् ।
समारम्भं द्रुतं चक्रुः प्रणम्याः कारगिलवीराः ॥४॥
बटालिग्-द्रास-मश्को-ककसरक्षेत्रेषु लीनानाम् ।
रिपूणां दुर्दशां चक्रुः समिद्धाः कारगिलवीराः ॥५॥
जुबर-थारू-कुकुरथाङ्-तुर्तुकाख्येभ्योऽद्रिशिखरेभ्यः ।
तुलालिङ्गात्तथा शत्रूनतौत्सुः कारगिलवीराः ॥६॥
दिशन्तो दुर्विपाकं पाककितवानां प्रयाणैः स्वैः ।
जगर्जुर्दुगमक्षेत्रे कृतान्ताः कारगिलवीराः ॥७॥
अवाक्षुस्ते शतघ्नीः स्वीयहस्तैरेव सोत्साहम् ।
ववर्षुर्भीषणान् बम्बान् रिपूपरि कारगिलवीराः ॥८॥
ममन्थुस्ते रिपून् सर्वान् निलीनान् गूढभागेषु ।
स्वदेशस्य प्रतिष्ठां ते ररक्षुः कारगिलवीराः ॥९॥
भुशुण्डीनां शतघ्नीनां भयङ्करगोलकापातैः ।
रिपूनुच्चाटयामासुः प्रवीराः कारगिलवीराः ॥१०॥
अरीन् विद्रावयामासुः शठान् शिक्षापयामासुः ।
खलान् प्रध्वंसयामासुः प्रणम्याः कारगिलवीराः ॥११॥
ध्वजः शार्दूलशिखरे[3] स्वस्त्रिवर्णः स्थापितो यैर्यैः ।
समे ते सन्ति सर्वेषां प्रणम्याः कारगिलवीराः ॥१२॥
हनीफुद्दीनसौरवकालियाहूजास्तथा चान्ये ।
महोत्साहा रवेर्मण्डलमभिन्दन्[4] कारगिलवीराः ॥१३॥
रणे क्षतविक्षताङ्गा अप्यदम्योत्साहपरिपूर्णाः ।
जिगीषापूरितात्मानः प्रचण्डाः कारगिलवीराः ॥१४॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो ये मातृभूमे रक्षणार्थं स्वीयसर्वस्वम् ।
बलिं चक्रुः कथं ते विस्मृताः स्युः कारगिलवीराः ॥१५॥
जनन्यै जन्मभूम्यै त्यक्तसर्वस्वा रणक्षेत्रे ।
हुतात्मानो न वन्द्याः कस्य शतशः कारगिलवीराः ॥१६॥
समस्तं भारतं ह्येकत्वसूत्रे बाधयाञ्चक्रुः ।
बलिं कृत्वा स्वदेशार्थं स्वदेहान् कारगिलवीराः ॥१७॥
प्रधानामात्य[5] आस्तामस्तु वा साधारणो लोकः ।
कृतज्ञः सन् नमति युष्मान् प्रणम्याः कारगिलवीराः! ॥१८॥
द्रुतं विजयाभियानं सिद्ध'मित्यत्रास्ति को हेतुः ?
इहोत्तरमास्त उपयुक्तं 'प्रवीराः कारगिलवीराः' ॥१९॥
शृणुध्वं पाकनेतारः शृणुध्वं पाकबलपतयः ।
यदीच्छथ शं तदा नो कोपनीयाः कारगिलवीराः ॥२०॥
इमे नकुला मयूरा वैनतेयाः पाकनागानाम् ।
इमे पञ्चानना द्विषतां द्विपानां कारगिलवीराः ॥२१॥
शृणुध्वं निस्त्रपा आतङ्कवादप्रेरिताः मूढाः ।
इमे जाग्रति दिवानक्तं सशस्त्राः कारगिलवीराः ॥२२॥
उदन्वद्भूधराकाशेषु नित्यं देशरक्षार्थम् ।
इमे तिष्ठन्ति सन्नद्धा विनिद्राः कारगिलवीराः ॥२३॥
'अविश्वस्ते न विश्वासो विधेयो जातुचिद्विदुषा' ।
दिशन्तीदं भरतभूनायकाः ! किल कारगिलवीराः ॥२४॥
'शठे शाठ्यं विधेयं' 'दुर्जनः शाम्येन्न चोपकृतैः' ।
'वधार्हश्चाततायी'–वेदयन्ते कारगिलवीराः ॥२५॥
रमाकान्त ! त्वया चान्यैः कवीन्द्रैरीडिताः काव्यैः ।
सदा स्थास्यन्ति पूजार्हा अमर्त्याः कारगिलवीराः ॥२६॥

षड्विंशदिवसारब्धे शान्ते षड्विंशके दिने । विजयाख्याभियाने ये दर्शितस्वपराक्रमाः ॥
चतुःशताधिका वीरा हुतात्मानो यशस्विनः । जेतारश्च रिपूणां ये, क्षताङ्गा ये भटोद्भटाः ॥
शत्रून् कारगिलक्षेत्राधित्यकोपत्यकासु ये । गतासून् कान्दिशीकाँश्च चक्रिरे रणभैरवाः ॥
तेषां कीर्तिं ककुब्व्याप्तां षड्विंशत्या पदां गिरन् । विधत्ते लेखनी धन्यां रमाकान्तो 'रमालये' ॥

रचनापूर्तितिथिः २६-७-१९९९

---

१. 'विजयाभियाने (आपरेशन विजय)' भागं ग्रहीतारो भारतीयः सैनिकाः। २. २६.५.१९९९ तः २६.७.१९९९ पर्यन्तं कारगिल-क्षेत्रे प्रचलितं पाकिस्तान-प्रेषितगूढाक्रमणकारिणामुच्चाटनाय यद् युद्धमिवाभवत्तत्र विजयिनः । कारगिलक्षेत्रे ये भारतीयाः वायु-सैनिकाः स्थल सैनिकाश्च पराक्रमं प्रदर्शितिवन्तस्तेऽत्र रचनायां 'कारगिलवीराः' इति संज्ञया व्यपदिष्टाः। ३. 'टाइगर हिल'–इत्यत्र। ४. युद्धे वीरगतिका आदित्य-मण्डलं भित्वा ब्रह्मभावं गच्छन्तीति विश्वासः। ५. प्रधानमन्त्री।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# कार्गीलसङ्ग्रामः

–प्रो० हरिश्चन्द्ररेणापुरकरः
जेवरगी निवासः होटल परिवारस्य पृष्ठतः
स्टेशन रोड; गुलबर्गा (कर्णाटक)

कार्गीलाख्यमहोच्चपर्वतमये क्षेत्रे महादुर्गमे
पाकिस्ताननृशंसशासकजनैः कश्मीरभूलिप्सुभिः ।
प्रेष्याक्रामकघोरभीषणशठान् वेषान्तरे सैनिका-
नाक्रान्तं खलु पाकवञ्चकवरैर्नूनं चतुर्भारतम् ॥१॥

कश्मीरं नियमेन भारतभुवो जातं ह्यभिन्नाङ्गकं
पाकोऽसौ कृतवान् त्रिवारसमरं नूनं जिहीर्षुर्बलात् ।
वैफल्ये सति तत्र तेन बहुशः सम्प्रेषिता घातुकाः
कश्मीरेण समं समस्तविषये कर्तुं महाविप्लवम् ॥२॥

सिम्लायामपि सप्तविंशतिसमापूर्वं कृतां संविदं
लाहोरेऽप्यचिरं तथैव विहितं सौहार्दसन्धिं शुभम् ।
सर्वेषां हि विधाय भङ्गमिह तैर्विश्वासघातात्मकै-
राक्रान्तः सहसैव कश्मिरभुवः कार्गीलभागः शठैः ॥३॥

लाहोरे कृतवद्भिरेव समयं सौहार्दसद्भावयो-
स्तैरेवाक्रमणस्य भीषणतमा गूढं कृता सिद्धता ।
कार्गीलस्य महोच्चशैलशिखरे सेनानिवासाः कृताः
सम्भारोऽपि महारणस्य विपुलः शैलोपरि प्रापितः ॥४॥

अस्माकं तु नितान्तशुद्धसरलैर्निर्व्याजसन्नायकै-
स्तेषामेव वितथ्यधूर्तवचने विश्वस्य शान्तं स्थितम् ।
अस्मद्गुप्तचरैरपीह नियतं कार्यं न सम्यक् कृतं
तस्मात्साहसिकाक्रमेण सहसा सर्वेऽपि विस्मापिताः ॥५॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वं भाटकितोग्रवादिकितवान् सम्प्रेष्य देशे चिरं
काश्मीरीयजनाः स्वकश्मिरभुवः स्वाधीनतामीप्सवः ।
संघर्षं खलु कुर्वते खरतरं पाकस्य नो सैनिकाः
इत्थं तैर्व्यपदिश्य दीर्घसमयं विश्वं भृशं मोहितम् ॥६॥

कालेऽस्मिंस्तु सशस्त्रसैनिकगणांश्चैवाफगांस्तालिबान्
घोरोग्रास्त्रयुतान् प्रवेश्य विषये युद्धं समारोपितम् ।
अस्मद्वीरभटैरतीवविषमे क्षेत्रे महादुर्गमे
सङ्ग्रामः क्रियते च शैलशिखरे तैः संस्थितैर्वञ्चकैः ॥७॥

उच्चैः पर्वतशृङ्गसंस्थितशठा अस्मद्विमानाक्रमैः
पञ्चत्वं शतशो गताश्च बहवो ध्वस्ता निवेशास्तथा ।
युद्धं द्रासबटालिकादिकठिने क्षेत्रे चलत्युत्कटं
सेनाभिर्विजितानि तुङ्गशिखराण्यास्थानकान्याहवे ॥८॥

प्राक्पञ्चाशतिवत्सरेभ्य इह या सीमा ह्यभून्निश्चिता
नूनं जागतराष्ट्रसङ्घसभया सर्वैश्च या स्वीकृता ।
सिम्लायां कृतसन्धिनापि सुतरां या घोषिताऽभूत्पुनः
सैवाद्योद्धतपाकधूर्तमुखरैः स्वैरं समुल्लङ्घिता ॥९॥

अस्मिन् भारतपाकघोरसमरे पाकोऽस्ति दूष्यः स्वयं
तेनैव प्रथमं कृतः समभवद् घोरापराधो ध्रुवम् ।
तत्र प्रेष्य सशस्त्रसैनिकजनांश्चागन्तुकान् भारते
इत्थं ह्येकरवेण घोषितमभूत् त्रैलोक्य राष्ट्रैः समैः ॥१०॥

अम्रीकामहनीयराष्ट्रपतिभिः पाकस्य मित्रोत्तमै-
र्नित्यं पाकसमर्थकैरतितरां स्पष्टं समुद्घोषितम् ।
यत्पाकः त्वरितं हि भारतभुवः सेनां परावर्तयेत्
संवादेन समस्तवादविषयानेवात्र संसाधयेत् ॥११॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाकिस्तानकृते बभूव नितरां नैराश्यकृत्कारणं
यत्केनापि समर्थनं न विहितं मुस्लीमराष्ट्रेण वै।
अस्मद्राष्ट्रमहाप्रधानविहिता लाहोरयात्रा ध्रुव-
मासीद्भारतशान्तिसख्यबलवत्तेभ्यः प्रमाणं महत् ॥१२॥

एकाकी नितरां बभूव भुवने पाको ध्रुवं कर्गिले
ताटस्थ्यं भजमानमत्र समभूच्चीनोऽपि मित्रं परम् ।
सर्वं मित्रदलं च दूरमगमद् ह्यस्माद्धि दुःसाहसात्
इत्थं पाकमभूत्समस्तभुवने घोरापमानास्पदम् ॥१३॥

दीर्घं कालमिदं प्रतन्य समरं कार्गीलभागे चलत्
तस्याण्वस्त्ररणे महापरिणतेर्भीतिं समुत्पाद्य च ।
माध्यस्थ्यं करणाय विश्वविषयान् नूनं हठात्प्रेरणं
सत्यं पाकसमीहितं समभवत् कार्गीलयुद्धे ध्रुवम् ॥१४॥

अस्मद्भारतसैनिकैरपि तथा सीमासमुल्लङ्घने
प्रोत्साहो नहि दर्शनीय इह तैः पाकस्य यत्काङ्क्षितम्।
पाकायोजितकूटजालकपटे पात्यं न सेनाग्रगैः
कश्मीरे चिरवाञ्छिताभिलषितं पाकस्य मा पूरयेत् ॥१५॥

शक्यं वञ्चयितुं जनान् कतिपयान् कालाय शश्वद् भुवि
शक्यं वञ्चयितुं तथैव सकलान् स्वल्पाय कालाय च ।
शक्यं वञ्चयितुं तु नैव सुतरां सर्वान् जनान् सर्वदा
ह्यन्ते स्वीकृतमेव पाककपटं तन्मित्रराष्ट्रैरपि ॥१६॥

अस्माद् घोरतमाद्धि पाककपटात् विश्वासघातात् परात्
खेदामर्षमहाचमत्कृतिपरैरस्मन्महामन्त्रिभिः ।
दुष्टाक्रामकपाकदेशकितवान् निष्कास्य देशाद् बलाद्
राष्ट्रं पूर्णसुरक्षितुं दृढतरः सङ्कल्प उद्घोषितः ॥१७॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषां कार्गिलपर्वतोपरिगतैर्जाल्मैरनुष्ठीयते
ह्यस्मद्भारतसैनिकेषु गुलिकावर्षो भृशं भीषणः ।
पूर्वं ते विजितास्तु संविदि पुनः पाकोपहारीकृताः
कार्यो नेतृवरैर्न भीषणतमो हीदृक् प्रमादः पुनः ॥१८॥

अस्मद्विक्रमशालिसैनिकवरान् बन्दीकृतानाहवे
सम्पीड्यातितरां कठोरपरुषं हत्वा च तान् निर्दयम् ।
अत्यन्तं क्षतविक्षताङ्गकुणपान् प्रत्यर्प्य तेषां शठै-
र्घोरो यो विहितोऽपराध इह तैरक्षम्य एवास्ति सः ॥१९॥

व्याख्यानं खलु यत्र निश्चितमभूदस्मन्महामन्त्रिणः
उध्वस्तं विहितं तदेव कितवैर्गोलाभिवर्षैः स्थलम् ।
भाग्यादेव सुरक्षितः समभवत् श्रीवाजपेयी सुधीः
इत्थं युद्धमदान्धपाकमुखरा जाता ध्रुवं वातुलाः ॥२०॥

देशे तैरवलोक्य शासनमिदं निर्वाचनात्प्राक्तनं
कर्तुं नूनमशक्तमेव परमं दूरङ्गमं निर्णयम् ।
पाकिस्तानविवेकमूढमुखरैः कश्मीरगर्धाकुलै-
र्दुष्टं साहसमेव तैरिह कृतं प्रत्यागतं त्वत्र तत् ॥२१॥

संवादेन वयं विवादकलहान् हर्तुं समीहामहे
ह्येवं दर्शयितुं प्रतीपभुवनं कर्तुं च तन्नाटकम् ।
सर्ताजः स्वविदेशमन्त्रिपरमस्तैर्भारतं प्रेषित-
स्तेनापि प्रबलं तथैव विहिता मायाविनो भूमिका ॥२२॥

प्रत्याहर्तुमवैधपाकपृतनां देशात् स उक्तोऽवदत्
कार्गीले तु मुजाहिदीनसुभटा नो पाकसेना ध्रुवम् ।
सीमोल्लङ्घनजन्यवादविषये नो निश्चितेत्युक्तवान्
षड्बन्दीन् प्रति क्रूरकृत्य विषये तेनाज्ञता सूचिता ॥२३।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धोन्मादाविमूढपाकमुखराः श्रोष्यन्ति नो सद्वचो
मिथ्यावादिशठा भवेयुरिह ते शान्ता न युद्धाद्विना ।
शाठ्येनैव भवेयुरत्र नियतं शान्ताः शठा मायिनः
तेभ्यो भारतशासनेन सुतरां पाठ्यश्च पाठो महान् ।।२४।।

प्राणान् हस्ततले निधाय तुमुलं घोरावहं कुर्वता-
मस्मद्विक्रमशालिसैनिकजनानां पृष्ठतो निश्चलम् ।
एकीभूय समस्तभारतजनास्तिष्ठन्ति शैलेन्द्रवत्
प्राणत्यागपुरःसरं भरतभूरक्षां विधातुं सदा ।।२५।।

तोलोलिङ्गसमं महोच्चशिखरं चान्यानि शृङ्गाण्यपि
सेनाभिः प्रसमं विजित्य नियतं कार्यं महत्साधितम् ।
जेतुं टायगराख्यतुङ्गशिखरं युद्धं चलत्यद्भुतं
मुक्तं स्यादविलम्बमेव सकलं क्षेत्रं हि द्रासाभिधम्।।२६।।

पाकिस्तानविवेकमूढमुखरैर्युद्धज्वरोन्मादिभिः
पूर्वं घोररणत्रयेऽपि नितरां निष्पिष्टविद्रावितैः ।
साहस्राब्दिकदीर्घसङ्गरकथाकृत्पाकवीरब्रुवै-
र्युद्धं कर्तुमलं न वीरपरमै होरासहस्रं ह्यपि ।।२७।।

अस्मिन् घोररणेऽपि पूर्णविफलैः पाकस्य वीरब्रुवै-
रुद्विग्नैः समरात्पलायितमिति ज्ञास्यामहे सत्वरम् ।
साहित्यं प्रचुरं विहाय सहसा प्राणांश्च तित्रासुभि-
र्नूनं स्वार्थपरायणैर्भृतिभटैर्युद्धं न सञ्जीयते ।।२८।।

घोराण्वस्त्रकृतं विनाशमतुलं दृष्ट्वाऽपि तैर्दुर्जनै-
र्युद्धे तस्य महाप्रयोगमपि तत् कर्तुं शठैस्तर्जितम् ।
येषां भारतघोरकुत्सनघृणाविद्वेषनीतिः सदा
तन्नाशक्यमतः समस्तविषयैर्भाव्यं सदाऽतन्द्रितैः ।।२९।।

प्रेषणतिथिः २७-६-१९९९



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# पाकशासनशतकम्

## ( कारगिलविजयम् )

–'अभिराज' डा० राजेन्द्र मिश्रः,
हिमाचलप्रदेशविश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षः,
शिमला (हि०प्र०)

श्रुतैव स्यादियं सर्वैर्लोकोक्तिस्सुमनोहरी ।
मुमूर्षर्जम्बुको द्राति नगराऽभिमुखं सदा ॥१॥
प्रतिवेशे स्थितोऽस्माकं पाकदेशोऽपि दुर्मतिः ।
अनुयाति निजाचारैस्तमेव ननु जम्बुकम् ॥२॥
दुर्मतेरेव जातोऽयं दुर्मत्यैव विपोषितः ।
दुर्मतिश्वाससन्तानैस्सन्ततं जीवति ध्रुवम् ॥३॥
आत्मानं मनुते पाकं पवित्रमिति गर्वितः।
किन्त्वयं नो विजानाति शब्दमर्म निगूहितम् ॥४॥
पाकनामा बभूवाऽत्र दानवः कोऽपि भारते ।
नृशंसः क्रूरकर्मा च विरोधी देवसंस्कृतेः ॥५॥
तदनाचारसन्तप्ते द्युलोके भूतलेऽपि च ।
हाहाकारो यदा नृणां सुराणाञ्चाऽप्यजायत ॥६॥
तदा वज्रप्रहारेण मघवा सैन्यनायकः ।
निजघान क्षणेनैव दुर्मदं तं रणस्थले ॥७॥
इन्द्रः पाकं निहत्यैव सञ्जातः पाकशासनः ।
सेयं पुराकथा रम्या पुराणेष्वस्ति चर्चिता ॥८॥
आत्मदृष्ट्या भवेन्नूनं पाकशब्दप्रयोगतः ।
पाकिस्तानाख्यदेशोऽय शुचित्वस्योपलक्षम् ॥९॥
नृशंसाचरणैः स्वीयैरीर्ष्याद्वेषसमन्वितैः ।
कृतेऽयं भारतीयानां किन्तु पाकाख्यदानवः॥१०॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वारं वारं ततः पिष्ट्वा दानवं तं रणस्थले ।
सैनिका भारतीयास्ते बभूवुः पाकशासनाः ॥११॥
पुराऽभूदेक एवेन्द्रस्सेनानीः पाकशासनः ।
साम्प्रतं सैनिकाः सर्वे भारते पाकशासनाः ॥१२॥
तेषाम्पाकारिभूतानां राष्ट्रभूत्यै हुतात्मनाम् ।
प्रवीराणां यशोगाथा पावनीयं प्रणीयते ॥१३॥
गोरखावाहिनी जीव्याज्जयिनी जाटवाहिनी[1] ।
वाहिनी राजपूताख्या जयतात्सिक्खवाहिनी ॥१४॥
जयन्त्यन्याश्च वाहिन्यो डोगराद्या महाहवे ।
सैन्यशाखा महीयस्यः शौर्यविक्रममण्डिताः ॥१५॥
नगाब्धिग्रहचन्द्रेऽब्दे[2] खैस्ते काश्मीररक्षणे ।
अरीन् विद्रावयामासुः प्रदर्श्याऽमितविक्रमम् ॥१६॥
विश्वासघातिनश्चीनान् पृष्ठे क्षुरनिवेशकान् ।
दृग्रसग्रहचन्द्रेऽब्दे कृतवत्यः पराङ्मुखान् ॥१७॥
ततः प्रधानमन्त्रित्वं क्लृप्ते लालबहादुरे ।
अग्निपिण्डप्रतीकाशे महावामनसन्निभे ॥१८॥
बाणरसग्रहेन्द्वब्दे[3] सैनिकास्ते युधिष्ठिराः ।
निष्पिष्य चूर्णयामासुर्मूषिकान् पाकसैनिकान् ॥१९॥
कुल्यामिच्छोगिलप्रख्यां क्रान्त्वा भारतवाहिनी।
लाहौरनगरं यावत् झटित्येव पदं दधे ॥२०॥
पौराश्चकम्पिरे नूनं भयोद्विग्ना मुमूर्षवः।
भारतवाहिनीविद्धं स्वसैन्यं वीक्ष्य सर्वतः ॥२१॥
अब्दुलाख्याहमीदेनाऽप्याशारामेण धीमता ।
कीलरबन्धुयुग्मेन श्येनझम्पेन खोदरे ॥२२॥
अन्यैश्चापि महावीरैर्जीवद्भिश्च हुतात्मभिः ।
सङ्गरे यादृशं शौर्यं सपत्नध्वंसि दर्शितम् ॥२३॥
इदानीमपि तद्विश्वे युद्धसंसदि चर्चितम् ।
प्रतिमानं न तस्यान्यत् दृश्यते क्वापि भूतले ॥२४॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शौर्यं भारतसेनायाः क्षमाभावः सहिष्णुता ।
अनाक्रमणसिद्धान्तो धर्म्या दृष्टिर्यशस्विनी ॥२५॥
प्रसह्य च समाक्रान्ते न दैन्यं न पलायनम् ।
इत्येवमादि विख्यातं सर्वं गुणकदम्बकम् ॥२६॥
तस्मादेव जिता भूमिस्सकलापि निर्यातिता ।
युद्धकण्डूतिमुक्ताय भारतेनाऽरये स्वतः ॥२७॥
अन्यथाऽऽक्रान्तकाश्मीरं मोचयित्वैव भारतम्।
निर्यातयेज्जितं क्षेत्रं न्याय्यमेतद्भवेत्पुनः ॥२८॥
ईश्वराद्रिग्रहेन्दब्दे[४] प्राच्यबङ्गमहीतले ।
दुर्मदैः पाकदेशीयैः समारब्धे रणोत्सवे ॥२९॥
यदा भारतमुद्विग्नं सम्मर्दैः शरणार्थिनाम् ।
प्रार्थितोऽपि यदा पाको नारुधत्स्वां नृशंसताम्॥३०॥
तदा जगर्ज सिंहीव सा जवाहरनन्दिनी[५] ।
चण्डमुण्डवधोद्योगा कालिकेव भयङ्करी ॥३१॥
द्वित्रैरेव दिनैस्तावच्छत्रुविध्वंसयापितैः ।
नव्यराष्ट्रं समुद्भूतं बांगलादेशनामकम् ॥३२॥
पाकसेनापतिः श्रीमान्नियाजी ध्वस्तपौरुषः ।
द्रागात्मानं समर्प्यैव ररक्ष क्लिष्टजीवनम् ॥३३॥
लक्षसंख्याः पराभूता हताशाः पाकसैनिकाः ।
कारा भारतभूमिस्थाश्चिरं यावत्सिषेविरे ॥३४॥
जिता बङ्गधरा प्राच्या तदानीमपि सैनिकैः ।
भारतेनात्मसात्कर्तुं निर्विघ्नं किमशाकि नो ॥३५॥
बलादक्रान्तकाश्मीरभूभागस्य सुसम्मतः ।
अभविष्यत्प्रतीकारो नूनमेव निसर्गजः ॥३६॥
भारतेन कृतं तन्नो सम्प्रभुत्वानुशंसिना ।
प्राच्यबङ्गं ततो जित्वा तस्मायेव समर्पितम् ॥३७॥
युद्धोन्मादज्वरग्रस्तं पाकराष्ट्रं विखण्डितम् ।
सर्वं सैन्यबलं ध्वस्तं गौरवञ्चापि चूर्णितम् ॥३८॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि शिक्षितं किञ्चिन्नो स्वतीतपराभवैः ।
बन्धुभिः पाकदेशीयैरविमृश्यचिकीर्षुभिः ॥३९॥
यत्राद्यापि वरीवर्ति चण्डदारिद्र्यताण्डवम् ।
शान्ता मुजाहिदीनानां समस्या साऽधुनापि नो ॥४०॥
राजनीतिः प्रतीकारज्वलद्दावाग्निधर्षिता ।
यत्र शेणितधाराभिस्सेचिताऽपि न शाम्यति ॥४१॥
पराकाष्ठां समारूढा सर्वक्षेत्रेऽधमर्णता ।
धर्मान्धता विवेकघ्नी स्वैरं यत्र महीयते ॥४२॥
यत्राद्यापि मिथो द्विष्टाः सिन्धपञ्जाबवासिनः ।
राष्ट्रस्य मूलधारातः पख्तूनाश्च बहिष्कृताः ॥४३॥
सन्ति लालाटिका यत्र परेषां हीनपौरुषाः ।
यत्र कस्मिन्नपि क्षेत्रे नेक्ष्यते स्वावलम्बनम् ॥४४॥
पाकिस्तानं तदात्मानं समीकर्तुं समीहते ।
भारतेन समं हन्त महावैभवशालिना ॥४५॥
व्याघ्रचर्मपरीतोऽपि गर्दभो नैति सिंहताम् ।
ज्ञायते न कथं सत्यं वराकैः पाकनेतृभिः ? ॥४६॥
याचं याचं हि भिक्षान्नं प्राघुणो नैव भोज्यते ।
स्वानुभूतिमिमां दीनां विस्मरन्ति कथन्नु ते? ॥४७॥
मुस्लिमाः कोटिसंख्याकाः सुखिनस्सन्ति भारते ।
पाकदेशादहो तेषां गणनाऽप्यस्ति भूयसी ॥४८॥
हिन्दुसाधारणं सर्वं सौख्यं भुञ्जन्ति तेऽनिशम्।
स्वधर्मपालने रक्ताः समाजे सुप्रतिष्ठिताः ॥४९॥
तथापि हन्त हिन्दुत्वं द्विषन् पाको न लज्जते।
जेजीव्यते किमिस्लामो जगत्यां पाकगौरवात् ? ॥५०॥
स्वीयं क्षुधार्दितं दीनं विपन्नं हीनसाधनम् ।
समाजं नेक्षते पाकः पृथग्भूतं परस्परम् ॥५१॥
किन्तु काश्मीरचिन्ता तं बाधतेऽलं निरन्तरम् ।
समृद्धिः प्रतिवेशस्य दरिद्रं लोभयेद्यथा ॥५२॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दवो मुस्लिमाः सन्ति चिरकालाद्धि भारते ।
भ्रातृकल्पा मिथो बद्धा रागबन्धवशीकृताः ॥५३॥
ऐतिहासिकवैषम्यं कादाचित्कं पुरातनम् ।
यदासीत्क्वापि तन्नूनं कथाशेषं प्रतीयते ॥५४॥
स्वाधीनतां समावाप्तुं यत्नवन्तौ बभूवतुः ।
समवायावुभावेव कात्र कार्या विचारणा ? ॥५५॥
अशफाको हुतात्माऽसौ जन्मभूमिवशंवदः ।
शतघ्नीचालको लक्ष्म्या गौसखानो मुहम्मदः ॥५६॥
अबुल्कलाम आजादो जाकिरो राष्ट्रनायकः ।
नैष्ठिका भारतीयास्ते कथं विस्मृतिभाजनम् ॥५७॥
परप्रेरितबुद्धीनां केषाञ्चन हठादहो[८] ।
तथापि भारतं राष्ट्रं स्वतन्त्रमपि खण्डितम् ॥५८॥
ईर्ष्याद्वेषछलच्छद्मबन्धुद्रोहादिनिर्मितम् ।
सौख्यमञ्चति नाद्यापि पाकिस्तानमनेहसि ॥५९॥
भारतं प्रति विद्वेषः प्रतियोगोऽपि दारुणः ।
पाकभाललिपौ धात्रा टङ्कितौ हन्त सश्रमम् ॥६०॥
श्वसिति स्वपिति स्वैरं किञ्च जीवति सन्ततम् ।
केवलं भारतद्रोहैः पाकराष्ट्रं महीतले ॥६१॥
दुरन्ता तु भवत्येव हा बलवद्विरोधिता ।
यथा भारविराचष्टे दुर्योधनकथाक्रमे[९] ॥६२॥
तदेव हन्त दौर्भाग्यं भारतद्वेषकल्पितम् ।
भुनक्ति जननादेव पाकिस्तानं दिवानिशम् ॥६३॥
निरुपायं यदात्मानं लोकमध्ये तिरस्कृतम् ।
विरोधिभिस्समाक्रान्तं कान्दिशीकं विगर्हितम् ॥६४॥
प्रशासकाः प्रपश्यन्ति भूरि षड्यन्त्रपारगाः ।
तदा भारतविद्वेषं स्फारीकुर्वन्ति ते द्विधा ॥६५॥
आतङ्कवादिनः क्रीतान् गूढं सम्प्रेष्य[१०] भारते ।
सौमनस्यञ्च सौराज्यं भारतस्य विकुर्वते ॥६६॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयमेकाऽपरा पार्टी वाचिकाश्रयिणी पुनः ।
दृश्यते वृत्तपत्रेषु रेडियो-दूरदर्शने ॥६७॥
स्वयङ्कल्पितवृत्तान्तैर्भारतीयीकृतैरथ ।
सीमाविवादसम्बद्धैर्भारताऽनयदर्शिभिः ॥६८॥
वृत्तैरेवंविधैर्नित्यं विप्रतीपैः कलङ्क्यते ।
भारतं पाकसन्मित्रं विश्वशान्तिसमर्थकम् ॥७०॥
भारतं विविधैर्व्याजैर्मैत्रीवर्धनतत्परम् ।
प्रतीकारपरः पाकः किन्तु सौहृदभञ्जकः ॥७१॥
बाष्पयानं समारुह्य वाजपेयिमहोदयः ।
स्वयञ्जगाम लाहौरं मैत्रीस्थापनकाम्यया ॥७२॥
निश्छलं निरहङ्कारं भारतस्यैकतोऽनघम् ।
यतनं प्रीतिकामस्य परतः पाककैतवम् ॥७३॥
तेन कारगिलक्षेत्रे सैनिकाः सम्प्रवेशिताः ।
गूढं भारतसीमायां जम्मूकाश्मीरमण्डले ॥७४॥
सर्वमेतत्कृतं गूढं वात्यागत्या मलिम्लुचैः ।
येन सर्वमपि क्षेत्रं जातमरातिसङ्कुलम् ॥७५॥
पर्वत शृङ्गबाहुल्याद् दुर्गमत्वाच्च नीवृति ।
पाकभारतसौहार्दप्रयत्नारम्भणादपि ॥७६॥
सैनिकाः भारतीयास्ते तत्रस्था अपि नो विदुः ।
अहो पञ्जाबवाहिन्या गूढाचारमिमं द्विषाम् ॥७७॥
यदा गर्खूनग्रामस्था मेषपालास्त्रयो मिथः ।
मोरुप्सेरिंग-नांग्यालस्ताशी-राजालिनामकाः[११] ॥७८॥
अरीणां गूढचारस्य वाहिन्यै सूचनां ददुः ।
प्रतीकर्तुं तदा सेना सन्नद्धाऽभूत्प्रयत्नतः ॥७९॥
ग्रहग्रहग्रहेन्द्वब्दे[१२] खैस्तेऽहनि द्वितीयके ।
मईमासेऽथ वृत्तान्तो जघटेऽयं विलक्षणम् ॥८०॥
गूढं बटालिकक्षेत्रे प्रविष्टाः सन्ति वैरिणः ।
आतङ्किनोऽलबद्रीयाः[१३] पाकसैन्यचरैस्सह ॥८१॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञायेति प्रजज्वाल रोषद्वेषहुताशनः ।
निखिले भारते राष्ट्रे पाककार्तघ्न्यदाहकः ॥८२॥
धिगहो पाकदौरात्म्यं साहसं धिक् कृतघ्नताम् ।
निर्गता वागियं सद्यः भारतीये जने जने ॥८३॥
ततश्च शासनादेशं प्राप्यास्माकं चमूपतिः ।
दिदेश शत्रुनाशार्थं युद्धप्रवणसैनिकान् ॥८४॥
ततः प्रलयमेघाभा परितो हिन्दवाहिनी ।
परीत्य कार्गिलक्षेत्रं विदधे तुमुलसङ्गरम् ॥८५॥
गोरखाराइफल्साख्या वाहिनी दिवसत्रये ।
खलूबारगिरिश्रेणीं रिपुहस्ताद्व्यमोचयत् ॥८६॥
ततो जितवती सेना लेङ्गपाशिखरं मुहुः ।
उर्दासात्पश्चिमे ख्यातं क्षेत्रे डाङ्गहिलाभिधम् ॥८७॥
स्थले मुन्थोडलोनाम्नि सततं बॉम्बवर्षणैः ।
पाकसैन्यागमं चक्रे ध्वस्तं पवनवाहिनी[१४] ॥८८॥
थारू-कुकरथाङ्गाख्यं विजित्य शिखरद्वयम् ।
मुक्तं चक्रे ततस्सेना बरारोग्राममण्डलम् ॥८९॥
मुश्कोह-ककसाराभ्यां विनिष्कास्य ततो रिपून् ।
क्षेत्रं मुक्तं चमूश्चक्रे जुलाय्याः सप्तमे दिने ॥९०॥
अष्टमेऽह्नि जुलाय्याश्च जितं टाइगराभिधम् ।
शिखरं हिन्दसेनाभिश्चूर्णयित्वा रिपुव्रजम् ॥९१॥
बिहाररेजिमेण्टस्य गोरखागढवालयोः ।
ग्रेनाडियर्सनाम्नश्च समवेतप्रहारणैः ॥९२॥
वायुसेनाक्रमैश्चापि शत्रुविध्वंसकारिभिः ।
मुक्तं कारगिलक्षेत्रं जातमेवं समन्ततः ॥९३॥
अजीजस्सरताजाख्यः[१५] पाकपक्षादघोषयत् ।
नूनं कारगिलक्षेत्रे न वयं पाकसैनिकाः ॥९४॥
काश्मीराभिजना एते मुजाहिदीनसंज्ञकाः ।
भारतान्मुक्तिमिच्छन्तः सन्ति युद्धरता भुवि ॥९५॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाठ्यपूर्णमृषावादस्तस्य किन्तु प्रकाशितः ।
निगृहीतो यदा जीवन्नलीनायतनायकः[१६] ॥९६॥
द्वितीयेऽह्नि जुलाय्यास्तु संवृत्ते दारुणे रणे ।
शतद्वयमिता हन्त निहताः पाकसैनिकाः ॥९७॥
अनेन सर्वथा सिद्धं यन्निगूढप्रवेशिनः[१७] ।
सन्ति क्रीतभटा यद्वा केवलं पाकसैनिकाः ॥९८॥
पाकिस्तानकृतं शाठ्यं विदित्वा साधु भूतलम् ।
तद्विरोधि नु सञ्जातं कस्समर्थयते शठम्! ॥९९॥
मास्कोलन्दनपीजिङ्ग्वाशिङ्गटननायकाः ।
निर्भर्त्स्य परुषं पाकं त्रुटिशुद्ध्यै मतिं ददुः ॥१००॥
प्राप्तेऽप्यवसरे यच्च पूर्णयुद्धं न घोषितम् ।
नोल्लङ्घिताऽथवा रेखा भारतेन नियन्त्रिणी[१८] ॥१०१॥
तदर्थं प्रशशंसुस्ते धैर्यञ्चापि सहिष्णुताम् ।
भारतस्य प्रजातन्त्रविश्वमङ्गलशंसिनः ॥१०२॥
निन्दितः थूत्कृतश्चापि भर्त्सितोऽप्यधरीकृतः ।
एकादशे दिने पाको जुलाय्या[१९] ननु घुष्टवान् ॥१०३॥
नूनं त्रिभिर्दिनैस्सर्वे पाकदेशस्य सैनिकाः ।
भारतान्निवर्तिष्यन्ते तदर्थं विनिवेद्यते ॥१०४॥
प्रार्थनाऽङ्गीकृता तस्य भारतेन महीयसा ।
सर्वं कारगिलक्षेत्रं पुनस्स्वातन्त्र्यमादधे ॥१०५॥
सम्प्रत्यवसितं युद्धं सप्ताहावधिवर्तितम् ।
गर्वमानोद्धुरा जाता जयिनी हिन्दवाहिनी ॥१०६॥
प्राणान्ददुर्महावीरा किन्तु ये राष्ट्ररक्षकाः ।
नित्यावलम्बभूता ये पितृभार्याकुटुम्बिनाम् ॥१०७॥
अधमर्णा वयं सर्वे तेषां नूनं कृतात्मनाम् ।
विहाय सकलान्भोगान्नव्ये वयसि ये गताः ॥१०८॥
जयताद्राजवीराख्यस्सिंहोऽसौ लांसनायकः ।
द्रासमुक्त्यै ददौ प्राणान्यो हि रोहतकोदितः ॥१०९॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तोलोलिङ्गजयी सिंहो जसवीरो भटाग्रणीः ।
पात्रो गञ्जामवास्तव्य श्श्रीनिवासोऽपि नायकः॥११०॥
नायकः कामराजाख्यस्तञ्जौराभिजनो युवा ।
लेफ्टिनेण्टपदारूढः क्नोरूमुक्त्यै दिवङ्गतः ॥१११॥
थापरो विजयन्ताख्यो नोएडादीपसन्निभः ।
लेफ्टिनेण्टः केङ्गुरुत्से नागालैण्डभूमिजः ॥११२॥
कोभ्फिकोडे समुत्पन्नः कैप्टनो वीरविक्रमः ।
पुण्यपत्तनजशिशन्दे लांसनायकशङ्करः ॥११३॥
कैप्टनः केविलफोर्डो नोंग्रुमो हि शिलाङ्गजः ।
पद्मपाणिरथाचार्यो मेज़रश्च कलिङ्गजः ॥११४॥
तुर्तोकेऽर्प्यर्पितप्राणो हनीफुद्दीननायकः ।
द्रासे वीरगतिं वृण्वन् गनरो जयत्युद्धवः ॥११५॥
सवनन् बिहारवाहिन्या मेजरो मरियप्पनः ।
मेजरो रोहितो गौरो नायकश्च प्रमोदनः ॥११६॥
संयुक्तराष्ट्रसंघस्य शान्तिसैन्ये नियोजितः[२०] ।
लङ्काऽङ्गोलारवाण्डादौ समवाप्तमहद्यशाः ॥११७॥
एर्णाकुलमवास्तव्यो लेफ्टीनेण्टकर्नलः ।
विश्वनाथोऽपि हा हन्त तोलोलिङ्गे दिवङ्गतः ॥११८॥
कर्नलो लेफ्टिनेण्टोऽन्यः श्रीमान्विजयराघवः ।
मातृभूतिं भृशं रक्षन् ददावात्माहुतिम्मुदा ॥११९॥
एकैकशोऽथ नामानि कियन्ति गणयानि वा ।
सर्व एव प्रणम्यास्ते वन्दनीयाश्च नित्यशः ॥१२०॥
एकतः पाकदेशोऽसौ कृतघ्नो निजसैनिकान् ।
मृतांस्तत्रैव तत्याज मृत्तिकामपि नो ददौ ॥१२१॥
अन्यतो भारतं राष्ट्रं यत्समानीय सादरम् ।
अन्त्येष्टिं सैन्यवीराणां तेषां राज्ये व्यपूरयत् ॥१२२॥
जुब्बाराख्येऽद्रि शृङ्गे च रिक्तगर्ते यथायथम् ।
त्रिंशन्मिताञ्छवान् क्षिप्तान् पूतियुक्तान् विलोक्य तु॥१२३॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्मयं परमं भेजे नूनं भारतवाहिनी ।
निर्ममत्वं नृशंसत्वं चिन्तयन्ती हि वैरिणाम् ॥१२४॥
युद्धं कुर्वन् भवेच्छत्रुः कामं कोऽपि रणस्थले।
परम्मृतो न वैरीति भारतीयैर्विचिन्तितम् ॥१२५॥
एवं विचिन्त्य ते वीरा खनित्वाऽप्यवटान्बहून्।
तान् मुस्लिमशवान्यत्नात् निदधुस्तत्र सादरम् ॥१२६॥
एवमेवेम्तियाजाख्यमलिकस्याप्युपेक्षितम् ।
कैप्टनस्य शवं क्षिप्तं पूतिदुर्गन्धपूरितम् ॥१२७॥
शृङ्गाट्टाइगराद्वीरा भारतीयाः प्रयत्नतः ।
एकादशे जुलाय्यह्नि सादरं भुवमानयन् ॥१२८॥
सर्वानपि शवान् प्राप्य यत्र कुत्रापि वैरिणाम्।
मुस्लिमान्त्येष्टिसंस्कारविधिभिस्तेऽवटे दधुः ॥१२९॥
इयमाचारमर्यादा समदृष्टिश्च पावनी ।
क्व पुनर्धर्मसम्मूढे पाकिस्तानेऽवलोक्यते ? ॥१३०॥
कर्णौ नासाञ्च लिङ्गञ्च निकृत्त्य प्रतिहिंसया।
सैनिकानां करौ पादौ स्फोटयित्वा च लोचने॥१३१॥
निर्यातयन्तु ये जाल्माः भारताय शवानहो ।
नो कयापि दृशा वक्तुं शक्यन्ते मनुजास्तु ते ॥१३२॥
पाकिस्तानकृतं चेदं नृशंसं कर्म भूतले।
अमरीकादिभिस्सर्वैः पौनःपुन्येन धिक्कृतम् ॥१३३॥
पृष्ठे छुरिकयाऽघातं कृत्वाऽप्युपकृतं बहु ।
अस्माकं भारतीयानां पाकेनेति मतम्मम ॥१३४॥
बोधिता मोहनिद्रातो भारतीयाः सुनिश्चिम् ।
अविश्वस्ते न विश्वासः पाके कार्यः कथञ्चन ॥१३५॥
भारतेन समं युद्ध्येत् सिंहसत्त्वेन चेत्पुनः ।
क्वापि पाकोऽयमुद्गर्वः सारमेयपराक्रमः ॥१३६॥
दानवोऽयं न क्षन्तव्यो मेलनीयः स्वसीमनि ।
पुराणभारताभिख्यां यथैतु सप्तसैन्धवम् ॥१३७॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिश्रोऽभिराजराजेन्द्रस्त्रिवेणीकविकीर्तिभाक् ।
काव्यबन्धैः प्रणौत्येभि सैनिकान् पाकशासनान् ॥१३८॥
मानवीयसदाचाराः सदगुणाश्चापि शाश्वताः ।
भारतेऽद्यापि जीवन्ति सत्यधर्मसमाश्रिते ॥१३९॥
दत्तं समग्रराष्ट्रेण कार्गिले क्षतविक्षतान् ।
वीरान् वारयितुं रक्तं पुष्कलं भूषणं धनम् ॥१४०॥
राज्येष्वपि परीवारा राष्ट्रभक्तहुतात्मनाम् ।
सम्मानिताः समाजेन शासनेन च सादरम् ॥१४१॥
समुच्छलति वात्सल्यं श्रद्धाभावश्च तान्प्रति ।
दिवङ्गतास्त्वपि प्राज्यं वीरा जीवन्ति भारते ॥१४२॥
तेषां हुतात्मनां भार्या देवीत्वेन समादृताः ।
नूनं राष्ट्रे भविष्यन्ति महामहिममण्डिताः ॥१४३॥
अभिराजीतनूजोऽयं तस्मात्तद्गुणशंसनैः ।
पवित्रीकुरुते स्वीयां लेखनीञ्च सरस्वतीम् ॥१४४॥
ग्रहग्रहग्रहेन्द्वब्दे खिस्तीये पूरितं बुधे ।
अष्टाविंशे जुलाय्यह्नि[२१] काव्यमेतन्मयाऽनघम् ॥१४५॥

*॥ इतिश्रीमदभिराजराजेन्द्रविरचितं कारगिलविजयाऽपरसंज्ञं पाकशासनशतकं समाप्तम् ॥*

रचनातिथिः २८.७.१९९९

---

१. रेजिमेण्ट इति, २. १९४७ ई०, ३. १९६५ ई०, ४. १९७१ ई०, ५. प्रधानमंत्री इन्दिरा, ६. बिहारप्रान्तादूगता मुस्लिमाः, ७. झाँसीश्वरी लक्ष्मीबाई, ८. जिन्नाप्रभृतीनाम् ९. किरातार्जुनीये महाकाव्ये, १०. घुसपैठिये इति भाषायाम्, ११. अली रजा इति १२. १९९९ ई०, १३. अलबदर-दलसम्बद्धाः, १४. वायुसेना, १५.पाकविदेशमंत्री १६. नायक इनायत अली, १७. घुसपैठिये इति, १८. Line of Control, १९. ११ जुलाई १९९९ ई०, २०. UNO Peace Force, २१. २८ जुलाई १९९९ ई०, बुधवारे



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारतस्य विजयोऽयम्

–डॉ० रमाकान्त शुक्लः
'आर ६' वाणी विहारः, नयी दिल्ली–११००५९

"क्रुद्धं हिंसाबलं जितं किल सत्याहिंसाबलतः ।
आंग्लशासनं खलूच्चाटितं भारतस्य विजयोऽयम् ॥
पञ्चषष्टितमवर्षेऽस्माकं पश्चिमोत्तरे वीराः ।
पदचर्यया गता लाहौरं, भारतस्य विजयोऽयम् ॥
एकसप्ततौ दिसम्बरे किलं नवतिसहस्रं पाकाः ।
बद्धा निरागसां हन्तारो, भारतस्य विजयोऽयम् ॥
वारद्वयं पोखरणगर्भे ह्यणुविस्फोटपरीक्षा ।
स्वीयसाधनैः सफला जाता, भारतस्य विजयोऽयम्॥
अग्निनागप्रभृतीन्यस्त्राणि प्रोद्भासन्तेऽस्माकम् ।
तर्जयन्ति वैरिणः प्रतिपलं, भारतस्य विजयोऽयम्॥
अवतारिता युद्धपोताः सागरवक्षसि सोत्साहम् ।
आत्मरक्षणं विदधति वीराः, भारतस्य विजयोऽयम्॥
मा चिन्तां कुरु रमाकान्त ! सागरे वियति भूपृष्ठे ।
निस्तन्द्रा जाग्रति वीरास्ते, भारतस्य विजयोऽयम् ॥"[१]

---

१ द्रासबटालिककसरमश्कोभागा अस्मद्वीरैः ।
यथा रक्षिता शत्रोर्हस्तात् भारतस्य विजयोऽयम् ॥
मातृभूमिरक्षार्थं वीराः वीरगतिं लब्ध्वा यत् ।
रविमण्डलभेदनं चक्रिरे भारतस्य विजयोऽयम् ॥
वायुसैनिका धरासैनिका सन्नायका भटानाम् ।
स्थास्यन्तीमे सदा प्रणम्या, भारतस्य विजयोऽयम् ॥
त्रीणी पदानि ४-७-१९९९ तारिकायां प्रणीतानि। तानि चात्रेपस्थाप्यन्त :–


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भ्रातश्चिन्तां नो कुर्वेऽहं किन्तु कामयेऽप्यन्यत् ।
पश्य कीदृशो मया काम्यते भारतस्य विजयोऽयम् ॥
भ्रष्टाचारो महार्घता आतंकवाद उत्कोचः ।
निर्धनता यदि पराजिताः स्युर्भारतस्य विजयोऽयम् ॥
वृत्तिहीनता विघटनवृत्तिर्जनतामूढीकारः ।
जिताः पूर्णतो यदि पूर्णः स्याद्भारतस्य विजयोऽयम् ॥
यदि च विदूषकनिभा नायका जनतां नो लुण्ठेयुः ।
धर्मजातिभाषाविभेदतो भारतस्य विजयोऽयम् ॥
बाह्यमान्तरं प्रदूषणं नो नागरिकान् बाधेत ।
अभयं यदि तेषां हृदि विलसेद्भारतस्य विजयोऽयम् ॥
शिक्षा स्वास्थ्यं क्रीडाभ्यासो देशभक्तिरविचलिता ।
सम्पूर्णेषु जनेषु भवेद्यदि भारतस्य विजयोऽयम् ॥
क्षेत्रेषु स्यात्सस्यबहुलता कारक्षेषूत्पादः ।
प्रतिहस्तं स्याद्वृत्तियुक्तता, भारतस्य विजयोऽयम् ॥
पठतु जनो यां कामपि भाषां किन्तु राष्ट्रभाषां प्रति।
नैवोपेक्षां यदा धारयेत्, भारतस्य विजयोऽयम् ॥
विज्ञानं साहित्यं वाणिज्यं कृषि शिल्पोद्योगाः ।
अध्यात्म्यं कलाश्च जृम्भन्ताम्, भारतस्य विजयोऽयम्॥
वेषभूषयोपासनपद्धत्याशनेन संस्कारै-
र्भिन्ना अप्येकतां भजेयुर्भारतस्य विजयोऽयम् ॥
स्वतन्त्रतां यः कामयते सम्पूर्णजगद्देशानाम् ।
सदा वर्धताम् सदा राजताम् भारतस्य विजयोऽयम् ॥

रचनार्तिथिः १६-१२-१९९८ 'विजय-दिवसः'

---

(इयं रचना दिल्ली-संस्कृत-हिन्दी-सिन्धी-पञ्जाब्युर्दूकादमीभिः दिल्लीस्थे 'शाह-आडिटोरियमे'-त्यभिधे सभाभवने १६-१२-१९९८ तारिकायां समायोजिते 'विजय-दिवसे' पठितासीत्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# "विश्ववन्द्यं मनोज्ञं सदा भारतम्"

–श्रीकान्त 'कुशलः'

'श्रीराममन्दिरम्', गङ्गेश्वरनाथः, चुनार–२३१३०४

यत्र वेदा पुराणानि न्यायादयः
सर्व-शास्त्राणि दीप्तानि पूतानि वै ।
यत्र वाल्मीकिना निर्मितं मञ्जुलं
राष्ट्रकल्याणदं दिव्यरामायणम् ॥१॥

व्यासभासादिभिः कालिदासादिभिः
विश्वबन्धुत्वभावः भृशं दर्शितः ।
जानकीं त्यक्तवान् लोकसेवारतो
राघवोऽरञ्जयत् सर्वदा मानवान् ॥२॥

पीडिताः दुःखिताः क्लेशिता मानवाः
रक्षणीया स्वप्राणार्पितेनापि ते ।
रन्तिदेवस्य वृत्तं सदा स्मर्यते
येन भिक्षाशिने दत्तमन्नादिकम् ॥३॥

श्येनसन्तुष्टयेऽदात् स्वमांसं शिविः
पक्षिणं गोपयामास पारावतम् ।
पुष्पवृष्टिस्तु राजन्यभूत् व्योमतः
लोकशिक्षासु ग्राह्याखिलैर्मानवैः ॥४॥

दैत्यनाशाय युद्धेऽतिभीतिप्रदे
श्रीदधीचिर्ददौ वज्रिणे कीकसम् ।
वर्म प्रादात् विकृंत्यैव देहान्नृपः
कुण्डलं चापि कर्णस्तु त्यागी महान् ॥५॥

यस्य त्यागेन विश्वं पदे सन्नतम्
विश्ववन्द्यं मनोज्ञं सदा भारतम् ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोखले-गाँधि-मोतीसुतो नेहरू
भारतीयाः स्वधर्मेषु पारंगताः ।
सर्ववर्णान् समालिङ्ग्य कण्ठेन वै
भारतीयो ध्वजो रक्षितः सर्वतः ॥६॥

मुस्लिमो यत्र गत्वा करोदर्चनं
मेरठे हिन्दुभिः रुद्रपूजाविधौ ।
तच्च संश्रुत्य वृत्तं प्रसन्नाः समे
पूज्यभावो जनानां तु तस्मिन्नभूत् ॥७॥

ज्ञानवापी भवेद्वा मदीना भवे-
देकतायुक्तचितेन शान्तिः सखे ।
ज्ञानमाश्रित्य भक्तिर्भवेद्राघवे
दैहिकादित्रयाद्वै विमुक्तिर्भवेत् ॥८॥

श्रीकुरानस्य पाठो भवेन्मस्जिदे
मन्दिरे चापि नित्यं तु रम्या कथा ।
पादरी पठ्यतां पुस्तकं चर्चके
ग्रन्थपाठो भवेत् सिखगेहेऽपि वा ॥९॥

होलिकाक्रिस्मसेद प्रसिद्धोत्सवे
मीलिताः भावपूर्णाः भवेयुर्जनाः ॥
चेतसा पूर्णतः प्रीणिताः स्युर्यदा
रामराज्यं तदा भूतले निश्चितम् ॥१०॥

ज्ञानदं मानदं मुक्तिदं शाश्वतम् ।
विश्ववन्द्यं मनोज्ञं सदा भारतम् ॥

*(१५-८-१९९७ तारिकायां स्वतन्त्रतादिवसोपलक्ष्ये स्वतन्त्रतायाः अर्ध-शताब्द्यवसरे दिल्लीसंस्कृतअकादम्यायोजितायां कविगोष्ठ्यां श्रावितेयं रचना)*



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# कुत्र गच्छति देशोऽयम् ?

डॉ० रामकृष्ण सराफः
ई-७/५६२, अरेरा कालोनी, भोपाल-४६२०१६

पुराकाले हि विश्वस्मिन् सांस्कृतिके धरातले ।
भारतं देश आसीन्नः सर्वराष्ट्रधुरंधरः ॥१॥
देशोऽयं ख्याततां यातः संस्कृतेः परमोन्नतेः ।
संस्कृतिर्वै परित्राता जनानां त्यागकर्मणा ॥२॥
प्राणानां विहितोत्सर्गस्त्यागश्चापि धनस्य च ।
स्वकीयञ्चापि यद्भूतं तत्त्यक्तमत्र भारते ॥३॥
लोके ये प्राणिनः सन्ति तेषां कल्याणकामना ।
तेषां सर्वविधं क्षेमं तेषामुत्कर्षभावना ॥४॥
'सर्वे हि सुखिनः सन्तु सर्वे सन्तु निरामयाः' ।
अभिव्यक्ता शुभाशंसा भारतस्य भुवस्तले ॥५॥
समुद्रमंथनात्प्राप्तं गरलं देवदानवैः ।
न तत्पातुं तदा कोऽपि प्राभवद् वसुधातले ॥६॥
हरेण तद्विषं पीतं त्रिलोकस्य भयं गतम् ।
तदारभ्य भवानीशः शितिकण्ठ इति श्रुतः ॥७॥
कपोतं सुतरां भीतं श्येनाद्रक्षितवाञ्छिबिः ।
विहिता धर्मरक्षा च शिबिना हि महात्मना ॥८॥
देवदानवयोर्युद्धे देवानां विजयाय वै ।
दत्तान्यस्थीनि वज्रस्य निर्माणाय दधीचिना ॥९॥
निहता दानवा युद्धे वीतचिन्ताश्च देवताः ।
महर्षेरस्थिदानेन देवजयो दृढीकृतः ॥१०॥
सत्यरक्षां हरिश्चन्द्रो विहितवान् स्वकर्मणा ।
स्वप्ने यद्वचनं दत्तं तदूढं तेन जागरे ॥११॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिगाधिकुमाराय दत्तवान् विभवं स्वकम् ।
सपत्नीकः ससूनुश्च राज्यं त्यक्त्वा बहिर्गतः ॥१२॥
श्मशाने विदधे सेवां धर्मन्तु त्यक्तवान् न हि।
मृतपुत्रस्य दाहार्थं भार्यातः शुल्कमाप्तवान् ॥१३॥
तिर्यक्शरीरवन्तोऽपि दृश्यन्ते स्वव्रते रताः ।
वैदेहीं रावणाद् रक्षन् जटायुस्तददर्शयत् ॥१४॥
रामेण रक्षितो धर्मो हता ये धर्मघातिनः ।
कृष्णोऽपि हतवान् कंसं संस्कृतिर्येन दूषिता ॥१५॥
महाभारतसंग्रामेऽर्जुनाय स उपादिशत् ।
युध्यस्व त्वमनासक्तः तत्तव कर्म विद्यते ॥१६॥
फलं प्रति स्पृहा मां भूत् व्याख्या योगस्य नूतना।
प्रतिष्ठा कर्मवादस्य संधारिता हि शौरिणा ॥१७॥
अहिंसां वै महावीरो करुणाञ्च तथागतः ।
प्रतिपादितवन्तौ तौ धर्मप्राणेऽत्र भारते ॥१८॥
अहिंसाकरुणाधर्मावात्मन उपकारिणौ ।
महावीरेण बुद्धेन चात्मशक्त्या जगज्जितम् ॥१९॥
आचार्यः शङ्करो जातः परिपूतेऽत्र भारते ।
वेदान्तदर्शनस्य प्रवर्तनमृषिणा कृतम् ॥२०॥
चतुर्षु देशकोणेषु चत्वारः स्थापिता मठाः ।
निखिलं भारतं ममेत्याचार्येण निदर्शितम् ॥२१॥
विस्मर्तव्यं कदाचिन्न देशप्रेम मनीषिणः ।
संन्यस्तेन विरक्तेन राष्ट्रैकत्वं प्रदर्शितम् ॥२२॥
सर्वधर्मसमत्वञ्च राष्ट्रस्यास्य विशिष्टता ।
अनेन हेतुना देशो याति विश्वे प्रशस्यताम् ॥२३॥
सत्याहिंसा तथा प्रेमोपकारश्च गुणादयः ।
तेषामास्माकदेशेऽस्ति सनातनोऽक्षयो निधिः ॥२४॥
किन्तु हन्ताधुनादेशे गतं सर्वं विपर्ययम् ।
साम्प्रतं भारते क्वापि शोभनं न हि दृश्यते ॥२५॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्याहिंसागुणादीनां लोपः सर्वत्र जायते ।
तेषां स्थानेऽहिंसाऽसत्यं भवन्त्यन्येऽप्यसद्गुणाः॥२६॥
लुण्ठा युवतिशीलस्य सर्वतः परिलक्ष्यते ।
लज्जा तेषां न दुष्टानां कृत्वा कर्म जुगुप्सितम् ॥२७॥
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
मनोर्वचांसि दिव्यानि वधस्तेषां पदे पदे ॥२८॥
सावित्री यत्र सीता च सन्नार्यः समादृताः ।
स देशस्तद्विहीनश्चेद् हता हन्त मनस्विता ॥२९॥
विद्याकेद्राणि नष्टानि चिन्ताकेन्द्राणि सन्ति वै ।
अनुशासनहीनत्वं साम्प्रतं तस्य का कथा ? ॥३०॥
प्रभीताः सज्जनाः सन्ति मोदन्ते दुर्जना भृशम् ।
दण्डस्य चेद्भयं नास्ति तर्ह्यनुशासनं कुतः ॥३१॥
न्यायदाने न तूर्णत्वं रुग्णालये न भेषजम् ।
शासनस्य हि नो चिन्ता लोको लोके चरेत् कथम्? ॥३२॥
विचरन्ति जना भीता निर्भया यान्ति दुर्जनाः ।
शासनस्योपहासः स्यात् जीवेयुः सज्जनाः कथम्?॥३३॥
किमिदं कल्पितं जातं विवेकानन्दभारतम् ?
दृष्ट्वा दृष्ट्वा हि हृत्स्फोटः सर्वेषां ये मनस्विनः ॥३४॥
वृत्तं यत्नेन संरक्ष्यं वृत्तमेव धमं परम् ।
सुविज्ञातमिदं विज्ञैवृत्ततस्तु हतो हतः ॥३५॥
देशरक्षा विधातव्या समस्तैर्देशवासिभिः ।
राष्ट्ररक्षा हि कर्तव्या प्राणैरपि धनैरपि ॥३६॥
तत्कृते संस्कृती रक्ष्या तयाऽलङ्क्रिते हि सः ।
संस्कृत्यालङ्कृते देशे श्रियः शक्तेश्च सङ्गम ॥३७॥
राष्ट्रे तदा समृद्धिः स्यात् सर्वतो भीतिहीनता ।
श्रेयोवृष्टिर्हि सर्वत्र राष्ट्रशक्तिर्विवर्धते ॥३८॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अन्यापदेशपञ्चकम्-१

–श्री श्रीसुन्दरराजः आई०ए०एस० (प्राप्तावकाशः)
२१, एकाम्रविहारः, वी०आई०पी० कालोनी, नयापल्ली,
भुवनेश्वर-७५१०१५

१ रे रे सूकर मा कृथा मुदमहं पीवा बली मांसलः
नान्यः कोऽपि मया समान इति मत्स्वामी मयि प्रीयते ।
स्वामी तुष्यति पीवरं तव वपुर्निध्याय हत्वा यदि
विक्रेष्याम्यहमस्य मांसमधिको लाभो मम स्यादिति ॥

२ भो भो रासभ भारवाहनपटो मौनेन भारं वह
साहाय्येन तथा कृतेन रजकस्स्वामी त्वया तुष्यति ।
मा विन्दस्व मदं कदाऽपि समदो भूत्वा च धूत्वा पदं
रावं चेत्कुरुषे रुषा परुषितस्त्वामाहनिष्यत्ययम् ॥

३ भ्रातः कोकिल भोः वसन्तसमयो नाद्यापि हृद्यस्तव
प्राप्तः पुष्पलताः न पुष्पभरिताः गुञ्जन्ति भृङ्गाः न च।
आस्वाद्यस्तव यो नवः किसलयश्चूते स नो दृश्यते
व्यर्थं ब्रूहि किमर्थमुन्मद इवाकाले मुहुर्गायसि ॥

४ रे रे भृंग विचारमूढ इव मे त्वं भासि कृत्यैस्तव
नित्यं भ्राम्यसि पुष्पितद्रुमलतागुल्मेषु हर्तुं मधु ।
भूयः श्राम्यसि संचिनोषि कणशः कृत्वा करण्डं द्रुमे
भोक्तुं पारयसि स्वयं न मधु तत् कोऽप्यत्ति हत्वाऽपरः॥

५ मत्स्य त्वं भव मग्न एव सुचिरं गाधेतरे वारिणि
तिष्ठत्यत्र तटे तपो दधदिव त्वां धर्तुमेको वकः ।
कोऽपि त्वद्ग्रहणाय बद्धबडिशं दण्डं गृहीत्वा स्थितः
जाले बद्धुमपेक्षते स्थित इतस्त्वां विस्तृते धीवरः॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अन्यापदेशपञ्चकम्-२

—श्री श्रीसुन्दरराजः

१ नीतं निर्झरमर्मरैः मुखरतां नानालतापादपैः
शीतं सुन्दरसानुकन्दरभृतो नूनं मनः कर्षति ।
मा निर्माहि तथाऽपि वासभवनं मित्रात्र हेतुं शृणु
भूकम्पो वसतामिह क्षतिकरो भूयस्समुज्जृम्भते ॥

२ शुण्डं कुण्डलयन्निजोपरि किरन् गण्डूषवारि स्वयं
गण्डक्षोभितपुण्डरीकसरसि स्नात्वा रजोमण्डितः ।
मुण्डे हस्तिपकं ह्यपण्डित इव ब्रह्माण्डकायो वहन्
पिण्डार्थं कृतफेट्कृतिर्द्रुतगतिर्वेतण्ड किं हिण्डसे ॥

३ रे रे सिंह वनं क्व तन्मृगकुलैस्त्वत्कातरैराकुलं
डिम्भास्ते परिवारवर्गगणिताः याताः क्व वा सिंहिकाः।
भीता मत्तमतंगजा अपि कुतस्त्वद्गर्जितेनाधुना
नूनं क्रूरविधेर्विडम्बनमिदं यत्पञ्जरे स्थापितः ॥

४ केयं प्रत्युपकाररीतिरतुला ते नारिकेलद्रुम
सर्वस्वं प्रददासि पोषणकृते न त्वत्कृतज्ञः परः ।
शान्तिं तस्य तृषः क्षुधो वसतये पर्णानि रज्जुं तथा
वित्तं यत्नमृतेऽन्वहं छदिधरस्तम्भादि मृत्वा स्वयम् ॥

५ निःश्रेणे करुणां कथां तव कथं वाचा कया वर्णये
उच्चोच्चं पदमारुरुक्षव इतस्त्वां साधनं तन्वते ।
तत्रैव स्थितिमश्नुषे स्थिरतरां त्वं यत्र पूर्वं स्थिता
कोणे वाप्युपयोगतः परमसि क्षिप्ताऽन्धकारावृते ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सद्गुणषट्कम्

—श्री श्रीसुन्दरराजः

१ भद्रद्रोग्धृदरिद्रताऽभिधमहाकद्रूसुतोपद्रवाः
निर्विच्छेदविघातततापततिभिस्सन्तोऽपि सन्तापिताः ।
ते ये केचन काञ्चनोपमगुणाः नित्यं स्वभावाच्युताः
तेषामेष कृते कृतस्सविनयं कोऽपि प्रणामाञ्जलिः ॥

२ मत्तं कर्तुमलं मनश्चलमितो वित्तेशतो विस्तृतं
वित्तं प्राप्य तथाऽप्युदारहृदयाः उन्मत्तभावोज्झिताः ।
वृत्तं सत्तममुत्त्यजन्ति न कदाऽप्यायत्तचित्ता हि ये
उत्तुंगेन वहेयमुत्तमगुणान् तानुत्तमांगेन मे ॥

३ पत्यौ सत्यपि रत्यदायिनि तुदत्यत्यन्तमत्याहितैः
सत्यं पत्यनुकूलमेव सततं कृत्यं दधत्यस्स्वयम् ।
पथ्यं पत्युरनाचरन्ति जहति स्वान्यप्यपत्यानि याः
नित्यं ताः प्रणिपत्य मर्त्यनिवहैः स्तुत्या हि सत्यः स्त्रियः ॥

४ आचार्यं परिचर्यया विविधया संतोष्य शिष्यास्ततः
आहार्या अवधार्य धुर्यधिषणाः विद्यास्सपर्यापराः ।
आचार्योदितकार्यजातमविचार्यातन्वते ये हि तान्
आश्चर्योन्मिषदात्मबोधसुभगानार्यान्नमामो वयम् ॥

५ रागक्रोधभयव्यतीतहृदयो यो वेदविद् ब्रह्मवित्
सत्त्वस्थस्समयानुगो मधुरवागाचारशीलश्शुचिः ।
शिक्षायामनुशासनेऽपि कुशलश्शास्त्रोपदेष्टा महान्
अस्मत्पुण्यवशादुपागत इतस्संभाव्य सेव्यो गुरुः ॥

६ दातारौ मम जन्मनो भगवतः प्रत्यक्षरूपाविति
यो मातापितरौ प्रणम्य चरितैः प्रीणाति नित्यं शुभैः ।
आदेशं परिपालयन् परिचरन् वृद्धौ पुनः श्रद्धया
श्राद्धाद्यैः मरणात्परं च तनयश्रेष्ठाय तस्मै नमः ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# प्रभो ! कामये त्वाम्

—चन्द्रभानु त्रिपाठी
३४, बलरामपुर हाउस, इलाहाबाद-२११००२

न याचे त्वदन्यत् प्रभो ! कामये त्वाम् ।
सदा सम्बलं स्वं मुदा प्रार्थये त्वाम् ॥

न वित्तं समीहे न विद्यावितानम् ।
न वास्तूनि वासांसि नो भूषणानि ॥
मनो मेऽनुरक्तं न सिद्धौ प्रसिद्धौ ।
न भोगेषु रागो न मुक्तेर्विरागः ॥
प्रभो ! मेऽभिलाषो सदा कीर्त्तये त्वाम् ।
न याचे त्वदन्यत् प्रभो! कामये त्वाम्॥

स्वकर्मानुसारं शरीरादि लब्धम् ।
अनुष्ठेयकार्याणि चानुष्ठितानि ॥
न कर्मप्रपञ्चस्य काष्ठा भवित्री ।
भवारण्यजालान्तरालान्न मुक्तिः ॥
कृपालो ! कृपाया अतश्चिन्तये त्वाम् ।
न याचे त्वदन्यत् प्रभो! कामये त्वाम्॥

भवेज्जन्म कुत्रापि देहोऽस्तु कश्चित् ।
सुखं वाऽस्तु दुःखं जरा यौवनं वा ॥
वियोगः प्रियेणाप्रियेणास्तु योगः ।
भवेन्मित्रपोषोऽथवाशत्रुरोषः ॥
प्रभो ! त्राणदं प्राणिनामाश्रये त्वाम् ।
न याचे त्वदन्यत् प्रभो! कामये त्वाम् ॥

अहो ! दीनबन्धो ! मुधा पीडये त्वाम् ।
भ्रमन् जीवलोके स्वयं भ्रामये त्वाम् ॥
न मुक्तोऽस्मि यावन्न सम्मोचये त्वाम् ।
अनाथोऽस्मि नाथं स्वमाकारये त्वाम् ॥
भजे त्वां धियाऽऽराध्यमाराधये त्वाम् ।
न याचे त्वदन्यत् प्रभो! कामये त्वाम् ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# शुभाशंसनम्

–प्रो० डॉ० मु०ला० वाडेकरः,
प्रधानसम्पादकः/प्रोफेसरः,
ओरियण्टल इन्स्टीट्यूटः, पैलेस-गेट-निकटे, एम०एस० यूनिवर्सिटी,
वटपत्तनम् (बडोदरा)-३९०००१

साहित्ये रमणीयवस्तुनि रतः काव्ये नवीने तथा
नैकस्थानगतप्रवृत्तिचतुरः संभाषणे वाक्पटुः ।
छात्रानेकसमावृतः सुमनसां वृन्दैः सुसंमानितो
राजेन्द्रो विबुधो लतासहचरो जीव्यात्समानां शतम् ॥

पारार्थ्यं विविधं तपस्त्रयमितं कार्यं समायोजितं
आनृण्यस्य निदर्शकं सुविदुषां संमानसंयोजनम् ।
वृत्तिं स्वां सकलां परार्थनिरतां कर्तुं समर्थः सदा
राजेन्द्रो जयताल्लतासहचरः सैषा मनीषा मता ॥

दीर्घायुरस्तु नितरां परितुष्टिरस्तु
सुस्वास्थ्यमस्तु सकलार्तिविनष्टिरस्तु।
कामाप्तिरस्तु, सततं भवभक्तिरस्तु
नित्यं स्वधर्मरतिरस्तु सुनीतिरस्तु ॥

(इमे श्लोका वाडेकरमहाभागेन ४-५-१९९९ ई० तारिकायां बडौदाप्राच्यविद्यामन्दिराध्यक्षस्य प्रो० डॉ० राजेन्द्रनानावटीमहाभागस्य षष्टिपूर्तिसमारोहे प्रस्तुताः। समारोहोऽयं बडोदरानगरेसंस्कृतसेवासमितिप्राच्यविद्यामन्दिर-संस्कृतविभाग-संस्कृतमहाविद्यालयानां संयुक्ततत्त्वावधाने समायोजितोऽभूत्।
—सम्पादकः)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# दृश्यते काऽपि लोके विचित्रा प्रथा

–डॉ० मनुलता शर्मा
(संस्कृत विभागाध्यक्षा, आर्य महिला डिग्री कॉलेज, वाराणसी)

स एव शिल्पी करणानि तानि
भूतानि पञ्चैव कलाकुलानि ।
को वेत्ति धातुर्निखिलं चरित्रं
नियामकं तत्र तु कर्म चित्रम् ॥
भासनादेकरूपे पदार्थेऽन्यथा ।
दृश्यते काऽपि लोके विचित्रा प्रथा ॥१॥

या सुवर्णा सुवृत्ता मनोज्ञा कृतिः
शास्त्रसम्भावनाभूषिता व्याहृतिः ।
स्पर्धया सा मुधा गर्हयन्ती सतीं
सेवते रोषदोषादवद्यां मतिम् ॥
तल्लवित्रं चरित्रं तनोति व्यथाः
दृश्यते काऽपि लोके विचित्रा प्रथा ॥ २

उन्नतिर्भूतये नम्रतां तन्वती
सत्फलानां भरात् शाखिनां दृश्यते।
गर्वसम्पर्कतश्चेत्प्रचण्डायते
ज्ञानमात्रं तदा वै वितण्डायते ॥
लुप्यमाना प्रपञ्चे तदा सत्कथा ।
दृश्यते काऽपि लोके विचित्रा प्रथा ॥ ३

उल्लसन्ती हसन्ती सुपुष्पा वनी
भूषयन्ती सदा भ्राजते याऽवनिम् ।
भृङ्गमालां गुणग्राहिणीं व्याकुलां
कुर्वती दृश्यते कण्टकैः सङ्कुला॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्ततोदं सृजत् तत्सुरूपं वृथा ।
दृश्यते काऽपि लोके विचित्रा प्रथा ।। ४ ।।
किं वदामो वयं लौकिकीं संस्थितिं
दन्दशूका दशन्त्येव मर्माणि नः ।
वृश्चिका भोगिनो मत्कुणा मक्षिकाः
पीडयन्त्येव कीटास्तनुं सर्वदा ।।
निर्मितिर्वैधसीयं यथा स्यात्तथा
दृश्यते काऽपि लोके विचित्रा प्रथा ।। ५

प्रेषणतिथिः-१७-६-९९

●

# विधिरमणि !

–डा० भास्कराचार्य त्रिपाठी, भोपाल

सितवसन-मितहसन-मधुमितरसनवति
विधिरमणि तव न भव उपमितिमनुभवति ।।१।।
निगम-तिलकितवपुरुषसि तव दिवि लसति
यदुपनतदृशि विनतजगदधिचिति वसति
वटु-वरटकुलमपि च वलदपचिति भवति
विधिरमणि तव न भव उपमितिमनुभवति ।।२।।
करकलित-जपवलित-मणिगुण उरु चलति
स हि सततमपि जगति शुभगतिमनुफलति
नवल-मतिभरमिह तरलयति यतिमवति
विधिरमणि तव न भव उपमितिमनुभवति ।।३।।
तव ललितरव-तत-ककुभ-परिमिलदुरसि
तरति सुतरतिरनुलहरिरिव हिमसरसि
विबुधजनिकृत-सुकृतिरिह जनमभिभवति
विधिरमणि तव न भव उपमितिमनुभवति ।।४।।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सपदि सुरनदि !

–डा० भास्कराचार्य त्रिपाठी
साउथ टी०टी० नगर, भोपाल

तरलपरिचल-कलितकलकल-लहरि भगवति कुलजननि
सपदि सुरनदि दलय मम खलु दुरितचयमपचय-शमनि ।।१।।

तव मृदुल-सिकतिलपुलिनमहमगममतिरुचिकरखुरलि
शिशुरभवमयि बल-कलनमपि न तदकृषि विशकलितकलि
न खलु चिरयति य उ विविदिषति विधुमुषसि विधुरुचिदमनि
सपदि सुरनदि दलय मम खलु दुरितचयमपचय-शमनि ।।२।।

हरिचरण-नखलुलितजलकण-रचितशुभतनुरवतरसि
हरशिरसि घनविपिन-समदृशि कुतुकविचरणमनुसरसि
तदनु हिमगिरिमथ धरणिमनुपतस्रि जलरयमय-धमनि
सपदि सुरनदि दलय मम खलु दुरितचयमपचय-शमनि ।।३।।

तटिनि तव तटगत-नगरचय-सकलपरिचयमुपनयति
यदि भुजगपतिरखिलमुखततिमिह सुचिरमतिमुखरयति
चटुल-विलशय-झषमकरमयतटिनि जय जलचरवमनि
सपदि सुरनदि दलय मम खलु दुरितचयमपचय-शमनि ।।४।।

कपिलपरिणति-सगरसुतततिरिह सुगतिमलभत सपदि
विनतिरत-कुलमकृत सकुशलमिह च रघुपतिरपि विपदि
नवममृतमिव जनमवति तव सलिलमयि भवभय-यमनि
सपदि सुरनदि दलय मम खलु दुरितचयमपचय-शमनि ।।५।।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# स्तवमधु

–'अभिराज' डा० राजेन्द्र मिश्रः, शिमला

जय जननि दुरितचयहरणि तरणि भवजलनिधिहृदि मयि सततमभय-
मुपहर हर हर रिपुनिचयजनितकटुकलुषसरणिमव पशुपतिचरण-
युगलकुवलयमधुसुरसरसनपटुमतिमधुकरि गजवदनरदनयुग-
सरसिततनुरथ धनसखसखमुखविधुसदमृदहृतनिखिलगरलनिभ-
हृदयविकृतिरयि सकलभुवनभरमव वह वह !! ॥१॥

विलसति तव शिरसि गगनमिदमयि तव चरणयुगलमपि जलनिधि-
रिह विशदयति सदयमतिधवलसलिलहृतभसितमुपरि विधुरपि
तव मुखमथ जननि तरणिरपि नयनयुगलमनुसरति नियतिरपि मति-
रपि गतिरपि जगति तव नयनजलजवलितदिशमिति विलससि सुर-
सदसि जननि परहितजनिरिव ननु जयसि जयसि ॥२॥

त्वदधरयुगविलसितमिव मधुमयि शतसुमविकसनमिह विततजगति तव-
पदगतिरपि रविशशिकुजबुधगुरुभृगुसुतशनिगतिरमितवियति तव वदन-
विधुजमधुमसृणवचनमनुहरति जननि शुकपिकवरवरटचटकघनसख-
चितिहरणरसितमपि तव वरवसनविविधपरिणतिमभिनयति जलदतति-
रपरनभसि विरमणमुपगतवति निहततमसि ननु भगवति शनियमयमज-
पितरि वितरसि भवसखि जनविभवमतनु ॥३॥

विभवसि हतदनुजतमसि जयजयजयकृतिभिरभयमतिविबुधसदसि
वरुणसि धनदसि शतमखसि यमसि पवनसि हुतवहसि जननि गणपसि
रिपुजनितविपदि कृशभुवनमवसि जनयसि पुनरभिनवसुकृतसरणिमप-
नयसि कदनमथ सृजसि सुमधु विधिमयि हरिमयि शिवमयि सुरमयि
ननु सकलभुवनमयि जयसि जयसि ॥४॥

तव नयनवलयकृतभयविकलितजगदिदमयि मृदिव गलति विदलति
पुनरपि विलसति विकसति विहसति धृतभवदुपकृति भुवि विततवियति
वननगरवसतिमरुगिरिगणकृषिसरिदुपवनकृमिपशुमनुजविहगजलविजनगगनचर-
विरचिततनु ननु जननि भवति विभवति न भवति ॥५॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि जननि निशितशुभमतिकविरसि कुचुटुतुपुयरलवशषसहजगदसि रघुपतिगुणनिचयमहितगतिरसि यदुकुलकुवलयरविललितचरितनवरसमधु-रितविकसितरतिरसि नलनृगगयसगरचरितसृतिरसि गुणधरनतिरसि जगदरिहतिरसि मम निखिलकलुषमुपशमय शमय मम हृदि सुतसुखमधु जनय जनय गजवदनजननि जय जय जय जय ॥६॥

त्रिवेणीकविना भूत्यै चण्डिकाप्रणयार्थिनाम् ।
लघुमात्रस्तवः प्रीत्या कृतोऽयं बुधरञ्जनः ॥७॥
वसुग्रहरसेन्द्वब्दे ख्रिस्तीये बुधवासरे ।
स्तवोऽयं पूर्णतामेति द्वितीयेऽह्नि सितम्बरे ॥८॥

कोटा, प्रातः ७ वादने
२-९-१९९८ ई० ।

# शिवस्तवः

—'अभिराज' डा० राजेन्द्र मिश्रः, शिमला

जय भुवनशरण शिव शमितमरण जय गतिमतिनतिरतिविरतिकरण जय निखिलकुधरपतिकलितचरण सुरसरिदतिचलसितलहरिनिचयविशदित-शतशतकचचिकुरनिचय शिशुतुहिनकिरणसितशकलशमितगलगलितगरल जय गगनवसन वृषपतिविहरण पितृवनवसतिजसहचरणतरल कृतफणिपतिवलय परमसहृदय परिजनसुखसदय गिरिश जय जय ॥१॥

प्रलयशिरसि तिरयसि भुवमनितरसुलभपदहतिभिरहह भुजगधर विषमनयनजनिसुमहदनलचयविततततिभिरथ विदहसि सपदि चतुरधिक-दशमितभुवननिचयमतितमसि विलयसि गगनचरजलचरपवनधरणिचरकृमि-पशुखगगणशफरमकरजलभुजगनिवहमथ विनिहतजलजजरचन इतरयसि विगतमभिनयसि नवमयि नटवर ॥२॥

कलितसगुणतनुरयि सुरपरिवृढ जलधिमथनसमुदितकटुगरलमसुरसुर-लयकरमतिलघु निगरसि भुवनमवसि हर दहसि दनुजपुरमणुरुडनलहति तपसि जनितविकलनममरसखरतिपतिमनसिजमपि विदहसि भव तमतनु-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मथ जनयसि धनपतिसख तदनु परिणयसि नगपतिदुहितरमभययुगलदृश-
मतनुविभवमृतमुपकृतसुरपरिषदमसकृदनलविधिहरिहरसुरपतिधनपतियम-
वरुणसततगतिविशदितयशसमुपजनितगुहगणपतिमयि पुरहर ।।३।।

अशरणशरण सलिलमरुदनलगगनधरणिरविशशिमखकृदुदितवपुरसि
विलससि भुवि-भुवि दिशि-दिशि पुरि-पुरि नरि-नरि हृदि-हृदि दृशि-दृशि
परमसदय निरुपम निरवधिकृप वितरसि नवनिधिमगतिगतिक शिव
शतशतजननियतसहकृतकलिकलुषनिचयहर जयसि विबुधवर यमपि
विपुलयसि निभृतनिभृतमिह स भवति गुणिगणगणनमहिततनुरयि
शशिधर डमरुकधर गुणधर ।।४।।

परिजनसदसि नटसि बहुविधमयि नगपतिदुहितृदयित कुतुकचतुर
हृतसुरयुवतिहृदय विकृतवदनचरकरतलरवमुहुरुपचितरुचिरनितरसुलभनटन-
मथ तव शिव बहुगुणमपगतविकृति पिबति दिवि विकचनयनसरसिज-
ततिरतिशयविनतविबुधजनवसतिरमरपुरि ससनिनिधपगमवदननिसृतमृदु-
भणितिसमनुगतमयि सुललितशिव तदखिलभुवनदुरितमपनयतु ।।५।।

जय जय शिव चतुरधिकवदन जय जय हरिसरसिजजनिसुरबहुमत-
विषमनयन गजवदनजनक जय मनसिजदहन
विबुधहितकर जय रघुकुलकमलतरणिविशदित जय यदुकुलकुमुद
तुहिनकरवृत जय दनुजमनुजसुरमुनिसृतपद जय सुरसरिदभिषव
कलितचिकुर जय कटिगलपरिवृतभुजगनिवह जय डमरुकनिनद
विनिहतकलुष जय जरठवृषभकृतबहुविचरण जय शमितसकल-
जगदमितदुरित जय निरवधिसुखसमुदयवितरण जय विपदनु-
शयपरिमथनसुभट जय जय हर हर जय।।६।।

मिश्रो ऽभिराजराजेन्द्रः स्थित्वा श्वसुरमन्दिरे।
कुरुते शिवस्तवं दिव्यं पुरे हम्मीरसंज्ञके ।।७।।
वसुग्रहग्रहेन्द्वब्दे खैस्ते मासि सितम्बरे ।
रवौ विंशदिनाङ्के च पूरितेयं स्तुतिर्मुदा ।।

२०.९.१९९८ रविवारः
हमीरपुरम्


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# 'भाति मे भारतं' प्राक्तनकाव्यप्रतिबिम्बनम्

–डॉ० ललित कुमार गौडः

वरिष्ठ प्राध्यापकः, संस्कृतविभागे,
डी०ए०वी० कॉलेजः, पिहोवा (कुरुक्षेत्रम्)

संस्कृतसाहित्यमतीव रमणीयमिति तथ्यं तु सर्वविदितमेव। न केवलमेकैव विधा संस्कृतस्यापितु विविधप्रकारकाः विषयाः संस्कृते निहिता विद्यन्ते । वैदिकसाहित्यं तु किञ्चित्काठिन्यं प्रकटयति यतो हि विद्वद्भिः पृथक्पृथगर्थाः विधीयन्ते वैदिकशब्दानां व्याख्या अपि स्वैः स्वैः प्रकारैर्कृताः वरेण्यैः पुनरपि हस्तक्षेपो क्रियतेऽहर्निशं पाश्चात्त्यशिक्षाविद्भिः। परन्तु कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यादित्येतदभिप्रेत्य लिख्यते यत्काव्यस्याध्ययनं प्रदर्शनावलोकनं च सर्वेषामेव सहृदयसामाजिकानां कृते सहजगम्यं विश्रान्तिप्रदमाह्लादकं च भवति। अतः काव्यं तु सर्वेभ्य एव रोचते जगति। अञ्चलसारल्यवशात्कापि भाषा स्यात्कवेः सैव सुबोधयुता आनन्दप्रदायिनी च भवति जनानाम्।

काव्यस्य लक्षणं कुर्वद्भिर्विविधैः प्रातःस्मरणीयैः प्रवराचार्यपादैर्भिन्न-भिन्नरूपैरात्ममतयः प्रकटिताः। तत्रभवता मम्मटाचार्येण काव्यलक्षणे निगदितं यत् यौ शब्दार्थौ दोषरहितौ गुणसहितौ रसाभव्यञ्जकौ च स्यातां कुत्रचिदलङ्कारा-भावेऽपि तौ काव्यमेवास्तः।[१] पण्डितराजेन तु रमणीयस्यार्थस्य प्रतिपादकः यद्वा बोधकः शब्दः काव्यमुक्तम्।[२] अनेनाचार्येण समग्रं साहित्यं सङ्गीतं चोभयं सरस्वत्या स्तनद्वयमुररीकृतमस्ति। तत्रैकमालोचनामृतमन्यञ्चापानमधुरमुक्तम्। वस्तुतः कथनमिदं सत्यमावहति। ध्वनि-दर्शनस्य प्रवर्त्तकः आनन्दवर्धनाचार्यः कथयति यत्कवेर्हेतोः काव्यमन्ततोगत्वा तदर्थवस्तुनः सृष्टिरस्ति यत्सरस्वत्याः आनन्दनिष्यन्दः, कवेः प्रतिभायाः प्रवाहो वर्तते। सहृदयार्थं काव्यं तस्य वस्तुनः आस्वादः अस्ति यत्सरस्वत्यानन्दनिष्यन्दपानं वर्तते सहृदयतायाश्च प्रतिभारः।[३] कविराजेन विश्वनाथाचार्येण रसात्मकं वाक्यं काव्यत्वेन प्रतिपादितम्।[४] जैनाचार्येण वाग्भटप्रथमेन प्रतिभा काव्यस्य कारणं व्युत्पतिर्विभूषणमभ्यासश्चाधिकोत्पादकः इत्थं त्रीण्येवं काव्यकारणानि मतानि।[५]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविः वस्तुतः कवते श्लोकान् ग्रथते वर्णयति वास्तविकं चित्रमुपस्थापयति च । 'कवि' शब्दस्य प्रयोगः शुक्राचार्यस्य हेतोर्भवति ।[६] कदाचिच्च विद्वत्सामान्यार्थे प्रयोज्यते 'कवि' शब्दः।[७] परम्परावशादपारे काव्यसंसारे कविरेकः प्रजापतीत्यपि निगद्यते।

कवेर्भावनासु तदिन्द्रजालं वर्तते यत्सः घृणापरीतान्पदार्थानपि रम्यान्निर्माति, निर्जीवमपि सजीवं करोति जीवनयुतमपि च कदाचिन्निर्जीवं विदधाति।[८] पाश्चात्त्येन विदुषा लेविसमहोदयेनोक्तं यत्काव्यविम्बान्येतादृशानि चित्राणि वर्तन्ते यानि च न कयापि तूलिकया न छायाचित्रयन्त्रेण निर्मीयन्ते इमानि तु कविलेखन्या क्रियन्ते, कल्पनया वर्णयुतानि विधीयन्ते। तेषां रेखाणामाकारः भावनाभिर्निर्मीयते।[९] वस्तुतः वस्तुवर्णने यत्र कवेर्यत्नः रूपयोजनायां वसति, मूले तस्य रागात्मिका वृत्तिर्यद्वा रतिर्निहितास्ति । यदा पाठकस्तां रतिमनुभवति तदैव सः कविना सार्धं तादात्म्यं स्थाप्य बिम्बग्रहणे समर्थो जायते। प्रत्यक्षे दृश्यते यदेकं वस्तु रागात्मकवृत्तिस्पर्शवशादेव सुन्दरं भावान्दोलने वा समर्थं प्रतीयते नान्यथा । उदाहरणार्थं कस्मिंश्चिदेकस्मिन्सुकुमारे पुष्पे कवेरनुभूत्या सार्धं तादात्म्यं कुर्वतः सहृदयस्य कस्या अपि कामिन्या भावविह्वलस्य कलेवरस्य छाया दृश्यते परन्तु तां वृत्तिं विना एकः वैज्ञानिकः तस्य पुष्पस्य वर्णस्य स्निग्धतायाश्च विश्लेषणं कुर्वन् परीक्षणार्थं तत्खण्डेषु विभज्य मर्दयित्वा क्षिप्स्यति। तस्य कृते तु तत्पुष्पं जडपदार्थ एवास्ति। अतः रसानुभूतिस्तु केवलं सहृदयानामेव भवति।[१०]

अस्मिन्नेव सन्दर्भे प्रवराचार्येणार्वाचीनेन कविना डाक्तर रमाकान्तशुक्लेन काव्यस्य क्षेत्रे महती प्रतिभा प्रकटीकृता। न केवलं प्राचीनसाहित्यमेवापितु स्वकीयेषु काव्यग्रन्थेषु बहवः नवीनतापरीता विषयाः स्व काव्यप्रतिभाभ्यासाभ्यां प्रदत्ताः सहृदयसामाजिकेभ्यः ।

यथादिकविना वाल्मीकिनादिकाव्ये रामायणे भगवान् रामः मर्यादापुरुषोत्तमः स्तुतः नमस्कृतश्च समग्रस्य जगतः शरण्यः, सर्वेषामेक एवाश्रयः कलियुगस्य दोषान्तकः श्रीरामचन्द्रो नमस्कार्य इत्युक्तवता[११] तथैव कविवर्येणाचार्यरमाकान्तशुक्लेन स्वकीये काव्ये समर्पणभागे धरित्र्याः शृङ्गारस्वरूपः भारतदेशः नमस्कृतः येनेदं भूतलं प्रतिष्ठायुतं वर्तते यस्य कृपया विश्वेश्वरोऽप्यवलोक्यते।[१२]



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
विद्वन्मूर्धन्येन आचार्यवर्येण प्रभुदत्तस्वामिनोक्तं यद्देवा असुरा च नराः नागाः खगाः मृगाः भृङ्गपतङ्गकीटाश्च अन्यत्सर्वमुपेक्ष्य यां स्वतन्त्रतां कामयन्ते सा स्वाधीनवृत्तिता त्रिलोकेषु सर्वोत्कर्षेण वर्तते।[१३] निसर्गतया तां प्रतिभामेव दधानः कंविवर्यः रमाकान्तशुक्लः वर्णयति यन्मानवाः, दानवाः, सज्जनाः, दुर्जनाः धनिनः निर्धनाः, बलवन्तः, निर्बलाः योगिनः भोगिनश्च सर्वे यद्वाञ्छन्ति तादृशमिदं भारतं मदीयं भूमण्डलेऽस्मिन्ननवरतं शोभते।[१४] तत्रभवान्कविर्भवभूति-र्वर्णयति स्वोत्तररामचरिते यद्गोदावर्या तटिन्यास्तटयोरुभयभागे बहवः वृक्षाः स्थिताः सन्ति। तेषां कोटरेषु खगैः स्वकीया नीडानि रचितानि। रविकिरणासहिष्णवः काकादयः छायायां प्रकृत्यनुरूपं चञ्चुभिः किमपि खाद्यमन्वेषयितुं भूमिं खनन्ति, तरूणां त्वग्भ्यः कीटकानाकर्षयन्ति। पुष्पाणां वृन्तानि शैथिल्यमाप्नुवन्ति। कपोताः कुक्कुटाः ताम्रचूडाश्च कूजन्ति, वन्याः गजाः कण्डूयनेन वृक्षान् सङ्घर्षयन्ति। अनेन प्रकारेण प्रकृत्या वर्णनं सरसमुत्प्रेक्षानुप्रासादीनामलङ्काराणां च चित्रणमतीव रम्यं वर्तते।[१५]

कविवर्यस्याचार्यरमाकान्तशुक्लस्य "भाति मे भारतम्" इति नामधेये काव्ये भवभूतिकृतमिव वर्णनं प्रतिभावशात्स्वाभाविकरूपेणैव शोभते। मन्ये कविरयं प्रकृतेश्चतुरश्चित्रकारो वर्तते। एवमनुभूयते यत्कविनानेन तादृशं वर्णनं सूत्ररूपेणैव ग्रन्थे पिनद्धमित्थं यद्धंसकारण्डवसारसवर्तकक्रौञ्चकाकपिक-खञ्जरीटशुकतित्तिरटिट्टिभश्येनगृद्ध्रादिभिर्युतमिदं मदीयं भारतमनारतं शोभते।[१६] अन्यच्च मण्डनमिश्रेण सह शास्त्रार्थं चिकीर्षता अतएव च तद्गृहजिज्ञासुना शङ्कराचार्येण कूपाज्जलमुद्धरन्ती काचिन्नारी पृष्टा तदा सा कथितवती यद्यत्र द्वारस्थनीडान्तरसन्निरुद्धा शुकाङ्गना संस्कृतेन वार्तालापं कुर्वन्ति तदेव वर्तते मण्डनमिश्रस्य गृहम्।[१७] स्वाभाविकरूपेणैवं तद्वर्णनप्रतिबिम्बमवलोक्यते डॉ० रमाकान्तविरचिते काव्ये स्वभावोक्तिस्वरूपे यत्सारिकाकीरादिभिः वाद-प्रवादाः यत्र क्रियन्ते तदेव मदीयं भारतं रमणीयं तद्विद्यमानम्।[१८]

श्रीमद्भागवतमहापुराणे निगदितं यद्धिंसकः दुष्टस्तु स्वपापेनैव विहिंसितो हतो वेति परञ्च सज्जनः समत्वबुद्धित्वाद्विभिन्नेभ्य भयेभ्यो विमुक्तो जायते।[१९]

इत्थंविधं वर्णनमपि सहजभावेन कविबुद्धिप्रवाहेण तत्रभवता प्रवराचार्येण रमाकान्तशुक्लेन स्वकीये काव्यप्रबन्धे कृतं यत् सत्यं सदैव यत्र जयं लभते


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पराजयं याति चानृतं तादृशमिदं भारतमस्मदीयं राजते भूतले।[२०]

अलङ्कारा: स्वयमेव स्वकीयां पराकाष्ठां दधति। यथा माघकविना स्वकीये महाकाव्ये वृत्त्यनुप्रासस्य छटा प्रदर्शिताऽस्मिन् पद्ये 'म'कारेण–

**मधुरया मधुबोधितमाधवी मधुसमृद्धि समेधितमेधया ।[२१]**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥**

तथैवाचार्यरमाकान्तशुक्लस्य काव्ये 'न'कारावृत्त्या सहसैवावलोक्यते निसर्गतया–

**विद्युदुत्पादने तैलसंशोधने,**
**इन्धनान्वेषणे लौहनिष्पादने ।**
**यन्त्रनिर्माणकार्ये समर्थं च सद्**
**भूतले भाति मेऽनारतं भारतम् ॥[२२]**

कालिदासस्यैकं पद्यं प्रस्तूयते यस्मिन् 'कुमार:' इत्येतस्मादारभ्य 'चकार' इत्येतस्मिन् य: 'आर'ध्वनिझङ्कार: स: क्रियासातत्यं सूचयति। अत्र वर्तते अन्त्यानुप्रासस्य प्रयोग:–

**इति विरचितवाग्भिर्वन्दिपुत्रै: कुमार:**
**सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।[२३]**

तद्वदाचार्यरमाकान्तशुक्लस्य काव्ये स्वाभाविकतया अन्त्यानुप्रासस्याविर्भाव: निम्नलिखितयोर्पद्ययो:–

**ज़ाह्नवीचन्द्रभागाजलै: पावितं**
**भानुजानर्मदावीचिभिर्लालितम् ।**
**तुङ्गभद्राविपाशादिभिर्भावितं**
**भूतले भाति मेऽनारतं भारतम् ॥**
**विन्ध्यसह्याद्रिनीलाद्रिमालान्वितं**
**शुभ्रहैमाद्रिहासप्रभापूरितम् ।**
**अर्बुदारावलीश्रेणिसम्पूजितं**
**भूतले भाति मेऽनारतं भारतम् ॥[२४]**

एतयो: पद्ययोरुभयोरेव 'तं' 'तम्' इति ध्वनिरन्त्यानुप्रासं व्यनक्ति। अनुप्रासस्य छटा तु भिन्नभिन्नेषु रूपेषु स्वाभाविकरूपेणैवावलोक्यते। स्वभावोक्त्यलङ्कारोऽपि वर्तते प्रायश:।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः राष्ट्रभक्तिभरितमिदं काव्यं साहित्यस्य क्षेत्रे महतीमुपादेयतां धत्ते। काव्ये सर्वत्र सर्वदैव कवेर्व्यक्तित्वं दर्पण इवावलोक्यते। अन्ते च एवमेव लिख्यते यन्मयानुमीयते कविनानेनाचार्यरमाकान्तशुक्लेन न केवलं साहित्यमधीतमपितु वेदाः, पुराणानि, स्मृतयः, उपनिषदः, धर्मशास्त्रादीनि च सर्वाण्येव शास्त्राण्यधीत्य साहित्यसर्जनं कृतं यतो हि समस्तस्य वेदशास्त्रसाहित्यात्मकस्य ज्ञानस्य प्रतिबिम्बमिवाभाति नूतनमिदं काव्यं 'भाति मे भारतम्' नाम। ओ३म् शम्।

## सन्दर्भाः

१. तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि । –मम्मटः, काव्यप्रकाशः, १/१

२. रमणीयार्थप्रतिपादकः शब्दः काव्यम् । –पण्डितराजजगन्नाथः, रसगङ्गाधरः, १/१

३. सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥
–आनन्दवर्धनाचार्यः, ध्वन्यालोकः, १/६

४. वाक्यं रसात्मकं काव्यम् । –कविराज विश्वनाथः, साहित्यदर्पणः, १/३

५. वाग्भटालङ्कारः, १/३

६. शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः । –अमरकोषः १/३/२५

७. विद्वान् विपश्चिद्दोषज्ञः...........सङ्ख्यावान् पण्डितः कविः । –अमरकोषः, २/७/५

८. भावानचेतनानपि चेतनवच्चेतनानचेतनवत् ।
व्यवहारयति यथेष्टं सुकवि काव्ये स्वतन्त्रतया ॥
–आनन्दवर्धनाचार्यः, ध्वन्यालोकः, पृ० ४९८

९. Image, however, beautiful—do not of themselves characterize the poet. They become proofs of original genius only as far as they are modified by a predominent passion; or by associated thoughts or image awakened by that passion.
—Lewis; The Poetic Image. Page 10

१०. तैश्चायं प्रकर्षप्राप्तैः सप्तार्चिरर्चिश्चयैरिव प्रकाशमानः शृङ्गारिणामेव स्वदत इति।
–शृङ्गारप्रकाशः, २/४३१

११. श्रीरामः शरणं समस्तजगतां रामं विना का गतिः ।
रामेण प्रतिहन्यते कलिमलं रामाय कार्यं नमः ॥ –वाल्मीकिरामायणम्, १/१

१२. भारताद्भाति मे भूतलं भूतलं भारतस्य प्रतिष्ठास्ति मे मानसे ।
भारतेऽहं प्रपश्यामि विश्वेश्वरं भारत ! क्षोणिशृङ्गार ! तुभ्यं नमः ॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३. देवा अदेवाश्च नराश्च नागाः खगा मृगा भृङ्गपतङ्गकीटाः ।
यां प्रार्थयन्तेऽन्यदुपेक्ष्य सर्वं स्वतन्त्रता सा जयति त्रिलोक्याम् ॥
—आचार्य प्रभुदत्त स्वामी, देवकीदेवनम्, दान्ति, ४४

१४. मानवैर्दानवैस्सज्जनैर्दुजनैस्सद्धनैर्निर्धनैस्सद्बलैर्निर्बलैः ।
निर्जरैर्योगिभिर्भोगिभिश्चार्थितं भूतले भाति मेऽनारतं भारतम् ॥
—डॉ० रमाकान्तशुक्लः—'भाति मे भारतम्', श्लोकः ४

१५. कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि-
र्घर्मस्रंसितबन्धनैश्च कुसुमैरर्चन्ति गोदावरीम् ।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥
—भवभूतिः, उत्तररामचरितम्, २/९

१६. हंसकारण्डवैस्सारसैर्वर्तकैः क्रौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः ।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं भूतले भाति मेऽनारतं भारतम् ॥
—डॉ० रमाकान्तशुक्लः, 'भाति मे भारतम्', श्लोकः ४४

१७. स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरं गिरन्ति ।
द्वारस्थनीडान्तरसंनिरुद्धा जानीहि तन्मण्डनपण्डितौकः ॥
—मध्वाचार्यः, शंकरदिग्विजयम्, ८/६

१८. कोकिलैः कूजितं षट्पदैर्गुञ्जितं केकिभिर्नृत्यपारङ्गतैर्नादितम् ।
सारिकाकीरवादप्रवादैर्युतं भूतले भाति मेऽनारतं भारतम् ॥
—डॉ० रमाकान्तशुक्लः, 'भाति मे भारतम्', श्लोकः ४०

१९. हिंस्रः स्वपापेन विहिंसितः खलः साधु समत्वेन भयाद् विमुच्यते।
—श्रीमद्भागवतमहापुराणम्, १०/७/३१

२०. यत्र हिंस्रः स्वपापैः स्वयं हिंस्यते यत्र साधुः समत्वाद्भयान्मुच्यते ।
यत्र सत्यं जयं याति नैवानृतं भूतले भाति मेऽनारतं भारतम् ॥
—डॉ० रमाकान्तशुक्लः, 'भाति मे भारतम्', श्लोकः ७५

२१. माघः—'शिशुपालवधम्', ६/२०

२२. डॉ० रमाकान्तशुक्लः, 'भाति मे भारतम्', श्लोकः १२

२३. कालिदासः, 'रघुवंशमहाकाव्यम्', ५/७५

२४. डॉ० रमाकान्तशुक्लः, 'भाति मे भारतम्', श्लोकः ९, १०



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भवतां पत्रम्

(१)

९-७-९९ श्रीः २८, महामनःपुरी, वाराणसी-५

प्रियवराः शुक्लमहोदयाः!

स्वस्ति !

अत्रभवद्भिः प्रेषितास्त्रयोऽप्यर्वाचीनसंस्कृताङ्काः प्रपूर्वेद्युरवाप्ताः । अस्यै कृपायै कृतज्ञतामाबिभर्मि । अर्वाचीनसंस्कृतम्, भवतामेवाध्यवसायेनाद्यापि ध्रियते । अस्यै संस्कृतसेवायै भवन्तोऽस्माकं समेषामेव कृते शतशतसाधुवादपात्रायन्ते । भवन्तः सुस्थशरीरास्तिष्ठन्त्विति नः कामना ।

१५-४-१९९९ इति दिवसीयादङ्कादवेदि दिवङ्गतस्तत्रभवान् वासिष्ठ इति । स एष खेदस्य विषयः । तस्य ग्रन्था अत्रभवद्भिः प्रकाश्यन्त इति महतः परितोषस्य विषयः ।

अथ पुरोभागिता ।

(१) १५-१-१९९८ अङ्कस्य संपादकीये 'साक्षात्क्रियेयुः' इति

(२) १५-४-१९९९ दिवसीयस्याङ्कस्य संपादकीये 'अनूदयितुः' इति एतदुभयमपि 'साक्षात्क्रियेरन्निति, 'अनुवदितुः इति'च परिवर्त्तनमर्हति ।

(३) अत्रैव (२१/१-२) अङ्के '**पितुः श्री अनन्तरामशर्मणो जनन्यामि**'ति यः प्रयोगः, तत्र कस्य जननीति जिज्ञास्ये अनन्तशर्मपदस्याव्यवहितपूर्वतया प्रयोगेऽनन्तशर्मण एव जननीति प्रतीयते, अस्ति च विवक्षितमत्र स्वकीयायां जनन्यामि'ति । सेयं वाच्यावचनाऽवाच्यवचनयोर्दोषयोः प्रसक्तिः ।

सर्वथा स्तुत्योऽपि भवतां परिश्रम एष कीटदंशमिव भ्रंशकालुष्यं बिभर्त्ति तत्र तत्र। कृपयाऽवदधतुतमाम् अत्र।

भवति च भवतां मध्यमा हिन्दीसमुचिता। वैखर्यामत एव संलक्ष्यते क्वचिद् विजातीयभावः। तत्राप्यवधानमपेक्ष्यते।

तिरुपतिसमाचारे यदि महामहोपाध्यायसम्मानप्रसङ्गे न स्मृतो भवतामग्रजः सनातनस्तत्र नास्ति विस्मयः, डॉ० रमारञ्जनमुखर्जिमहाभागस्य तु विस्मरणं कथं नु जातमिति न शक्यते वेदितुम्।

डॉ० राधावल्लभत्रिपाठिने पं० जगदीशो यदि साक्रोशः तर्हि न पश्यामि तत्राऽसमञ्जसताम्। आक्रोशेऽस्मिन्नस्त्येव किमपि वास्तविकमपि मूलम्। अतः पश्यामि तत्राक्रोशेऽपि सारम्। पं० बलदेवोपाध्यायोऽप्यत्र जागरूकः कृतः समीक्षकेण विदुषेति तस्मै साधुवादानां शतीं वितरामि।

अवस्थी बाबूरामो 'मनः शोकाकुलो ह्यभूत्' इति 'गरिमामय' इति च किं वा व्याकरणमाश्रित्य लिखति। आशुकविरेषः। कदाचिच्छोकविह्वलतया योजनामिमामाशिश्रिये।

पौरोभाग्यायास्मै जन एव क्षन्तव्यः। भवतामभ्युदयातिशयं कामयमानः शुभैषी द्विवेदी—

—रेवाप्रसादः सनातनः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

( सम्पादकस्य निवेदनम् )

सम्माननीयेभ्यो डॉ० द्विवेदिमहाभागेभ्य:

सादरं नमो नम: !

(१) पत्रलेखनार्थमनुगृहीतोऽस्मि। पाणिनीयव्याकरणाज्ञानपिशुनप्रमादार्थं क्षन्तव्योऽयं जन आयत्यामत्रावधित्सेदित्याशा करणीया। तथापि स्खलनं मानवप्रकृतिरिति नियमाद्यद्यायत्यामपि काचित्त्रुटिर्भवेत्तर्ह्यवश्यमेवानुकम्पनीयोऽयं जनस्तत्संशोधनपरेण पत्रेण।

(२) '**पितु:..............जनन्या**'-मित्यत्र अव्यवहितप्रयोगे सत्यपि मन्ये न कोऽपि भारतीयो भावत्कीं कल्पनां द्रढयितुमुत्सहेत। पितु: किन्नामधेयात्=श्री अनन्तरामशर्मण:, जनन्यां किन्नाम्न्याम्=द्रौपद्याम्, किन्नामा सुत:=सत्यदेवनामा अजायत।

अत्र '**पितु:**' इत्यस्मात्पूर्वं '**स्वकीयात्**' इत्यस्य विशेषणस्य '**जनन्याम्**' इत्यत: पूर्वं '**स्वकीयायाम्**' इत्यस्य वा पदस्य स्थापनात्र भवति कापि विशिष्टा स्पष्टता । यस्य पुत्रस्य पिता, तस्य पुत्रस्यैव जननी अस्ति। आलङ्कारिकाणां मतेन 'वाच्यावचनाऽवाच्यवचनदोषयो:' प्रसक्त्यामपि लोकस्यास्था इमां जिज्ञासां कर्तुमवसरं न कस्मैचिदपि दास्यति-कश्चित् स्वकीयायां पितामह्यां स्वपितु: पुत्रत्वेन जात इति। श्रुत्वा देव: प्रमाणम्।

(३) तिरुपतिवार्ता न मया व्यलेखि। आशासेऽनागतेऽनेहसि संवाददातारो न प्रमुखां वार्तामवज्ञास्यन्तीति।

(४) भवतां मन्त्रितिं कृपालोस्तपोनिष्ठस्यर्षेराशीर्वादत्वेनाङ्गीकुर्वन्नहम-र्वाचीनसंस्कृते प्रकाशनार्थं कामपि प्रत्यग्रां रचनां प्रेषयितुं तत्रभवन्तं सादरमवरुणध्मि भवन्निष्ठो

रमाकान्त शुक्ल:

( २ )

दिनाङ्क: १७.७.९९

सम्पादक:,
'अर्वाचीनसंस्कृतम्'
देववाणी-परिषद्, दिल्ली
६, वाणि-विहार:, नयी दिल्ली-११००५९
रमाकान्त शुक्ल महाभागा:

सादरं वन्दनानि,

भवद्भि: अतीव कृपया प्रेषितं ''अर्वाचीनसंस्कृतं'' इति त्रैमासिकपत्रं सम्प्राप्तम्। अर्वाचीनसंस्कृतविषये ईदृशं पत्रं विशेषप्रयासेन सम्पाद्यते इत्ययं विषय: महदानन्ददायक:। इदं पत्रं तावत् अस्माकं ग्रंथालयस्य विशेषत: शोभां आवहति। इत: परं अस्माभि: संसद्द्वारा प्रकाश्यमाना ''तत्त्वदीप:'' नाम त्रैमासिकी पत्रिका विनिमयरूपेण प्रेष्यते इति आवेदयितुं उत्सुक: अस्मि। भवद्भि: एकवारं अत्र आगत्य अस्माकं संस्था अवेक्षणीया अनुग्राह्या च।

इति भवदीय:

म०अ० लक्ष्मीताताचार्य:

निदेशक:, संस्कृत-संशोधन-संसत्, मेलुकोटे ५७१४३१



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


प्रियवर्या:

अर्वाचीनसंस्कृतस्य २०/१ अङ्के जगदीशशास्त्रिणोऽधिक्षेपं दृष्ट्वा नितरां प्रीतोऽस्मि। एतेन संस्कृतज्ञा उष्ट्रविवाहगर्दभगानन्यायेन परस्परं प्रशंसन्त्येवेति भ्रान्ता धारणा निराकृता भवति।

अधिक्षेपमधिकृत्य न मया किमपि प्रतिवाच्यम्। केवलम्– राष्ट्रियसंस्कृतसंस्थानेन प्रकाशिते मम 'संस्कृत साहित्य-बीसवीं शताब्दी'इति ग्रन्थे वर्णेकर-रेवाप्रसाद-बटुकनाथ-भास्कराचार्य-दीक्षितपुष्पाद्या अपि यथामति विवेचिताः, न मया सम्पादित उ०प्र० संस्कृताकादेमीप्रायोजित आधुनिकसंस्कृतसाहित्येतिहासग्रन्थः (संस्कृत- साहित्येतिहासस्य मत्सम्पादितः प्राचीनकाव्यविषयकः खण्डः तयैवाकादम्या गतवर्षे प्रकाशितः); 'षोडश्यां' १९६० ई० तः–१९८० ई० पर्यन्तं प्रकाशितानां रचनानामेव समावेशः करणीय आसीत् इति विदाङ्कुर्वन्तु विज्ञा इति विज्ञापयति

सागरतः, १९.७.९९ राधावल्लभः।

अर्वाचीनसंस्कृतसम्पादकः, नव देहली

## देववाणी-परिषद्वार्ता

(१) देववाणी-परिषदस्तत्त्वावधाने ७-७-१९९९ ई० तारिकायां कनखलनगरे 'गोविन्दकुटीरे' संस्कृतसमूहगानकार्यक्रम आयोज्यत यत्र परिषदुपाध्यक्षायाः श्रीमत्या रमाशुक्लाया आध्यक्ष्ये परिषन्महासचिवस्य डॉ० रमाकान्त शुक्लस्य सान्निध्ये डॉ० ब्रजभूषणशर्मणो मुख्यातिथित्वे शिशुभिः **'भाति मे भारतम्'** समूहगानरूपेण प्रस्तुतम्। गौरवशर्मा **प्रथमं** स्वाति शर्मा **द्वितीयं** गरिमा शर्मा **तृतीयं**, प्राची च **चतुर्थं** स्थानमवापुः। अस्मिन्नवसरे श्रीमती रीता देवी, श्रीमती ममता देवी संस्कृतस्य प्रचारार्थं स्वविचारान् प्राकटयन्। कार्यक्रमस्य सञ्चालनं श्री अश्विनी कुमार शर्मणा कृतम्।

(२) परिषदश्चतुर्विंशः सङ्कल्पनादिवससमारोहः २१-८-१९९९ ई० तारिकायां १०.३० वादने 'राजधानीकालेज, राजा गार्डन, नयी दिल्ली-११००१५' इत्यत्र सम्मानयिष्यते।

(अभिनवः शुक्लः)

### संस्कृत-जगद्वार्ता

**(१) दिल्ली संस्कृत अकादमी :** (१) अकादम्याः स्थानसङ्केतपरिवर्तनमित्थं सञ्जातम् :–'दिल्ली संस्कृत अकादमीः दिल्ली सरकार, पूर्व भारती महिला कालेज भवन, प्लाट नं० ५, झण्डेवालान, करौल बाग, नई दिल्ली-११०००५ ।'

अकादम्या २४-७-१९९९ ई० तारिकायां फिक्कीसभागारे संस्कृत-छात्रवृत्तिवितरणसमारोहः समायोजितः यत्र संस्कृतछात्रेभ्यः चतुर्लक्षरूप्यकाणां राशिः वृत्तित्वेन प्रदत्तोऽभूत्। मुख्यातिथित्वं श्रीकुलानन्दभारतीयेन आध्यक्ष्यं च डॉ० मण्डनमिश्रेण कृतम्।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
अकादम्या २८-७-१९९९ ई० तारिकायां श्रीमद्दयानन्दवेदविद्यालये 'संस्कृतवाङ्मये युद्धविद्ये'ति विषयमवलम्ब्य परिचर्चायोजिता यस्या उद्घाटनम् अकादम्या उपाध्यक्षेण श्रीकुलानन्दभारतीयेन कृतम्। आध्यक्ष्यं डॉ० चक्रधरबिजल्वानेन कृतम्। परिचर्चायां डॉ० शशि तिवारी, डॉ० मोहनचन्दः डॉ० गणेशदत्तशर्मा, डॉ० कृष्णलालः, डॉ० के०के० मिश्रः, डॉ० उर्मिल रुस्तगी, डॉ० काशीनाथ तिवारी, डॉ० क्षेमचन्द्रः, श्रीश्रीधर प्रसाद बलूनी, डॉ० दर्शन कुमार सीकरी, डॉ० भास्करानन्द पाण्डेयः, डॉ० स्वराज गुप्ता, डॉ० प्रवेश सक्सेना, डॉ० दलवीरसिंहः श्री मदनमोहन जोशी च स्वविचारान् प्रकटयामासुः।

३१-७-१९९९ ई० तारिकायां अकादम्या स्वभवने ८६ संस्कृतविद्वांसः साहित्यरचनार्थ, शिक्षणार्थ, शोधार्थ संस्कृतभित्तिचित्ररचनार्थ च पुरस्कृताः। पुरस्कृतेषु विद्वत्सु, डॉ० भास्कराचार्य त्रिपाठी, 'अभिराज'डॉ०राजेन्द्रमिश्रः, डॉ० परमानन्द शास्त्री, प्रो० जगदीशप्रसादसेमवालः, डॉ० शिवसागरत्रिपाठी, श्रीमहेशचन्द्र शर्मा च प्रमुखाः सन्ति।

(२) **'सेण्टर ऑफ एडवांस स्टडी इन संस्कृत, यूनिवर्सिटी, पुणे-४११००७'**- इत्येषा संस्था साहित्य-अकादम्याः सहयोगेन २९.११.१९९९—२.१२.१९९९ ई० तारिकासु **'स्वतन्त्रे भारते संस्कृतलेखनम्'**इति विषयमवलम्ब्य शोधपत्रवाचनगोष्ठीं परिचर्चां च समायोजयतीति विज्ञापयति संस्थानिदेशकः प्रो० वी० एन० झा-महोदयः।

(३) भारतस्य महामहिमराष्ट्रपतिना ७-६-१९९९ ई० तारिकायाम् राष्ट्रपतिभवने संस्कृतारबीफारसीभाषाविद्वांसः सम्मानप्रमाणपत्रैरलङ्कृताः।

(४) **मध्यप्रदेशसंस्कृत अकादमी, भोपाल-३** : अकादमी १९९३ तः १९९६ यावत् प्रकाशितानां **'त्रिवेणी'**, **'अधिविज्ञानं दर्शनशास्त्रं'**, **'गीतधीवरम्'**, **'बालरामायणम्' (प्रथमभागः)**, **'वादत्रयी'** चेत्येतेषां ग्रन्थाणां क्रमशो लेखकेभ्यः सर्व डॉ० श्यामदेव पाराशर-सुद्युम्नाचार्य-राधावल्लभत्रिपाठि-भास्कराचार्यत्रिपाठि- बच्चूलाल अवस्थी 'ज्ञान'महाभागेभ्यः देयान् पुरस्कारानुदघोषयत्। इदानीं यावत्पुरस्कारसमारोहतिथिर्नो निश्चिता जाता।

(५) **गीर्वाणसुधा'** : १९९९ तः त्रैमासिकी संवृत्ता। अस्याः प्रधानसम्पादकः डॉ० शं० ग० मोघे सम्पादनसहाया च प्रा० डॉ० सौ० कमल अभ्यंकर-महाभागा स्तः। प्रकाशनस्थानस्य परिवर्तितः सङ्केत इत्थमस्ति-'गीर्वाणसुधा' देववाणी-मन्दिरम्, ४१, उमाकेशवस्मृती, सूर्यवंशी सभागृह मार्गः, दादर (प०), मुंबई-४०००२८ (भारत) इति।

(६) नवदिल्ल्यां २१-७-१९९९ ई० तारिकायां जगद्गुरुशङ्कराचार्यस्वामिनिश्चलानन्दसरस्वतीमहाराजैराचार्य पं० पण्ढरीनाथाचार्यगलगलीमहाभागेभ्यः **रामकृष्णडालमिया-श्रीवाणीअलङ्करणं (१९९८)** समार्प्यत।

(७) नवदिल्ल्यां २५-५-१९९९ ई० तारिकायां **'मन्दाकिनी'** संस्थया आयुर्वेदविद्वान् डा० भगवानदाशः सम्मानितः । न्यायमूर्तिः श्रीरङ्गनाथ मिश्रो मुख्यातिथिरासीत् । डा० किरीट जोशी आध्यक्ष्यमकरोत् । डा० रामकरण शर्मा प्रशस्तिपत्रमवाचयत् । आचार्यवेदानन्द झा आयुर्वेदस्य वैशिष्ट्यं रेखाङ्कितमकरोत् । डा० रमाकान्त शुक्लः 'भाति मे भारतम्' गीतवान् ।

(श्रीमती सरोजव्यासः)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# श्रद्धाञ्जलिः

**'गीर्वाणसुधायाः'** यशस्वी संस्थापक-सम्पादकः श्री श्री०भि० वेलणकर-महोदयः १-४-१९९९ ई तारिकायां यशःशेषतामवाप।

संस्कृतज्ञेन श्रीवेलणकरमहाभागेन भारतीयडाकसेवाविभागे सेवावृत्तिमाश्रयता पिनकोडसङ्ख्यायाः प्रवर्तनं कृतम्। सेवावकाशानन्तरं तेन देववाणी-मन्दिरस्य मासिकपत्रिकाया **'गीर्वाणसुधायाः'** प्रवर्तनं कृत्वा स्वं जीवनं तस्यै समर्पितम्। तेन बालकेषु संस्कृतस्य प्रचारप्रसारार्थं बहु यतितम्। तेन नाटक-बालगीतादीनां रचनया तत्प्रयोगेण च संस्कृत-जगति नूतन आयाम उद्घाटितः। तेन २३ संस्कृतकाव्यानां ९ सुभाषितानां बालसाहित्यपुस्तकानाञ्च रचना कृता। १९७९ तः **'गीर्वाणसुधायाः'** नियतं सम्पादनं प्रकाशनञ्च तस्य सारस्वत-साधनायाः प्रमाणम्।

तस्य निधनेन संस्कृत-जगतोऽपूरणीया क्षतिर्जाता। **'संस्कृतभवितव्यम्'** इत्यस्य सम्पादकेन श्री न० र० पत्तरकिनेमहाशयेन, **'गीर्वाणसुधायाः'** वर्तमानेन प्रधानसम्पादकेन डॉ० शां० ग० मोघेमहाभागेन सम्पादनसहायया प्रा० डॉ० सौ० कमलअभ्यङ्करमहाभागया, वीणा गोडबोले-प्रभृतिभिरन्यैश्च लेखकैः श्रीवेलणकर महाभागमवलम्ब गद्यपद्यात्मिका रचनाः प्रणीय तस्मै श्रद्धाकुसुमानि उपहृतानि येषां प्रकाशनं 'गीर्वाणसुधायाः' १८/१-२-३ संयुक्ताङ्के जातम्।

अर्वाचीनसंस्कृतम् श्रीवेलणकरस्य संस्कृतसपर्यां सादरं नमति किञ्च वेलणकरमहोदयस्य स्मृतिं सश्रद्धं प्रणमति।

(रमाकान्त शुक्लः)
प्रधान सम्पादकः
अर्वाचीनसंस्कृतम्

३१-७-१९९९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# आवश्यकी सूचना

'देववाणी-परिषद्, दिल्ली'-इत्येतन्नाम्नी संस्था २१-८-१९९९ ई० तारिकायां स्वचतुर्विंशङ्कसल्पनादिवससमारोहे संस्कृतवर्षस्य विशिष्टायोजनत्वेन **'विंशशताब्दीया- विकलकाव्यपाठप्रतियोगिताम्'** आयोजयति। प्रतियोगितायां द्वादशकक्षापर्यन्तं विद्यार्थिनः भागं गृह्णीयुः। प्रतियोगिभिः १९०१ ई० तः १९९९ तमं वर्षं यावद्रचितं प्रकाशितं च शताधिकपद्यसंवलितं सहृदयसदसि निवेदनीयं किमपि काव्यं कण्ठस्थरूपेणाविकलतया पुस्तकमदृष्ट्वा शुद्धोच्चारणेन सस्वरं श्राव्यं भवेत्। त्रयः पुरस्कारा इत्थं प्रदास्यन्ते-

१. **प्रथमः पुरस्कारः** २५०० रूप्यकाणां राशिः किञ्च
२५०० रूप्यकाणां मुखमूल्यस्य (Face value) संस्कृतग्रन्थाः।

२. **द्वितीयः पुरस्कारः** २००० रूप्यकाणां राशिः किञ्च
२००० रूप्यकाणां मुखमूल्यस्य संस्कृतग्रन्थाः

३. **तृतीयः पुरस्कारः** १५०० रूप्यकाणां राशिः किञ्च
१५०० रूप्यकाणां मुखमूल्यस्य संस्कृतग्रन्थाः

**विशेष** : दशाधिकानामुच्चारणगतानामशुद्धीनां कर्ता प्रथमं पुरस्कारं लब्धुमनर्हः स्यात्। निर्णेतृणां निर्णयः सर्वथा मान्यः स्यात्।

अधिकृताः प्रतियोगिनः २०-८-१९९९ ई० यावदधोहस्ताक्षरिणे स्वनाम दातुमर्हन्ति-

**'रमालयः'** आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९
दूरभाषसंख्या : ५६३९१४६

(रमाकान्त शुक्लः)
महासचिवः
देववाणी-परिषद्, दिल्ली

"देववाणी-परिषद्, दिल्ली"-कृते डा० रमाकान्त शुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली-११००५९ फोन : ५६४०३२४" इति मुद्रणालये मुद्रापयित्वा "आर-६ वाणी विहारः, नई दिल्ली-११००५९" तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (२१/३) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः ३१.७.१९९९ अस्यांकस्य मूल्यम् रु० १५.०० **Rs. 15.00**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

एकविंशे वर्षे चतुर्थोऽङ्कः

१५ अक्तूबर, १९९९

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

राष्ट्रे जागृयाम
संस्कृतवर्षम् युगाब्द 5101 (1999-2000)

प्रधानसम्पादकः

**डॉ० रमाकान्त शुक्लः**

एम० ए०, पीएच० डी०, साहित्याचार्यः
सांख्ययोगाचार्यः

**देववाणी-परिषद्, दिल्ली**

६, वाणी–विहारः, नयी दिल्ली–११००५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अर्वाचीनसंस्कृतम् (२१/४)

१५ अक्टूबर, १९९९ ई०

## विषयसूची


| विषय | लेखकः | पृष्ठाङ्कः |
|---|---|---|
| १. सम्पादकीयम् | सम्पादकः | १-३ |
| २. शारदा-नुतिः | पं० प्रेमदत्त शास्त्री | ४ |
| ३. भारतमाता विजयतेतराम् | डॉ० वासुदेव वि० पाठक 'वागर्थः' | ४ |
| ४. योऽयं कृतः शपथस्त्वया | डॉ० रमाकान्तशुक्लः | ५-७ |
| ५. भारतीयशासनं विजयताम् | 'अभिराज' डा० राजेन्द्र मिश्रः, | ८ |
| ६. पटेलमञ्जरी : एकं निरीक्षणम् | गिरिशः जानी | ९-१५ |
| ७, सम्भ्रान्ताः किममी जनाः | प्रभात कुमार शर्मा | १६ |
| ८. द्विपदिका | डॉ० रश्मिकांत व्यासः | १६ |
| ९. व्योम शेखर की 'अहं राष्ट्रीः' शिल्प और संवेदन | श्रीमती शशि चौहान | १७-२६ |
| १०. सुधर्मायाः साहित्यसेवा | डॉ० बा० श्री० रामकृष्णरावः | २७-३० |
| ११. अर्वाचीनसंस्कृते 1999 यावत् प्रकाशिता सामग्री (लेखा, पत्राणि, वार्ता रचनाश्च) | डॉ० चन्द्रमौलिः शुक्लः | ३१-७१ |
| १२. देववाणी-परिषद्वार्ता | आनन्दवर्धनः शुक्लः | ७२ |
| १३. संस्कृतजगद्वार्ता | अभिनव शुक्लः | ७३-७५ |
| १४. गीतम् | रामविनय सिंहः | ७५ |
| १५. भवतां पत्रम् | १. 'अभिराज' प्रो०राजेन्द्र मिश्रः, २. श्रीकान्तमिश्रः 'कुशलः' ३. श्री० सुन्दरराजः ४. डॉ० (श्रीमती) सरिता पाण्डेय ५. प्रो० मूँगाराम त्रिपाठी | ७६-८० |



### अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च- डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति। १५-१०-१९९९ ई. रमाकान्तशुक्लः (प्रकाशकः, सम्पादकः)


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

LIBRARY Gurukul Kangri Vishwavidyalaya HARDWAR

## सम्पादकीयम्

अर्वाचीनसंस्कृतस्यायमङ्को वर्षाणामेकविंशतिं पूरयति। अतोऽङ्केऽस्मिन्त्र द्यावध्यर्वाचीनसंस्कृते प्रकाशितायाः सामग्र्या विस्तरशः संसूचनं ददानो डॉ० चन्द्रमौलिशुक्लस्य **'अर्वाचीनसंस्कृते १९९९यावत्प्रकाशिता सामग्री ( लेखाः, पत्राणि, वार्ता रचनाश्च )'**इति शीर्षको लेखो दीयते। १९९१तमे १९९३तमे च वर्षेऽपि डॉ० शुक्लेन स्वलेखाभ्यां तदवधि प्रकाशितायाः सामग्र्याः परिचयोऽदीयत। इदानीं तत्र परिवर्धनं कृत्वा अद्यपर्यन्तं प्रकाशितायाः सामग्र्याः परिचयो दीयते। अस्यां सूच्यां अर्वाचीनसंस्कृतस्य सम्पादकीयानामुल्लेखो नास्ति। अनेन सूचनापरकेण लेखेन अर्वाचीनसंस्कृतस्य पाठकाः संशोधकाश्च अवश्यमेव लाभान्विता भविष्यन्तीत्याशास्यते।गतवर्षे(१५.१०.१९९८ तारिकायां) बडोदरानगरे समायोजितेऽखिल-भारतीय-प्राच्यविद्यासम्मेलने 'आधुनिकसंस्कृत-साहित्या'नुभागे ममाध्यक्षतायां पठितेषु षष्टिप्रायेषु लेखेषु श्रीमता गिरिशजानिमहाभागेन प्रस्तुतः **'पटेलमञ्जरी : एकं निरीक्षणम्'**इति शीर्षको लेखः किञ्च डॉ०बा०श्री० रामकृष्णरावमहाभागेन प्रस्तुतः **'सुधर्मायाः साहित्यसेवा'**इति शीर्षको लेखः अत्र प्रकाश्येते। उभावपि लेखौ अर्वाचीनसंस्कृतरचनायाः संस्कृतदैनिकपत्रस्य च विषये उपयोगिनीः सूचनाः परामर्शांश्च दत्तः। अर्वाचीनसंस्कृतस्य विंशवर्षीये प्रथमेऽङ्के व्योमशेखरस्य (डॉ०विशनगौडमहाभागस्य)**'विभाति भारती धरा'**-इतीयं रचना प्रकाशिताभूत्। अनेन महानुभावेन दशवर्षाणि पूर्वं **'अहं राष्ट्री'**ति संज्ञकस्य गीतिकाव्यस्य रचना कृता यस्य प्रकाशनं 'लोकालोक प्रकाशन, १५६ श्याम पार्क, साहिबाबाद-२०१००५'इत्येतया संस्थया १९९०तमे खैष्टेऽब्दे कृतम्। श्रीमत्याः शशिचौहानमहाभागाया **'व्योमशेखर की 'अहं राष्ट्री' : शिल्प और संवेदन'**इत्येतच्छीर्षको हिन्दीभाषानिबद्धो लेख उक्तगीतिकाव्यमवलम्ब्य संक्षेपतः समीक्षां करोति। अर्वाचीनसंस्कृते यदा-कदा हिन्दीमाध्यमेनापि अर्वाचीनसंस्कृतपरका सामग्री प्रकाश्यते–अस्य निदर्शनमयं लेखः।

मया अर्वाचीनसंस्कृतस्य (१५ जुलाई, १९९५ तारिकायां प्रकाशिते १७/३ अङ्के) सम्पादकीये 'राष्ट्रपतिपुरस्कारं' विषयीकृत्य किञ्चिदप्रियं पथ्यञ्च तथ्यमुद्गीरितमासीत्। तत्रैव 'अभिराज'राजेन्द्रमिश्रस्य राष्ट्रपतिपुरस्कारार्हता प्रतिपादितासीत्। १५.८.१९९९ तारिकायां प्रातरेव डॉ० रामकरणशर्ममहाभागैरहं दूरभाषेण वर्धापितः 'अभिराज'राजेन्द्रमिश्रस्य राष्ट्रपतिपुरस्कारलाभवार्तया। वस्तुतः आनन्दितोऽभूवमहम्। मया चिन्तितं च–किमु पञ्च वर्षाणि पूर्वमभिराजो राष्ट्रपतिपुरस्कारार्हो नासीत्। अवश्यं तदाऽप्यसौ विद्वान्, गद्यकर्ता, प्रबन्धमुक्तकादिपद्यकर्ता, कथाकर्ता, नाटककर्ता, शोधकर्ता, शोधकारयिता, सम्पादको महाकविश्चासीत्। यदि पुरस्कारोऽस्मै पञ्चवर्षाणि पूर्वमेव दत्तोऽभविष्यत्तदा नूनं पुरस्काराशेः सदुपयोगोऽभविष्यत्। अस्तु विलम्बादपि तरुणविदुषामुपरि चयनकर्तॄणामनुरागदृष्टिर्निपतितेति विज्ञाय हर्षप्रकर्षमनुभवामि, वर्धापनं च चयनकर्तृभ्यो ददामि।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**'योऽनूचानः स नो महान्'** इति नियमत आयुषा कनीयानपि वैदुष्येन ज्यायान् ममादरणीयो भ्राता डॉ॰'अभिराज' राजेन्द्रमिश्रो मयार्वाचीनसंस्कृतपक्षतो देववाणी-परिषत्पक्षतश्च साभिनन्दनं वर्धाप्यते। अस्य महानुभावस्यैकं पत्रं मयाऽलम्भि यत्रास्य हृद्या शैली व्यापकदृष्टिश्च संलक्ष्येते। औपचारिकतानौपचारिकता चास्य पत्रस्य न पृथक्कर्तुं शक्येते। अस्मिन् पत्रेऽभिराजस्य महत्त्वेऽपि विनयशालित्वमवलोकयितुं सुशकम्। पत्रमिदमविकलतयाऽत्राङ्के प्रकाश्यते।

अर्वाचीनसंस्कृतस्य कृतेऽयमपरो हर्षोदन्तो वर्तते-डॉ॰ शिवदत्तचतुर्वेदमहाभागायाप्यैषमस्तनो राष्ट्रपतिपुरस्कारो दीयत इति। डॉ॰ चतुर्वेदस्य **'स्फूर्तिसप्तशती'-'राजनीतिशतका'** द्या रचना अर्वाचीनसंस्कृते प्रकाशिता जाताः। डॉ॰ चतुर्वेदमहाभागाय भूरिशो वर्धापनानि।

अर्वाचीनसंस्कृतस्य ३/३ अङ्के (जुलाई १९८१) श्री पी॰सी॰ देवस्य महाभागैः प्रणीतं **'क्रिस्तुभागवत'** मवलम्ब्य आचार्य डॉ॰ श्री रमेशचन्द्रशुक्लमहाभागानां **'क्रिस्तुभागवतसमीक्षे'** तिशीर्षको लेख प्रकाशितो जातः। अस्मिन् वर्षे श्री पी॰सी॰ देवस्य-महाभागेभ्योऽपि राष्ट्रपतिपुरस्कारो दीयते-इति कृत्वा अर्वाचीनसंस्कृतपक्षतस्तेभ्योऽपि वर्धापनानि समर्पयामि।

देववाणी-परिषदः स्थापनावर्षे डॉ॰ सुरेन्द्रनारायणत्रिपाठिमहाभागोऽस्याः परिषद उपाध्यक्षत्वेनास्मभ्यं सुलभ आसीत्। असौ महानुभावोऽप्यैषमस्तनं राष्ट्रपतिपुरस्कारं लभते-इत्यपरो हर्षोदन्तः। सर्वेऽप्येतेऽस्माकं गौरवं वर्धयन्तीति सन्त्यस्माकभिनन्दनीयाः प्रणम्याश्च।

वैदुष्यं कवित्वञ्चाद्यापि जागर्ति तरुणेषु। तरुणकवीनां पङ्क्तौ डॉ॰ इच्छाराम द्विवेद 'प्रणव'-डॉ॰ विन्ध्येश्वरीप्रसादमिश्र 'विनय'-डॉ॰ जनार्दनप्रसादपाण्डेय 'मणि'- परम्परायामपरमपि नाम संयुक्तं श्रीमतः श्रीकान्तमिश्रस्य 'कुशलो'पनाम्नः। अयं मधुरेण स्वरेण स्वरचनाः पठति। अस्य गद्यच्छविरपि दृष्टिमावर्जयति। अस्य महानुभावस्याप्येकं पत्रं मया प्राप्तं यत्र विविध न्यायानामुपयोगोऽनेनाकारि। वर्धतामस्य कवित्वम्! अस्य पत्रमप्यत्राङ्के प्रकाश्यते।

श्री॰सुन्दरराजमहाभागस्याप्येकं पत्रमंशतः प्रकाश्यते यत्र मुद्रणदोषस्य परिष्कारः कांक्ष्यते। एवमेव यदि सर्वेऽपि लेखकाः कवयश्च स्वलेखमथवा कवितां पठित्वास्मत्सकाशे शुद्धिपत्रं प्रापयेयुस्तदा पत्रमिदं बहूपकृतं भवेत्। धन्यवादा वितीर्यन्ते श्रीमद्भ्यः श्री॰सुन्दरराजेभ्यः।

अयमङ्को तदा प्रकाश्यते यदा भारतस्य त्रयोदश्या लोकसभाया गठनं भवति। १३.१०. १९९९ तारिकायां भारतस्य महामहिमराष्ट्रपतिना श्री के॰ आर॰ नारायण महाभागेन श्रीअटलविहारी वाजपेयी-महोदयाय तत्सहयोगिभ्यश्च शपथो दापितः। **'शपथ'** इति त्र्यक्षरपदस्यास्ति कश्चिद् गभीरोऽर्थः। शपथमधिकृत्यैका रचना मया १३.१०.१९९९ तारिकायां शिमलानगरं प्रति प्रस्थितेन मध्येमार्गं रचिता या सामान्यतः कमपि शपथं विषयीकरोति देशकालादिवैशिष्ट्येन च मन्त्रिभिः गृहीतं शपथमपि स्पृशति। शिमलानगरे 'अभिराज' राजेन्द्रमिश्रस्य गृहमधिवसता मया सोऽपि प्रार्थितः लघ्वीं कवितामेकां प्रणेतुं यत्र शासनात्कविः किमपेक्षते-इति संकेतितं स्यात्। १४.१०.१९९९ तारिकायां सायं सपादसप्तवादनवेलायामहम् अभिराजवासतः दिल्लीं प्रति यदा पतिष्ठे स्म तदा अभिराजेन मम हस्ते रचनैका दत्ता। अस्यां रचनायां प्रजातन्त्रशासनेन साकं



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रस्य सुव्यवस्था, सुरक्षा, समृद्धि, शान्तिः, प्रगतिश्च काम्यते। दिनत्रयपूर्वमस्माकं प्रतिवेशी देशः सैन्यशासनाधीनो जातः। एवमस्माकं भारते तु न सम्भाव्यते। अत्र तु प्रजातन्त्रं वर्तते। किन्तु प्रजातन्त्रेऽपि परिष्कारो दृढता च काम्येते। सर्वैरपि देशस्य कृते परिश्रमः कार्यः। इयं रचना इदमेव वाञ्छति। इमे उभे अपि रचने अत्राङ्के प्रकाश्येते।

इटलीदेशे तुरीनोनगरे ३–८ अप्रैल २००० तारिकास्वायोज्यमाने एकादशतमे विश्व-संस्कृतसम्मेलने अर्वाचीनं/समकालिकं संस्कृतसाहित्यमवलम्ब्य न कापि कार्यशाला न चापि शोधपत्रवाचनगोष्ठी प्रस्तावितास्ति। एतत्सर्वं तदा भवति यदा सम्मेलनस्य आदरार्होऽध्यक्षः डॉ० रामकरण शर्मास्ति यो हि स्वयमपि साहित्याकादेमीपुरस्कृतः प्रख्यातः संस्कृतकविरास्ते। अत्र दिशि मया तस्य ध्यानं मौखिकरूपेणाकृष्टमासीत्। तेन पत्रद्वारा एतत्कर्तुं मह्यं परामर्शो दत्त; मया च तत्र प्रमदितम्। इदानीमर्वाचीनसंस्कृतमाध्यमेन तं प्रार्थयामि अस्यां दिशि किमपि कर्तुम्। एकां संस्कृतकविगोष्ठीं संस्कृतपत्रिकासु प्रकाशितं साहित्यञ्चावलम्ब्य कार्यशालाञ्चायोजयितुं संयोजकान् प्रचोदयितुमिदानीमप्यर्हति डा० शर्ममहाभागः।

अर्वाचीनसंस्कृतस्य वर्षाणामेकविंशत्याः पूर्तावहमस्य लेखकेभ्यो मुद्रकेभ्यः क्रेतृभ्यो ग्राहकेभ्योऽक्षरयोजकेभ्यो डाककर्मिभ्यश्च वर्धापनानि प्रयच्छामि येषां सहयोगेन पत्रमिदमग्रे सरति; किञ्चानुदानदानार्थं राष्ट्रियसंस्कृतसंस्थानाय धन्यवादान् समर्पयामि यद्यप्यद्यावधि पत्रप्रकाशनार्थं गतवर्षीयोऽप्यनुदानराशिस्तेन न मुक्तः, का कथैषमस्तनस्यानुदानस्य? कथमिति चेन्नैव जानेऽहम्। अधिकारिण एवात्र प्रमाणम्! अस्तु यदागमिष्यति चैकपत्रं तदैव सधन्यवादं तत्स्वीकरिष्यामः!

अर्वाचीनसंस्कृतस्य समयेन प्रकाशनमसम्भवमेवाभविष्यद्यदि पं० चन्द्रभानशर्मा सपुत्रः सस्नुषश्चास्य अक्षरयोजनायां मुद्रणे च सेवाभावेन समर्पितो नाभविष्यत्। अस्मै तपस्विने गृहस्थायाहं धन्यवादान् समर्पयामि। पुनश्च कृतेऽपि यत्ने याः काश्चिदशुद्धयः पत्रे दृग्गोचरीभवेयु स्तदर्थं विदुषः क्षमां भिक्षमाणस्तावदस्मि।

सर्वेभ्यो दीपावल्याः नूतनवर्षस्य च शुभकामनाः सवर्धापनं समर्पयति–

विदुषामाश्रवः

(रमाकान्त शुक्लः)

प्रधानसम्पादकः

१५-१०-१९९९

'रमालयः' आर-६, वाणी-विहारः,

नयी दिल्ली-११००५९

प्रयागस्था राष्ट्रपतिपुरस्कृताः पं० चन्द्रभानुत्रिपाठिनः ५.६.१९९९ तारिकायां दिवंगताः। विगतेऽङ्के तेषां 'प्रभो कामयेऽहम्' इतीयं रचना प्रकाशिता बभूव। इतः पूर्वं लेखोऽप्येक प्रकाशितो जातः। तेस्योऽस्माकं श्रद्धाञ्जलयः। –सम्पादकः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# शारदा-नुतिः

पं० प्रेमदत्तशास्त्री
शास्त्री कॉलोनी, जहाँगीराबाद (बुलन्दशहर)-२०२३९४

शुभ्रानना गुणवती सकलाधिराज्ञी, माता शुभा सकलमानवबोधदात्री ।
हस्ते च धारयति या रमणीयवीणां, सा शारदा वसतु मे रसनाग्रभागे ॥१॥
चन्द्रानने विमलभूषणवेषयुक्ते, हंसादिवाहनपरे नितरां सुवाद्ये !
गायन्ति सेवकजनास्तव कीर्त्तिराजिं, बुद्धिं प्रदेहि विमलां मयि शारदे त्वम् ॥२॥
आभ्यां फलं किमिह विस्तृतलोचनाभ्यां, याभ्यां न ते खलु कृतं तनुदर्शनं च ।
व्यर्थं भवेज्जननि ! मानवजन्म तेषां, येषां च कर्णतटयोः पतिता न वीणा ॥३॥

# भारतमाता विजयतेतराम्

चित्ते यच्च विचिन्तयामि सततं पुण्यं ह्यपुण्यं तथा
वाचा यद्विपुलं वदामि भगवन् भद्रं ह्यभद्रं तथा ।
यन्नानाकरणैश्च कर्म नियतं स्वार्थे परार्थेऽथवा
तत्सर्वं तव पूजनं प्रतिपलं प्रीत्या प्रसन्नो भव ॥१॥
भक्त्या वन्दनमर्चनं ह्यनुदिनं देवादिनां पुण्यदम्
भद्रं संस्मरणं तथैव महतां श्रेयस्करं शान्तिदम् ।
श्रीमीरानरसिंहनानकवराः गांधी च हेड्गेवरः
स्मर्यन्ते तुलसीकबीरसहिताः राष्ट्रोन्नतिप्रेरकाः ॥२॥
वयं हिन्दवो मुस्लिमाः पारसीयाः वयं सिख्खबौद्धस्तथा खिस्तयश्च।
परं मूलतस्सर्वथा भारतीयाः वराः राष्ट्रसेवाकृते सत्त्वशीलाः ॥३॥
आसेतुहिमाचलमात्मगतं भेदैश्च विना वरमैक्यमलम् ।
राष्ट्रं मम जाने भव्यतमं प्राचीनतमं तत् तीर्थसमम् ॥४॥
भारते भा-रते भा-रतं संस्कृतं
नैष्ठिकैः काव्यदक्षैर्वरैर्भावितम् ।
भद्रभावैश्शुभां शारदायाः कृपां
प्राप्य ऋद्धिं गतं गुर्जरं सौख्यदम् ॥५॥

गांधी जयन्ती
२ अक्टूबर, १९९८

-डॉ० वासुदेव वि० पाठक 'वागर्थः'
३५४, सरस्वती नगर, कर्णावती (अमदाबाद)-३८००१५

(भारतीय संस्कारधाम, पोरबन्दर शाखा-समायोजिते 'गांधीगौरवगान'-कार्यक्रमे प्रस्तुता राष्ट्रवन्दना)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# योऽयं कृतः शपथस्त्वया

डॉ० रमाकान्त शुक्लः
'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
यदिदं प्रतिज्ञातं त्वया तस्याशयं जानासि किम् ?
कर्तुं यथा सरलस्तथा शपथो न निर्वोढुं सखे !
शपथस्य निर्वाहो भवति कण्टकपथानुसृतिः सखे !
त्यक्त्वा सुमान्यालिङ्गसे कटुकण्टकान्, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
व्यालीवदनचुम्बनमिदं करवालधारालेहनम्
क्षुरधारया पदमित्रता मधुराशया गरलाशनम्
त्यक्त्वा सुखदतल्पं सखे ! भूमौ स्वपिषि, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
शपथं विधाय सखे ! त्वया हस्तौ निगडबद्धौ कृतौ
शपथं विधाय सखे ! त्वया पादौ निगडबद्धौ कृतौ
बद्धोऽसि वचसा कर्मणा मनसा त्वमिति, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
नो लप्स्यसे निद्रां निशायां नापि दिवसे निर्वृतिम्
चिन्ताप्रतान्तविलोचनां त्वं द्रक्ष्यसे स्वामाकृतिम्
आमन्त्रितास्ते या विपत्तस्याः फलं जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
शपथस्य पूर्त्यर्थं त्वया पेयं भवेद्गरलं मुदा
शपथस्य पूर्त्यर्थं त्वयाध्यवसाय आराध्यः सदा
शपथस्य रक्षार्थं त्वयार्प्यं जीवनं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्यायान् कनीयान् वा भवेच्छपथो गृहीतो मानवैः
तद्रक्षणार्थं लौहचणकाश्चर्वणीया मानवैः
शपथान्मनाक् प्रचलन्ति नो सत्यव्रताः, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

यैः पूरितः शपथो निजस्ते लोकवन्द्याः सम्मताः
यैः पूरितः शपथो नरा इतिहासपुरुषास्ते मताः
शपथस्य भेत्ता कथ्यते जीवन्मृतो, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

शपथो न कर्गलखण्डलिखितायास्तु पङ्क्तेर्वाचनम्
शपथोऽस्ति पीडासन्ततेरानन्दसहितं पाचनम्
शपथोऽस्ति मनसः कर्गले स्वात्माङ्कनं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

शपथो न केवलमस्ति वाण्या वर्णमात्रोच्चारणम्
शपथस्तु बन्धो ! कथ्यते पञ्चाग्नितपसो धारणम्
होतव्य आत्मा मानवैस्तत्पूर्तये, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

मनसाथ वचसा कर्मणा भिन्ना भवन्ति न ये जनाः
सम्मानभाजनतां जगति ते यान्ति सर्वेषां जनाः
क्षतवाग्जनो निन्द्यो भवति लोके, सखे ! जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

शपथेन बद्धा नो जना निजलाभचिन्तां कुर्वते
न हि ते स्वशपथापेक्षया निजजीवनं बहु मन्वते
स्नेहं दयां सौख्यं न ते गणयन्ति, भण, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

लोभेन भयतः कामतो वा यो निजं शपथं त्यजेत्
शपथेन साकं स हि पुमान् निजजीवनं न हि किं त्यजेत् !
शपथस्य रक्षा ह्यात्मजयतो जायते, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्मृत्य शपथं ये जनाश्चातुर्यखेलां तन्वते
चिन्वन्ति ते कामं धनं, न हि ते यशः किल चिन्वते
सम्भावितस्याकीर्तिरतिमृत्युर्भवति, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

ये वञ्चयन्त्यनिशं जनान् शपथं गृहीत्वा मानवाः
आत्मानमथ सर्वेश्वरं जानन्ति नो ते मानवाः
मिथ्याव्रतानां लुप्यते तेजो मुखाज्जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

अधुना यदा शपथः कृतस्त्वयका तदायं रक्ष्यताम्
प्रत्यक्षरं शपथस्य बन्धो ! रक्षणीयं, रक्ष्यताम्
उच्चैः स्वरेणास्मत्पुरो यदवादि तज्जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

सम्प्रति शपथरक्षार्थमात्मा पीडनीयो रे ! त्वया
विस्मृत्य निजसौख्यं सखे ! लोकः समाराध्यस्त्वया
ईशः शपथकाले त्वया साक्षीकृतो जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

रक्ष प्रतिज्ञामात्मनो वर्धय तपः स्वं प्रत्यहम्
शपथं हि पूरय शुद्धमनसा, ते हितं कथयाम्यहम्
सम्पूर्य शपथं लप्स्यसे सुयशः स्थिरं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

रक्ष्येत शपथस्तावकोऽक्षरशो मयेदं काम्यते
सोढ्वापि कष्टं सफलतां विन्देति बन्धो ! काम्यते
नैवोत्सहे त्वां भग्नशपथं द्रष्टुमिति जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(रचनातिथिः १३-१०-१९९९ रात्रौ ८-०० वादनतः १२-०० वादनं यावत्.
निशीथे दिल्ली-शिमला मार्गे)



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# भारतीयशासनं विजयताम्

'अभिराज' डॉ० राजेन्द्र मिश्रः
११४, टीचर्स होस्टल, समर हिल,
शिमला-१७१००५

भारतीयशासनं विजयताम् सत्यमेव जयताम् !!
अविश्रमं खलु जनतातन्त्रम्
लक्ष्यीकृतजनसेवामन्त्रम्
प्रकृतिरञ्जनाद्राजा भूत्वा श्रियं कोऽपि लभताम् !
सत्यमेव जयताम् !!

निखिलविश्वमार्यं कुर्वाणा
कल्पितजनजनसुखकल्याणा
भारतीयसंस्कृतिः पुराणी पुनर्नवा तनुताम् !
सत्यमेव जयताम् !!

शस्त्रे शास्त्रे भवतु कौशलम्
क्षमाभावभूषितं स्याद् बलम्
नहि दैन्यं न च पलायनं रणनीतिरिति ध्रियताम् !
सत्यमेव जयताम् !!

संरक्षिताः सन्तु सीमानः
स्पृशतु नभो भारतसम्मानः
काञ्चनविहगगौरवं भूयो राष्ट्रमिदं श्रयताम् !
सत्यमेव जयताम् !!

सर्वोदयनिरता सुरवाणी
निगमागमसंश्रिता पुराणी
सरस्वती श्रुतमहती राष्ट्रे हृदि-हृदि महीयताम् !
सत्यमेव जयताम् !!

राष्ट्रहितं सर्वोपरि भवतात्
राष्ट्रगौरवं स्फुरतु समन्तात्
मुक्ताकाशे ध्वजस्त्रिवर्णो यशोऽक्षतं दधताम् !
सत्यमेव जयताम् !!

रचनातिथिः १४.१०.१९९९ ई० पूर्वाह्णे १० वादने।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# पटेलमञ्जरी : एकं निरीक्षणम्

**गिरिशः जानी**
सहायक-निदेशकः,
अनुस्नातक-संशोधन-विभागः, भारतीयविद्याभवनम्,
कुलपतिमुंशीमार्गः, मुम्बई-४०000७

अर्वाचीनभारतस्य लोकनायकानां पङ्क्तौ सरदारवल्लभभाईपटेलमहोदय-स्याभिधानं सुख्यातिं भजते। यथा सार्वकारीयतन्त्रे तथैव स्वातंत्र्योत्तरसंस्कृत-साहित्येऽपि श्रीपटेलमहाभागस्य तादृशं स्थानं प्रदत्तं न ज्ञायते यथा प्रदातव्यमस्ति, यद्यपि भारतीयानां हृदयसिंहासने श्रीपटेलमहोदयः सादरं विराजते।

महाराष्ट्रराज्यस्य यवतमाल-मण्डलस्य पुसदग्रामनिवासिना **श्रीजयेश वी. पल्लेवार**-नामक-कविना श्रीपटेलपुण्यस्मृतावेका **पटेलमञ्जरीति** काव्यकृतिः विरचिता। भारतीयविद्याभवनस्य संस्कृतत्रैमासिकी संवित्पत्रिकाया एकोनत्रिंशद्वर्षीये संयुक्ताङ्के त्रिनवत्यधिकैकोनविंशशततमे (१९९३) खीष्टाब्दे पटेलमञ्जरीयं प्रकाशिता।

द्वादशाधिकशतश्लोकविस्तीर्णेऽस्मिन् पटेलमञ्जरी-लघुकाव्ये कविः श्रीपटेलमहोदयस्य चरितमालिखत्। श्रीवल्लभेतिशब्दस्य पटेल-नारायणोभयार्थं विभावयन् कविः तौ द्वौ सममेव नमति। प्रजातंत्रेऽस्मिन् भारते प्रजा एव प्रभुरिति सूचयन् कविः प्रजाशब्देनैव काव्यमंगलारंभं करोति।

**प्रजानां निर्भयस्थानं जनहृदयवल्लभम् ।**
**रक्षकं कृत्स्नलोकानां दैत्यारिं पुरुषोत्तमम् ॥१॥**
**विष्टरश्रवसं श्रेष्ठं राजचक्रस्य वाहकम् ।**
**बिन्दूकृतबलिराजं श्रीवल्लभं नमाम्यहम् ॥२॥**

**'अन्वयः'**-इतिशीर्षके षट्पद्येषु कविः श्रीपटेलस्य जन्मभूमेः पित्रोश्च परिचयं कारयति। तदनु कविः श्रीपटेलव्यक्तित्वस्य चित्ताकर्षकं चित्रणं कुरुते।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशालकायः कमनीयकान्तिः बलिष्ठबाहुः किल लौहधर्म्यः ।
अतीव धीरः समरप्रवीणः क्षमान्वये वल्लभ एष जातः ॥६॥

अत्र क्षमायाः धरायाः पुत्रस्य कृषकस्य वंशे अस्य वीरस्य जनिरभूदिति कविकथनाशयः।

**'संस्काराः'**—इतिशीर्षके श्लोकस्तबके कविः श्रीवल्लभस्य विद्याध्ययनं महात्मगांधिसमागमञ्च वर्णयति। करमसद-पेटलाद-नडियादादिस्थलेषु श्रीपटेलस्य शिक्षाभ्यासोऽभवत्। बाल्यादेव श्रीपटेलस्य सर्वतोमुखी प्रतिभा समुदिताऽऽसीदिति निदर्शयन् कविः कवयति—

आङ्ग्लभाषाप्रियश्चासौ पठने हि पुरोगमः ।
चतुरश्चतुरंगेऽसौ क्रीडाभ्यासे समानधीः ॥९॥

विधिज्ञपदवीप्राप्त्यर्थं श्रीपटेलः इंग्लैण्डदेशं गत्वाऽध्ययनमकरोद् बैरिष्टरपदञ्चाप्नोत्। अत्र कवेः श्लोकोऽयम् एकः कथातत्त्वेन सह विसंवदति—

श्रीमोहनस्य शिष्योऽभूत् द्रोणाचार्यमुनेर्यथा ।
भिल्लशिष्यैकलव्यस्तु प्रतिमापूजको गुरोः ॥१२॥

श्लोकेऽस्मिन् वर्णिता तुलनास्थितिः सर्वथा असम्बद्धा एव वर्तते यतो हि पुर एव कविः भणति—

अयं कार्पाससूत्रेण स्वराज्यं प्राप्तुमिच्छति ।
इत्येव परिहासेन वल्लभेन विडंबितः ॥१३॥

पूर्वं श्रीपटेलस्य मनसि गान्धिसम्बन्धिन्याश्छवेः कीदृशी स्थितिरासीदिति स्पष्टमेव तथ्यमास्ते। तदनु अननेनैव गांधिमहोदयेन सह तस्य हार्दिकः सम्बन्धः समभूत्। अत एव कविः कथयति—

मोहनदासगान्धी सः तस्याभवद्गुरुवरः ।
गुरुशिष्यानुबन्धोऽयं खलु विस्मयकारकः ॥१४॥
गुरुः सिद्धान्तमार्तण्डः महात्मा चातिमानवः ।
व्यवहारपटुः शिष्यः वल्लभो लौकिको नरः ॥१५॥

आदर्शमूर्तिना सह व्यवहारमूर्तेः सुभगः संगमोऽयं नूनं सर्वेषां कृते विस्मयावहः ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**'मानपदानि'**–शीर्षके पद्यगुच्छे कविः श्रीपटेलाय समर्पितमानसम्मानानां विवरणं प्रस्तौति। श्रीपटेलस्य गुर्जरप्रदेशकाँग्रेसदलाध्यक्ष्यं, गुर्जरमहाराष्ट्रसौराष्ट्रादि-स्थलेषु राजसभाध्यक्षत्वं, करांचीपत्तने राष्ट्रियंकाँग्रेसदलप्रामुख्यं, अलाहाबाद-मुंबईत्यादिस्थानेषु नागरिकसम्मानम्, अलाहाबाद-नागपुर-बनारस-उस्मानिया-विश्वविद्यालयप्रदत्त-मानार्ह-'डॉक्टर'-पदवीसमर्पणं, स्वतंत्रराष्ट्रस्य प्रथमोप-प्रधानमंत्रि-गृहमंत्रिपदसम्मानमिति मानसम्मानानि कविः वर्णयति।

मानधनस्य श्रीपटेलस्य गुणगरिम्णि कविः पद्यमिदं प्रस्थापयति–

**कठोरता (?) कटुता नयकर्मणि कुशलता नवदेशसुशिल्पने ।**
**चतुरता विदिता जनसंयुगे निपुणता नृपसंघविघट्टने ॥२६॥**

**'व्यक्तिदर्शनम्'**–इत्याख्यपद्यसम्पुटे कवि श्रीपटेलस्य व्यक्तित्ववैशिष्ट्यानि दर्शयति। तस्य भाषाविषये कविः कथयति–

**अप्रभुत्वेऽपि भाषायां भाषा भूरिप्रभाविनी।**
**अन्तरात्मप्रभुत्वेन प्रसभं प्रतिपादिका ॥२८॥**
**नारिकेलसमा तस्य भाषा बाह्यांगकर्कशा ।**
**मृदुलोदरभूतेन स्नेहस्निग्धा मनोहरा ॥२९॥**

श्रीपटेलस्य विविधकार्यावताररूपाणि दर्शयतीत्थं कविः–

**गान्धेः दक्षिणहस्तोऽसौ लोहहस्तः प्रशासने ।**
**वामहस्तो हि वामानां मृदहस्तः प्रजां प्रति ॥३१॥**

अत्र महात्मनः प्रधानानुयायी, प्रशासनाश्वस्य समर्थारोहकः, शठं प्रति शाठ्यमितिमंत्रधृक् व्यवहारविद्, प्रजावत्सलश्च पटेलमहाशयः बहुविध-वैशिष्ट्यभागिति दृक्पथमायाति।

भारतस्वाधीनतासंग्रामस्य सामरिकत्रिपुटी कीदृशी आसीदिति कविः दर्शयति–

**महात्मा मोहनो गांधी चतुरश्चतुराननः ।**
**शान्तिस्थापको लालः विष्णुरिव जवाहरः ॥३३॥**
**रुद्रावतारपाटीलः शंकर इव शंकरः ।**
**भारतस्य त्रिरत्नानि रेजिरे राजवर्तुले ॥३४॥**



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
नेहरूपटेलयोः मतभिन्नतां प्रदर्शयन् कविः ब्रूते–

कलहौ द्विविधौ प्रोक्तौ शुभाशुभंकरौ यथा ।
नेहरूवल्लभयोर्वादः शुभो हि परिणामतः ॥३५॥
नेहरूवल्लभयोर्मध्ये प्रथिता मतभिन्नता ।
एकतया निमग्ना सा राष्ट्रीयभावनार्णवे ॥३६॥

भारतस्य प्रधानामात्यपदार्थं सर्वथा समुपयुक्तोऽपि श्रीपटेलः विधिवशात्तत्पदं नालमकरोत्। तद्विषये कविः भणति–

नाभूदसौ स्वयं राजा राजपदव्यकामुकः ।
अभवद्राजनिर्माता स्वयं निस्पृहवल्लभः ॥३७॥

श्रीवल्लभमूर्तिमादरेण नमन् कविः पुनरुक्तिमविगणय्यापि कथयति–

बलिष्ठकायो वचसा कठोरः नीतिप्रवीणो विनयप्रधानः।
कार्येषु निष्ठा स्वजनेषु मिष्ठः प्रशासने लोहमयप्रहस्तः ॥४०॥

सन्ततमाशावादप्रदानचतुरान् नेतॄन् मनसि कृत्य कदाचित्कविः सत्यमिदं नः पुरस्तात् प्रस्थापयति–

कृतिप्रधाना सततं हि वृत्तिः उक्तिप्रधाना न कदापि वृत्तिः ।
कृतिप्रधानं नरजीवनं हि कीर्तिप्रधानं भवतीति सत्यम् ॥४१॥

'जीवनकार्यम्'–इतिशीर्षके पद्यसञ्चये कविः श्रीपटेलस्य जीवनं संक्षेपतः निभालयति। विधिज्ञव्यवसाये नेतुरस्य सामर्थ्यं साफल्यञ्च निरुपममासीत्–

दण्डाभियोगे प्रसभं प्रवीणः प्रभावशाली नययुक्तिवादे ।
दण्डाभियोगे कुशलप्रयुक्त्या सदा विजेता किल दण्डवादे ॥४५॥

सफलवृत्तिमेनां परित्यज्य श्रीपटेलः सम्पूर्णरूपेणैव राष्ट्रसेवाकार्ये निमग्नः।

विपुलविभवप्राप्तिं विधिज्ञव्यावसायिकीम् ।
देशकृते परित्यज्य बभूव देशसेवकः ॥४७॥
ग्रामविकासकार्येण सार्वजनिकजीवनम् ।
प्रारब्धं सरदारेण यथेप्सितं महामना ॥४९॥

स्वाधीनतासंग्रामे नैकवारमयं नरशार्दूलः कारागारे निबद्धः–

स्वराज्यप्राप्तिसंघर्षे करागारं मुहुर्मुहुः ।
सिषेवे सरदारोऽयमात्मनिवाससंनिभम् ॥५२॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य बन्दीगृहे वासः बभूव सुखदः सदा ।
धर्मग्रन्थस्य पाठेन संस्कृताध्ययनेन च ॥५३॥

बारडोलीसत्याग्रहनायकस्य श्रीपटेलस्य चित्रणमिदं मनः कर्षति–

गौरांगशास्तृनिहिता कुवृत्त्या करस्य वृद्धिरसमर्थनीया ।
कृषीवलानां बहुकष्टदात्री आन्दोलनार्थं कृतनिश्चयोऽसौ॥५९॥

करभारनिषेधार्थं पुरस्कृतं महात्मना ।
आन्दोलनप्रकर्षेण गौरांगैः निष्फलीकृतम् ॥६१॥
तथापि सरदारेण पुनश्च तत्पुरस्कृतम् ।
यस्य विराट्स्वरूपेण गौरांगास्तु पराजिताः ॥६२॥

राज्यशतानामेकीकरणरूपं भगीरथकार्यं श्रीपटेलेन अपूर्वदाक्ष्येन चतुर्विधोपायप्रयोगपुरःसरं सम्पादितम् । विषयममुं कविः **'महाराजानां समस्या'**-इतिशीर्षके पद्यकदम्बे प्रस्तौति–

हिन्ददेशीयराज्यानामविलम्बं निराकृता ।
समस्या सरदारेण नयपटुतया भृशम् ॥६५॥
वल्लभपाटिलं दृष्ट्वा सिंहासने कृतासनम् ।
सिंहं दृष्ट्वा यथा व्याघ्रा त्यक्त्वाऽऽसनं पलायिताः॥६७॥

श्रीपटेलस्यातुलं कार्यचातुर्यमालिखन् कविः भणाति–

स्वदेशं नयते पूर्वं स्वयं चरति दक्षिणे ।
पश्चिमां नयते वामान् उत्तरदिग्धृतासनः ॥६९॥

कृषीवलान्वयनन्दनोऽयं श्रीवल्लभः विलक्षणं कृषिकार्यमाततान–

कृषकस्य कुले जन्म हिंदभूमौ तु कर्षणम् ।
कृषिफलमपाकृत्यावाप स्वाधीनताफलम् ॥७०॥

प्रधानामात्यश्रीजवाहरलालेन वारितोऽप्ययं महामनाः भारतीयसंस्कृतिधर्मधाम्नः सोमनाथदेवालयस्य जीर्णोद्धारकार्यं चकार–

पवित्रभूतस्य हि भारतस्य श्रीसोमनाथेश्वरमन्दिरस्य ।
विध्वंसितस्य प्रखरास्त्रघातैः मुस्लीमवीरस्य विघातकस्य ॥७१॥
उद्धारकार्यं सुनियोजितं च विधार्मिकशासनवाहकेन ।
जवाहरेण प्रतिरोधितोऽपि प्रारंभितं कर्मठवल्लभेन ॥७२॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरं कविः पटेलबन्धुद्वयस्य मनःकर्षकं चित्रणं पुरः दधाति–

अग्रजो विठ्ठलो बन्धुरनुजश्चास्ति वल्लभः ।
अग्रजानुजयोर्भेदः न परस्परभावने ॥८१॥

तयोः भिन्नमार्गित्वं प्रदर्शयन् कविः भणति–

एकः काँग्रेसपक्षीयः असहकारसाधकः ।
अन्यः स्वराज्यपक्षीयः सहकारमतानुगः ॥७५॥

बहुजनानुयायित्वमवाप्य स्वनियोजितम् ।
वल्लभेन कृतं कार्यं सततमविवादितम् ॥७६॥

बहुजनानुयायित्वमवाप्य स्वनियोजितम् ।
विठ्ठलेन कृतं कार्यमात्मविश्वाससंगिना ॥७७॥

भिन्नमतप्रवक्तारौ बन्धू स्वदेशसेवकौ ।
राष्ट्रभक्तिसुसंसिक्तौ भावयन्तौ परस्परम् ॥७८॥

भ्रात्रोरनयोः जीवनमंत्रं सूचयति कविः पद्येनानेन–

जीवनं सज्जनानां तु भवति द्रुमसंनिभम् ।
छायया सुखयन्त्यन्यान् घर्षन्तोऽपि स्वशाखया ॥८२॥

'विचारवाटिका'–इतिशीर्षके पद्यसमूहे कविः श्रीपटेलस्य जीवनदर्शनं परिचाययति–

सत्याहिंसायुते युद्धे तपश्चर्याश्रिते तथा ।
भवति न्यायसंग्रामे चोभयपक्षयोर्जयः ॥८१॥

विजयते सदा सत्यं सत्यासत्यरणांगणे ।
नास्ति सत्यस्य पर्यायः सत्यमस्ति सदामरम् ॥८२॥

श्रीपटेलस्य संघर्षपूर्णं जीवनं स्मरन् कविः वदति–

लभन्ते न विना कष्टं मनुजैः सततं सुखम् ।
सुखं लब्धं विना कष्टं न हि वसति नित्यशः ॥८४॥

न कश्चित्स्वाभिमानोऽस्ति परपोषितजीवने ।
उपहासास्पदं नित्यं परायत्तं हि जीवनम् ॥८६॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीपटेलसदृशानां महापुरुषाणां कृते महादरः लोकहृदयेषु सदैव तिष्ठति–

लोकादरो मनुष्याणामधिकारानुयात्रिकः ।
आदरानुगतं ज्ञानमिति लोकपरंपरा ॥८८॥

बहुसंख्याकाः राजनेतारः कीदृशाः भवन्तीति विषये कविः सव्यङ्ग्यं वदति–

अशुभं हि शुभं मत्वा तिरस्करोति यः शुभम् ।
स एव राजनीतिज्ञः पुरस्करोति योऽशुभम् ॥१०२॥

किन्त्वल्पसंख्याकानां श्रीपटेलसमानां जीवनरीतिः अन्यैव भवति–

शरीरसौख्यं प्रति भोगमाप्तुं
विश्रामकालः न भवेत्सदीर्घः ।
सुदीर्घकालीनसुखाश्रयादि
श्रमाश्रितं जीवनमेव काम्यम् ॥१०६॥

'महाप्रयाण' मिति चान्तिमपद्यकदम्बे कविः श्रीपटेलस्य चरमयात्रां वर्णयति–

आयसमयकायोऽपि वल्लभो न निरामयः ।
आरामे न कदा रेमे आमयाघातितो सदा ॥१०७॥
व्यत्ययो न हि कार्येऽस्य व्याधिना व्यथितस्य च ।
विक्रियन्ते न कार्याणि व्यथनानि महीयसाम् ॥१०८॥

महात्मगान्धिनः हत्यया भृशमाकुलितः श्रीपटेलः कदापि पुनः स्वास्थ्यं सम्यक्तया न समवाप–

विद्धः सन् मृत्युना गान्धेः पीडितो मनसा भृशम् ।
रुधिरामयघातेन कृतान्तसदनं गतः ॥११०॥

पटेलमञ्जर्याः अन्तिमश्लोकद्वये कविः श्रीपटेलनिर्वाणजनितजनता-पीडामपूर्वेण प्रकारेण निदर्शयति–

लोहसमं कठोरं हि वल्लभस्य कलेवरम् ।
भस्मीकृतं कृतान्तेन विस्रष्टुं लोहभस्म किम् ॥१११॥
भस्मितलोहदेहाच्च लोहभस्म विसर्जितम् ।
करोति भारतीयानां तज्जीवनं निरामयम् ॥११२॥


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सम्भ्रान्ताः किममी जनाः

प्रभात कुमार शर्मा, संस्कृत-विभागः,
श्री चन्द्रधर गुलेरी महाविद्यालय हरिपुर, कांगड़ा-१७६०२८

गुरुहन्ताऽधुना शिष्यः भ्रातृहन्ता सहोदरः ।
पितृहन्ता श्रुतः पुत्रः वात्सल्यं खलु दूषितम् ॥१॥
श्वश्रूर्जाता वधूहन्त्री प्रियहन्त्री च सा प्रिया ।
पत्नीहन्ता पतिर्जातः बान्धवाश्चापि निर्दयाः ॥२॥
न दाम्पत्यं पवित्रं तद् जनानां सफलं मतम् ।
पतिव्रतामपि त्यक्त्वा तेषां वेश्यैव वाञ्छिता ॥३॥
न केवलं परस्त्री सा दूषिता दुर्जनैर्बलात् ।
अधमेनाद्य पित्रापि स्वकन्या यौनशोषिता ॥४॥
स्वार्थमवैधसम्बन्धं कृत्वा भ्रमन्ति ये जनाः।
अबोधान् नवजातान् तान् कस्मै त्यजन्ति ते पुनः? ॥५॥
व्यभिचाररतः इत्थं निकृष्टश्च पशोरपि ।
मनुजोऽद्य कथं जातः निवसन् शिक्षितोऽपि सः? ॥६॥
उन्मत्ताः पापिनः क्रूराः सन्तोऽसामाजिकास्तथा ।
नैतिकमूल्यहीनाश्च सम्भ्रान्ताः किममी जनाः? ॥७॥

# द्विपादिका

डॉ० रश्मिकांत व्यासः, भारती भवनम् (महाकाल), उज्जैन

घनघोरबिन्दुपातः गर्जनेषु सौदामिनी प्रकाशते मुहुः ।
तद्वत् त्वदीया स्मृतिः हृत् शूलयति वारम् ॥
वर्षायाः बिन्दुपातः मनो मे मोदयति ।
यथा कश्चिद् भ्रमरः शिशुन्मुन्मनीकरोति ॥
श्रावणस्य बिन्दुपातेषु चित्तं मे सजलम् ।
खजुराहो-सद्यःस्नाता-प्रतिमायाः तनुरिव प्रतिभाति॥
प्रचण्डे प्रावृषि न कोऽपि यदा दृष्टिपथमायाति ।
तस्मिन्नगच्छेत् क्वापि चेत् स्वर्णकादम्बिनी ॥
अंजनं वर्षति नभसि विरामगतः सर्वोऽपि यातायातः ।
यदा त्वया निवर्तितं मुखं हृदि शूलः लग्नः ॥



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# व्योमशेखर की "अहं राष्ट्री" : शिल्प और संवेदन

श्रीमति शशि चौहान
उपप्रधानाचार्या
भ०प्र० ओमर बालिका इण्टर कालेज, बांदा

डा॰ विशनलाल गौड 'व्योमशेखर' की **'अहं राष्ट्री'** संस्कृत की आधुनिक कविता के क्षेत्र में अपनी शैली की एक अलग ही प्रकार की गीति रचना है। इस गीति रचना के शिल्प और संवेदन की समीक्षा करने से पूर्व यह आवश्यक अनुभव होता है कि गीति काव्य की प्रवृत्ति और संस्कृत साहित्य में गीतिकाव्य की परम्परा पर एक विहंगम दृष्टिपात कर लिया जाये।

**प्राचीन संस्कृत काव्यशास्त्र में गीतिकाव्य समीक्षा की न्यूनता**

संयोग की बात है कि संस्कृत के काव्यशास्त्रियों ने गीति रचना के बारे में काव्य की सामान्य प्रवृत्तियों से बाहर कोई अधिक गंभीर विचार नहीं किया। यद्यपि यह सत्य है कि गीति का उदय ऋग्वेद की ऋचाओं के साथ ही हो गया था। ऋग्वेद के सोमगीत, उषागीत और उर्वशी तथा पुरूरवा के प्रेमगीत गीति रचना के आदिम रूप कहे जा सकते हैं। हम यह भी देखते हैं कि सामान्य ऋचाओं से हटकर गेयतायुक्त ऋचाओं को 'साम' नाम भी वैदिक युग में मिल गया था–**गीतिषु सामाख्या**। परन्तु हमें यह सत्य स्वीकारने में कोई हीनता बोध नहीं होना चाहिए कि गीति रचना को लेकर सामान्य काव्य रचना से भिन्न किसी विशेष दृष्टि की मीमांसा हमारे संस्कृत काव्य शास्त्र में नहीं की गयी। इसका एक कारण संभवत यह हो सकता है कि संस्कृत काव्य में प्रबन्ध रचना का आधिक्य रहा और गीति रचना उसका ही एक रूप मान ली गयी और उसकी तुलना में वह गौण होकर रह गयी।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

## गीतिकाव्य समीक्षा का उदय

अठारहवीं-उन्नीसवीं शती में जब भारतीय साहित्यकारों और साहित्य समीक्षकों के लिए पाश्चात्त्य साहित्य का संपर्क मिला तो कविता की गीति विधा के बारे में स्वतंत्र रूप से समीक्षा के द्वार खुल गये । पाश्चात्त्य संस्कृत विद्वानों ने पहली बार मेघदूत और ऋतुसंहार जैसी रचनाओं का महाकाव्य से पृथक् गीतिरचनाओं के रूप में रखा । इसके बाद भारतीय विद्वानों ने भी गीतिकाव्य को महाकाव्य रचनाओं से पृथक् जांचना-परखना आरम्भ कर दिया और कुछ नये गीतिकाव्यों की रचनाएं भी निरन्तर प्रकाश में आने लगीं ।

## गीतिकाव्य की मुख्या प्रवृत्तियां

गीतिकाव्यों को दृष्टिगत करते हुए आधुनिक समीक्षकों ने गीतिरचना की जिन मुख्य प्रवृत्तियों का उल्लेख किया है उनमें कवि का भावातिरेक, मुक्त कल्पना, इतिवृत्त का अभाव, गेयता, इन्द्रियों को तृप्ति देने वाले बिम्बों की योजना, भाषा की सरलता और तरलता प्रमुख हैं । इन्हीं विशेषताओं के कारण कोई गीतिरचना यदि लघु मुक्तक के रूप में है तो भी वह पाठक या श्रोता का वशीकरण कर लेती है । गीतिरचना कवि की आत्मा का भावातिरेक है । इसमें रचनाकार कहीं बाहर से कथा कथ्य तनिक भी नहीं पकड़ता । उसका जो निजी भावसंसार है, वही उसकी गीति का कथ्य होता है । एक गीतिरचना से बढ़कर कवि की आत्माभिव्यक्ति का कवितारूप दूसरा नहीं हो सकता । यही कारण है कि सबसे अधिक प्रभावी और मर्मस्पर्शी प्रणय गीतों की रचनाएं गीतिकाव्य के रूप में ही मिलती हैं ।

गीतिरचना में कवि किसी भी प्रकार के इतिवृत्त के प्रबन्धसार से सर्वथा मुक्त होता है । उसकी रचना में अनुभूतियों के आवेग के अनुरूप कल्पना की मुक्त उड़ान और संवेदनाओं में छाये सौन्दर्य को सघनता देनै वाले कमनीय बिंबविधान आदि की पूरी स्वतंत्रता रहती है । अपनी इसी विशेषता के कारण एक अच्छी गीति रचना इन्द्रियों को तृप्ति देने वाले सुन्दरतम चित्रों की माला प्रतीत होती है ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक सुन्दर गीति रचना कवि की निजी भावनाओं का उत्तेजक कोई क्षण होता है या कहना चाहिए कि किसी क्षण विशेष की कोई आवेगमयी भावमुद्रा होती है जिसका विस्तारण एक गीतिकाव्य के रूप में होता है। विस्तारण का आयाम भी भावमुद्रा के क्षण की आयति पर निर्भर करता है। यदि वह आयति अधिक विस्तार वाली नहीं है तो गीति रचना एक मुक्तक या लघु गीत के रूप में भी हो सकती है, और यही भावमुद्रा की आयति का विस्तार अधिक है तो वह अनेक छन्दों की एक शृंखला भी हो सकती है।

गीतिकाव्य जैसा कि इस नाम से ही अन्वर्थ निकलता है, एक विशेष प्रकार की गेय रचना का नाम है। वैसे तो साहित्य की सभी रचनाओं के गद्य- पद्य भेद का आधार रचना का छन्दबद्ध और छन्दमुक्त होना ही है। किन्तु यह होने पर भी हमें यह जान लेना चाहिए कि सभी पद्य रचनाएं गीतिकाव्य कहलाने की अधिकारी नहीं होती। गीतिकाव्य का प्राणतत्त्व वास्तव में उसकी गेयता है। यह गेयता सभी छन्दों में एक जैसी कभी नहीं हो सकती। कुछ छन्द केवल गद्य का भेद कर सकते हैं। वे गीतिरचना के लिए अधिक समर्थ नहीं माने जा सकते। कुछ छन्द प्रकृति से अधिक गेय होते हैं, निश्चित रूप से उनका प्रयोग एक अच्छी गीति रचनाओं को जन्म दे सकता है।

कवि का आन्तरिक भावस्पन्द ही गीतिरचना के छन्द का निर्धारण करता है। उदाहरण के लिए हम कालिदास के मेघदूत के 'मन्दाक्रान्ता' छन्द को देख सकते हैं। वर्षा के वियोगगीत की भावभूमि के लिए यह छन्द अपनी हिलोरों के कारण बहुत ही अनुरूप होता है। यह सावन की मल्हार जैसा गेय लगता है। इसी प्रकार हम देखते हैं कि उदात्त प्रकार की भावानुभूतियों की अभिव्यक्ति के लिए 'शिखरिणी' छन्द गीति रचना के बहुत अनुरूप होता है। आचार्य शंकर की 'सौन्दर्यलहरी' और पण्डितराज जगन्नाथ की 'गंगालहरी' जैसी सुन्दर गीति रचनाओं में शिखरिणी छन्द का ही प्रयोग मिलता है।


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

## संस्कृत गीतिकाव्य की परम्परा

संस्कृत के गीतिकाव्यों की परम्परा का प्रारम्भ विद्वान् लोग कालिदास के मेघदूत से मानते हैं। वैसे कहीं दूत काव्य, कहीं लहरी काव्य और कहीं शतककाव्य के रूप में संस्कृत की गीति परम्परा के अनेक भेद मिलते हैं। प्राचीन गीतिकाव्यों में कालिदास का मेघदूत, धोयी का पवनदूत, अमरु का अमरुकशतक, भर्तृहरि का शृंगारशतक, बिह्लण की चौरपंचाशिका तथा शंकराचार्य और पण्डितराज जगन्नाथ आदि की लहरी रचनाएं गीतिकाव्य के भिन्न भिन्न प्रतिदर्शों के रूप में देखी जा सकती है।

## संस्कृत गीतिकाव्य की आधुनिक धारा

देश की स्वतन्त्रता के बाद संस्कृत के आधुनिक रचनाकारों ने भी अपनी अपनी शैली के अनेक गीतिकाव्यों की रचनाएं की हैं। शतक काव्यों की संख्या तो पिछले पचास वर्षों में सौ की संख्या को भी पार कर गई प्रतीत होती है। परन्तु इन शतक काव्यों में से गीतिकाव्य कहे जाने की योग्यता कुछ में ही हो सकती है, सभी में नहीं।

संस्कृत के वे रचनाकार जो नये युगबोध और दूसरी भाषाओं के गीति साहित्य से प्रभावित हैं, नये से नये प्रकार की गीतिरचना कर रहे हैं। इस प्रकार की गीति रचनाएं कुछ अर्थों में प्रयोगवादी कही जा सकती हैं। संस्कृत की प्रयोगवादी गीति रचनाओं में अंग्रेजी के सॉनेट, उर्दू की गजल और हिन्दी के मुक्त छन्द के प्रयोग बड़ी सफलता के साथ किये गये हैं। इस तरह की प्रयोगवादी गीतिरचनाएं करने वाले रचनाकारों में अभिराज राजेन्द्र मिश्र अग्रणी हैं। उन्होंने लोकगीतों की धुन में भी संस्कृत की प्रभावी गीतिरचनाएं की हैं।[५] व्योमशेखर की अग्निजा में भी अनेक प्रयोगवादी गीतिरचनाएं हैं। गजल और अन्य प्रकार की प्रयोगवादी रचना करने वालों में जगन्नाथ पाठक, राधावल्लभ त्रिपाठी, रमाकान्त शुक्ल तथा श्रीनिवास रथ जैसे गीतिकार प्रमुख हैं।[६] और भी अनेकों गीतिकार हैं जिनकी रचनाएं पत्रिकाओं के माध्यम से[७] तथा कुछ की आकाशवाणी और दूरदर्शन के माध्यम से समय-समय पर प्रकाश में आती रहती हैं। रमाकान्त शुक्ल का 'भाति मे भारतम्' इस दिशा में अत्यन्त लोकप्रिय गीतिकाव्य सिद्ध हुआ है।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

## 'अहं राष्ट्री' का शिल्प

संस्कृत की आधुनिक गीतिकाव्य धारा को सामने रखकर जब हम व्योमशेखर की **'अहं राष्ट्री'** के शिल्प और संवेदन की समीक्षा करते हैं तो हम पाते हैं कि उनके इस गीतिकाव्य में परम्परा और नवीनता का एक मनोहर गंगाजमनी संगम है। परम्परा से प्राप्त तत्त्वों का विचार करें तो इसका 'अहं राष्ट्री' नाम ही ऋग्वेद के राष्ट्री सूक्त से ग्रहण किया गया है ।[८] यदि इस नाम के प्रयोगशिल्प को देखें तो यह परम्परा से हटकर है, सर्वथा नवीनतम है । संस्कृत काव्य रचनाओं के संदर्भ में इस तरह का नाम शिल्प एक नया प्रयोग है। नाम का यह शिल्प उसी तरह नया है जैसे हिन्दी कवि केदारनाथ अग्रवाल की एक काव्यकृति का नाम ''हे मेरी तुम'' है।

'अहं राष्ट्री के' शैली शिल्प पर जब हम ध्यान देते हैं तो हमें निरुक्तकार यास्क की यह बात याद आती है कि शैली की दृष्टि से वेद की ऋचाएं तीन प्रकार की हैं–प्रत्यक्षकृत, परोक्षकृत और आध्यात्मिकी । यह भेद वास्तव में ऋचाओं की शैली का भेद है। जिन ऋचाओं में कवि अपने वर्ण्य या सम्बोध्य पात्र को अपने अभिमुख या प्रत्यक्ष अनुभव करके उसे सीधे तुम की भाषा में बोलता है तो वह शैली प्रत्यक्षकृत होती है। यह शैली गीतिरचना के लिये बहुत ही प्रभावी होती है। क्योंकि इसमें कवि अपने सम्बोध्य के साथ सीधे-सीधे संवाद करता है। मेघदूत की गीतियां इसी शैली में मिलती हैं। संस्कृत गजलकारों ने उर्दू गजल के प्रभाव से अनेकत्र इसी शैली का प्रयोग किया है। परोक्षकृत शैली एक प्रकार से तटस्थ होकर वर्णन करती है। इसमें रचनाकार का अपना आपा नहीं घुल पाता। फलतः इसका प्रभाव भी कुछ मंद होता है। यह शैली प्रबन्धकाव्यों के लिये तो ठीक है गीतिकाव्य के लिये अधिक प्रभावी नहीं मानी जा सकती। आध्यात्मिकी शैली का दार्शनिक अध्यात्म से कुछ अधिक लेना-देना नहीं है। इसका सीधा-सीधा तात्पर्य रचनाकर द्वारा अपनी 'अस्मिता' अर्थात् 'अहंगत' अनुभूति को केन्द्र में रख देना है और अनुभूतियों की अभिव्यक्ति 'मैं' के माध्यम से करना है। इस शैली में रचनाकार अपने आत्मभाव को वर्ण्य पात्र के 'मैं' का रूप भी दे सकता है। व्योमशेखर ने 'अहं राष्ट्री' में



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
इसी आत्मगत शैली को अपनाया है। रचनाकार ने भारत राष्ट्र की अस्मिता अर्थात् आत्मा में अपने 'मैं' का विलय कर दिया है। इसीलिये उनकी 'अहं राष्ट्री' अपनी शैली की एक अलग ही प्रकार की आधुनिक गीतिकाव्य रचना है। आचार्य ब्रजमोहन चतुर्वेदी ने सम्भवतः इसी बात को ध्यान में रखकर इसे एक "विलक्षण गीतिकाव्य" कहा है।[१०]

'अहं राष्ट्री' के भाषा शिल्प और शैली के बारे में कुछ विद्वानों ने परम्परागत शब्दावली का प्रयोग करते हुए किसी ने इसे 'पांचाली शैली' की रचना और किसी ने इसे 'वैदर्भी शैली' की रचना कहा है। 'अभिराज' राजेन्द्र मिश्र ने **"अगौडी गौडानां सरसमधुरासौ शिखरिणी"** कह कर इसे एक अनुपम गीति रचना बताया है। यह तो रही काव्यशास्त्रियों और कवियों की बात। दूसरी ओर 'अहं राष्ट्री' के सामान्य पाठकों की दृष्टि से भी सोचा जाये तो यह कहने में कहीं कोई संकोच नहीं है कि काव्य भाषा की ऐसी सरलता और थिरकन सहज सुलभ नहीं होती है। भावों का सरल वृत्ति से सहज सम्प्रेषण कर देने वाली भाषा शैली व्योमशेखर के इस गीतिकाव्य की है ।

'अहं राष्ट्री' के कवि ने अपने शिल्प कौशल से भाषा की रूढ़ि और जड़ता को भी तोड़ा है। कथ्य की नवीनता ने नये शब्द शिल्प को जन्म दिया है। शिल्प की यह नवीनता ताजमहल का वर्णन करने वाली गीतिका में देखें। इस गीतिका में ताजमहल को प्रेम की पवित्र प्रभा, प्यार में डूबे मन का उच्छ्वास, सफेद संगमरमर की शय्या में सो रहा कोई स्वप्न, पिंघला हुआ प्रस्तर, प्रेमपादप का चांदनी सा फूल तथा सुधा की धारा की बौछार के रूप में वर्णित किया गया है। यह बिम्ब शिल्प रचनाकार की ताजमहल से जुड़ी निजी संवेदनाओं से जन्मा ही कहा जा सकता है, रूढ़िगत कदापि नहीं।[११] शिल्प की ऐसी ही नवीनता कविकुलगुरु कालिदास का वर्णन करने वाली गीतिका में मिलती है। व्योमशेखर ने इस गीतिका में कविकुल गुरु को कविता का कुमार अर्थ, वसन्त का विहग, सरसिज का अनघ रूप, आंसू बहाता कोई प्राण, हृदय का तरल भाव, और पृथिवी का मान, वर्णित किया है । सभी दृष्टि से यह एक नया भाषा शिल्प है जो एक ही गीतिका



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

में कालिदास के सम्पूर्ण कविव्यक्तित्व को और उसके काव्यार्थ के सौन्दर्य को समा लेता है।[१३]

साहित्य और संस्कृति के प्राचीन तत्त्वों को नये काव्य शिल्प में उतार कर भाषा और कथ्य के बासीपन को कैसे तोड़ा जाता है। यह शिल्प कौशल व्योमशेखर की 'अहं राष्ट्री' से पहचाना जा सकता है। इस प्रसंग में हम 'अहं राष्ट्री' की प्रथम गीतिका में प्रयोग किये गये 'गायत्री' और 'अमर्त्य' शब्दों के प्रयोग को ही देखें।[१४] लोकप्रसिद्ध गायत्रीमन्त्र और देवता जैसे रूढ अर्थों की भूमिका से भिन्न भूमिका में कवि ने इन शब्दों को उतार दिया है। यही कारण है कि यहां 'गायत्री' ने उद्‌गान कर रही राष्ट्री शक्ति का अर्थ और 'अमर्त्य' ने मृत्युभय से मुक्त वीरों का अर्थ ग्रहण कर लिया है ।

